ꞬAEKWAD'S ORIENTAL SERIES

ublished under the Authority of the
ɿovernment of his Highness the
Iaharaja Gaekwad of Baroda

GENERAL EDITOR
BENOYTOSH BHATTACHARYYA, M. A.

No. XIX

LEKHAPADDHATI

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लेखपद्धति

LEKHAPADDHATI

EDITED BY
The late CHIMANLAL D. DALAL, M. A.
WITH PREFACE, NOTES AND GLOSSARY BY
GAJANAN K. SHRIGONDEKAR, M. A.
Sanskrit Librarian, Central Library, BARODA

BARODA
CENTRAL LIBRARY
1925

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Printed by Natverlal Itcharam Desai and Published on behalf of the Government of H. H.
the Maharaja Gaekwad of Baroda, at the Central Library, Baroda, by Newton
Mohun Dutt, Curator of Libraries on
July 31st, 1925.

PRICE RS. 2.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Contents.

Preface	vii
Text	१–६८
Appendix I भूमिविक्रयपत्र, etc.	६९–७८
Appendix II Extracts from the Praśastiratnâkara of Dalapatirâya	७९–८३
Appendix III Śâsanas and letters	८४–८९
Appendix IV Extracts from the Lokaprakâśa of Kshemendra	९०–९३
Appendix V The writer, pen, ink, etc.	९४–९६
Glossary	९७–१२८
List of important persons	१२९
List of places	१३०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

PREFACE

The *Lekhapaddhati* is presented to the public mainly as a philological curiosity. It abounds in numerous vernacular words and phrases, Sanskritized after a curious fashion by classical inflexions and constructions. Many of the words are now obsolete, or when still in currency are found modified according to regular phonetic laws. In order to discover the meaning of some of the obsolete terms, the present writer had to visit the Kadi district of the territories of H. H. The Maharaja Gaekwad. By mixing freely with the villagers, he was delighted to find that some of the oldest inhabitants were familiar with numerous words long since fallen in desuetude, the meanings of which many eminent scholars whom he had consulted had failed to elucidate.

The work is written in what may be termed the "Mixed Sanskrit" of the end of the fifteenth century,* and will, it is hoped, afford useful material to the historian of the Gujarati language.

The author of the *Lekhapaddhati* is unknown, but from his constant reference to Pattan, and his habitual employment of expressions still current there, it may be surmised that he was a government officer serving in that locality. The book was evidently written as a guide to revenue officers and professional letter and petition writers, being a compilation of models of Government documents and specimens of official and other correspondence suitable for various occasions. Indirectly, therefore, it may throw some light on official procedure and government routine during the reign of the kings of Gujarat who flourished in the fifteenth century.

This is the very work referred to by Pandit Bhagavanlal Indraji in the *Bombay Gazetteer* Vol. I, Part 1, page 199ff. The passages referred to are to be found on p. 52 and p. 5, lines 23, 24 for the history of Lavanaprasada. He translates the title of this work as *Forms of Treaties*, and fixes its time as 1238 A. D. from the date Saṃ 1288 given in the Yamalapatra.

The names of kings, mentioned in this work, all refer to Gujarata. The Panch System was very common in those days and one of the members, perhaps the leading one of the Panch in most cases, was a Government official.

* Many of the *Lekhas* are dated, the latest date being that of the last *lekha* on page 57, i. e. Saṃ 1533, (A. D. 1477).

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The book has had a somewhat unfortunate career. The first editor, my learned predecessor in the Baroda Sanskrit Library, died before its completion, leaving in fact only the pages of the text in print. Thereupon, another competent scholar, the late Mr. T. M. Tripathi, B.A., undertook to complete it, but was prevented by long-continued illness terminating in his premature death. He had only been able to get together a few notes and some scanty material for the glossary and these have been incorporated in the work.

The present edition of the *Lekhapaddhati* is compiled from the following four manuscripts written in Devanagari characters:—

Manuscript A—consists of 41 leaves, with 11 lines per page and two leaves missing in the middle. It belongs to Seth Purushottama Visrama Mavaji of Bombay. It was secured through the kind offices of H. E. the Dewan Saheb, Sir Manubhai N. Mehta Kt., C. S. I., M. A. LL. B., and we are thankful to him for taking the trouble to secure this manuscript, which we were otherwise unable to get, as also to the Seth for his great kindness in lending the work, without which indeed it would have been impossible to bring out a fairly accurate edition of the book. The manuscript is not only more complete than the other three manuscripts, but also gives a greater number of *lekhas* with more details and particulars of the rulers, ministers and also of the executors of the deeds. The manuscript contains only the first part of the text herein printed. It is undated, but from the script it appears to have been copied in the 16th century. It contains—

(1) राजादेशः (2) शासनपत्रम् (3) राज्ञो भूर्जपत्तला (4) महामात्यपत्तला (5) राणकपत्तला (6) देशोत्तारविधिः (7) ग्रामपट्टकविधिः (8) समकरउद्धग्रामपट्टकः (9) गुप्ताक्षराणि (10) उत्तराक्षराणि (11) निरूपणा (12) अपरानिरूपणा (13) अश्वविक्रयपत्रविधिः (14) महामात्यभूर्जपत्रम् (15) श्रीकरणभूर्जपत्रम् (16) टिप्पणकम् (17) मार्गाक्षराणि (18) गुणाक्षराणि (19) न्यायचारविधिः (20) प्रतिपृच्छा (21) ग्रामसंस्था (22) पंचाले बलारभूमिसंस्थाविधिः (23) आधौ कृतवस्तुन उपरि गृहीतद्रव्यविधिः (24) वृद्धमेक (वृद्धि ?) धान्याक्षराणि (25) धर्मचीरिका (26) डोहलिकामुक्तिः (27) न्यासे (षे) धः (28) ग्रासलोपनम् (29) विशुद्धयक्षराणि (30) उपगता (31) ठेक (32) न्याषे- (से) धः (33) राजविज्ञप्तिका (34) गुरुविज्ञप्तिका (35) पितृविज्ञप्तिकां (36) मातृविज्ञप्तिका (37) वधूहेतो राजलेखः (38) स्वरूपविधिः (39) लेखः (40) सन्धिविग्रहौ (41) महामात्यस्य राजविज्ञप्तिः (42) व्यवहारपत्रविधिः (43) वलितपत्रविधिः (44) क्षेत्राड्डाणकपत्रविधिः (45) गृहाड्डाणकपत्रविधिः (46) गृहविक्रयपत्रविधिः (47) गृहडूलिकापत्रविधिः (48) अश्वाड्डाणकपत्रविधिः (49) आधिपत्रम् (50) धर्मेण दत्तभूमिपत्रविधिः (51) दासीपत्रविधिः (52) स्वयमागतादासीपत्रविधिः (53) विभङ्गपत्रविधिः (54) गर्दभपत्रविधिः (55) शीलपत्रविधिः (56) उत्थानपत्रिका (57) कृष्णाक्षरोज्ज्वलाक्षरविधिः (58) दाणमण्डपिकापत्रविधिः (59) हस्ताक्षराणि (60) सन्मुखहस्ताक्षराणि (61) मण्डलकरणस्य उपगता ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Manuscript B—consists of 2–20 leaves having 13 lines per page. It is dated Samvat 1536 (A. D. 1480). It belongs to the Deccan College Manuscripts Library (now deposited with the Bhandarkar Institute, Poona). This manuscript contains both the parts given in the present edition. Its first leaf is wanting. The second leaf begins with कारिपु यः साधुः सद्भिरुच्यते ॥ (*see* p. 68). The first part ends at line 9 of fol. 5b. with the letter to the friend which is given at page 62 of this edition. It is numbered 23, which shows that this part contains 23 letters only. The remaining leaves contain the second part which begins with the verses given at the beginning of this edition. This part has got 54 *lekhas* and is called at the end लेखपञ्चाशिका.

It contains in the first part—

(11) Last lines of जामातृलेखः (12) स्वामिलेखः (13) भृत्यलेखः (14) मित्रलेखः (15) प्रसन्नभार्या भर्तृलेखं प्रस्थापयति यथा (16) संरुष्टभार्याभर्तृलेखः (17) गुप्तप्रियाप्रियस्य लेखः (18) भार्यालेखः (19) सरोषभार्याया भर्तृलेखः (20) सानुरागः प्रस्थापयति प्रियालेखो यथा (21) कनिष्ठभ्रातृलेखः (22) पूर्वोक्तपूज्यैर्विस्तरव्यापिसामान्यप्रतिपत्तिलेखः (23) अमुकपुरे मित्रं प्रति प्रस्थापयति लेखो यथा ।

Part II contains—

(1) राजादेशः (2) शासनम् (3) ताम्रशासनम् (4) भूर्जपत्तला (5) श्रीपत्तला (6) देशोत्तारः (7) ग्रामपट्टकः (8) व्यवस्था (9) राजहुण्डिका (10) सामान्यहुण्डिका (11) गुप्तपट्टकः (12) उत्तराक्षराणि (13) निरूपणा (14) अपरा निरूपणा (15) अश्वविक्रयपट्टकः (16) गुणाक्षराणि (17) टिप्पनकम् (18) मार्गाक्षराणि (19) भूर्जपत्रम् (20) न्यायवादः (21) प्रतिपृच्छा (22) ग्रामसंस्था (23) धर्मचीरिका (24) दिव्यम् (25) डोहलिकामुक्तिः (26) न्याषेधः (27) न्याषेधः (28) ग्रामलोपनम् (29) न्याषेधः (30) विशुद्धिः (31) उपगता (32) ठेकः (33) सन्धिविग्रहः (34) लिखितम् (35) लेखः (36) राजविज्ञप्तिका (37a) गुरुविज्ञप्तिका (37b) पितृविज्ञप्तिका (37c) मातृविज्ञप्तिका (38) आशीर्वादः (39) व्यवहारपत्रम् (40) वलितपत्रम् (41) विक्रयचन्द्रकालिकपत्रम् (42) वृद्धफलभोग्यपत्रम् (43) आधिपत्रम् (44) अश्वपत्रम् (45) धर्मपत्रम् (46) दासीपत्रम् (47) विभङ्गपत्रम् (48) गर्दभपत्रम् (49) शीलपत्रम् (50) समयपत्रम् (51) यमलपत्रम् (52) ढौकनपत्रम् (53) संभत्तयाक्षराणि (54) स्वहस्ताक्षराणि ॥

The colophon runs as under:—

अमंतादिलेखानां भागे लोकस्य कथ्यते । चक्रिरे बुद्धिमानेन कथतां विबुधैर्मता ॥ लेखपंचासिका समाप्तेति । शिवमस्तु । संवत् १५३६ वर्षे चैत्र शुद्धि ११ बुधे ॥ यादृशमित्यादि ॥ श्री ॥ छ ॥ ॥ श्री ॥ छ ॥ श्री ॥ श्री ॥ शवमस्तु ॥ छ ॥

Manuscript C—contains leaves 3–27, has 9 lines per page, and is dated Samvat 1533 (A. D. 1477). A copy of this was supplied to us by the late Mr. T. M. Tripâthi. This manuscript contains both the parts.

P. P. Ac. Gunratnasuri M.S.   Jin Gun Aaradhak Trust

The first part is incomplete, as the manuscript wants 2 leaves in the beginning. The second part is complete but not so accurate as we find in the MSS A and B. The manuscript begins with a portion of part I, and then gives the whole of Part II, which is followed again by a portion from part I. The order of the *lekhas* given below clearly shows that there was some confusion in the original manuscript which the scribe had before him while making the copy.

It contains—

(1) धर्मचीरिका (2) दिव्यम् ॥ लेखपद्धतिः (1) श्रावकगुरुविज्ञप्तिका (2) आचार्यः श्रावकस्य प्रस्थापयति लेखं यथा (3) महेश्वरयोग्यविज्ञप्तिका (4) गुरुः शिष्यस्याशीर्वादं प्रस्थापयति यथा (5) श्रीमहाराजहेतोः विज्ञप्तिका (6) स्वामी सेवकस्य हेतोः प्रस्थापयति लेखं यथा (7) लघुभ्रातृहेतोः प्रस्थापयति लेखं यथा (8) माता सुतस्य हेतोः आशीर्वादं प्रस्थापयति यथा (9) जामाता श्वशुरयोग्यां विज्ञप्तिकां प्रस्थापयति यथा (10) भार्या पतियोग्यां विज्ञप्तिकां प्रस्थापयति यथा (11) रुष्टभार्या भर्तृयोग्यां विज्ञप्तिकां प्रस्थापयति यथा (12) पतिः भार्याहेतोः प्रस्थापयति लेखं यथा (13) कुङ्कुमपत्रिका (14) पत्तला (15) ग्रामपट्टकः (16) आलापः (17) घोटकवेचणकपत्रम् (18) विकरणपट्टकः (19) भूंजीटिका (20) उत्थानपत्रिका (21) चीठिका (22) उपगता (23) कण-उपगता (24) हुण्डिका (25) श्रीपत्रिका (26) क्रियाणकपथकपट्टक (27) देशपट्टकः (28) शासनपत्रम् (29) भाषोत्तरम् (30) व्यवहारपत्रम् (31) आधिपत्रम् (32) विभङ्गपत्रम् (33) विधिपत्रम् (34) धर्मचीरिका (35) गुणपत्रम् (36) व्यवहारपत्रम् (37) क्षेत्राड्डाणकपत्रम् (38) स्वयमागतादासीपत्रम् ॥

The colophon runs as follows—

संवत् १५३३ वर्षे ज्येष्ठ शुदि ८ भौमे अद्येह नरसंडाग्रामे राणाश्रीजगमालविजयराज्ये सुंदणाश्रीरामसुतहरिदासेन आत्महेतवे लेखपंचाशका लिखिता स्वीयपठनार्थम् ॥

Manuscript D—consists of 13 leaves, with 9 lines per page. The manuscript is undated, but from the mode of writing it seems to have been copied in the 16th century A. D. It belongs to the collection of the Central Library, Baroda. The first part of the manuscript is complete and more extensive than the rest. It has been therefore, very useful in supplying the missing portions of B and improving the text of C. In the second part, there is, as the following contents will show, a great confusion in the arrangement of the *lekhas.* It contains only fragments of some deeds. This may be due to the defectiveness of the original manuscript which the scribe was copying. This begins with the verses (printed on pages 58–59 of this edition). It contains—

Part I लेखपद्धति folios 1–11.

(1) गुरुलेखः (2) शिष्यलेखः (3) श्रावकगुरुलेखः (4) आचार्यः प्रस्थापयति श्रावकलेखम् (5) पितृलेखः (6) पुत्रलेखः (7) मातृलेखः (8) श्वशुरलेखः (9) श्वश्रू-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लेखः (10) मातृलेखः (11) स्वामिलेखः (12) मृत्यलेखः (13) मित्रलेखः (14) प्रसन्नभार्यालेखः (15) रुष्टभार्याभर्तृलेखः (16) गुप्तं प्रियालेखं प्रस्थापयति प्रिये (17) भर्त्ता प्रस्थापयति भार्यां प्रति लेखं यथा (18) सरोषपतिभार्यालेखः (19) सानुरागपतिः भार्यां प्रति लेखं प्रस्थापयति यथा.

Part II लेखपञ्चाशिका folios 12–13. This begins with the ten verses printed on page I of this edition. Then follows (1) राजादेशः (only four lines), (2) छुसडोहलिकाविधिः (a portion), (3) न्यापेध numbered as 11, (a portion only), (4) न्यापेधः (5) न्यापेधपत्रिका (6) विशुद्धाक्षराणि (numbered as 24), (7) उपगतम् (numbered as 25), and eight verses generally given at the end of शासन (numbered as 33)

On a comparison of the contents of these manuscripts it will be observed that some contain more *lekhas*, and some less, and that they are mostly headed by their technical names, while in some the heading is in a descriptive form.

In the present edition, every *lekha* is made to precede with the mark of the manuscript from which it is taken, and when the same differs in different manuscripts, all are given with separate numerical markings.

The editor acknowledges with gratitude the valuable assistance in the compilation of the glossary rendered to him by the well-known Professor K. H. Dhruva, B. A. of Ahmedabad; by the excellent scholar of Gujarati Pandit Chhotalal N. Bhatt of Baroda; and by his esteemed colleague in the Central Library Baroda, Pandit Lalchand Bhagwandas Gandhi.

G. K. Shrigondekar.

P. P. Ac. Gunratnasuri M.S.

Jin Gun Aaradhak Trust

लेखपद्धतिः ।

गुरोर्वचनमादाय मतिमाश्रित्य धीमताम् ।
अज्ञानबोधनार्थाय वक्ष्येऽहं लेखपद्धतिम् ॥ १ ॥
राजादेशः शासनं पत्तला च देशोत्तारो ग्रामपट्टो व्यवस्था ।
हुण्डी गुप्तोत्तारनिरूपणाश्वक्रीतं भूर्जं टिप्पनं गौणपत्रम् ॥ २ ॥
न्यायवादः प्रतिपृच्छा ग्रामसंस्था च चौरिका[2] ।
दिव्यं डोहलिकामुक्तिर्व्याषेधो ग्रासलोपनम् ॥ ३ ॥
विशुद्ध्युपगता ठेको व्याषेधः सन्धिविग्रहौ ।
सुहृदां लिखितं हीने लेखो[3] विज्ञप्तिकाशिषौ ॥ ४ ॥
व्यवहारवलितविक्रयवृद्धिर्फल[4]ाध्यश्वधर्मदासीनाम् ।
पत्रं विभङ्गगर्दभशीलसमययमलढौकसंवित्तेः ॥ ५ ॥

एवं प्रयोगाः ५० ।

बहवो ह्यर्थव्यापारा राजमूले व्यवस्थिताः ।
स्वामिचित्तानुवृत्तिज्ञैः व्याप्रियन्ते विशारदैः ॥ ६ ॥
श्रीकरणव्ययकरणे राज्ञो धर्माधिकरणमण्डपिके ।
वेला[6]कुलजलपथकघटिकागृहटङ्कशालाश्च ॥ ७ ॥
द्रव्यांशुकभाण्डागारो वारिगृहदेववेश्मगणिकानाम् ।
हस्त्यश्वकलभशालाश्रेणिव्यापारतन्त्रकरणानि ॥ ८ ॥
कोष्ठागारोपक्रमकर्मकरस्थानदेवकरणानि ।
सन्धिर्महाक्षपटलं महानसं जयनशाला च ॥ ९ ॥
सत्रागारोऽन्तःपुरसुवर्णकरणं च कोष्ठिका[9] चैव ।
द्वात्रिंशत्करणानां नियोगिनः शुद्धमतयः स्युः ॥ १० ॥

---

१ A गुप्यपत्रं. २ D पीठिका. ३ A & B लेख्या. ४ A फलाश्वाहि. ५ B श्रीकरणे देवकरणे. ६ B वल्कुलमार्गपथि. ७ D पारिग्रह. ८ B & D सत्रागारोपक्रम. ९ D कोशादि ।

१–२ लेखप०

श्रीराजादेशो यथा—

A स्वस्ति । श्रीमहाराजाधिराजश्रीमदमुकराजादेशात् अमुकदेशे राणाअमुकाकस्य सप्रसादं समादिश्यते यथा । यदमुकदेशीयराज्ञो अमुकाकस्योपरि निरूपितदण्डनायकेन समं स्वीयघोटकपदातिशृङ्गिचित्रजतजयनशालाप्रहारवारणादिसर्वसामग्रिकया सहितः कटके प्रचलेथाः । दण्डनायकः श्रीअस्माभिः श्रीनिजस्थाने च विहितोऽस्तीत्यनुल्लङ्घ्य एवागन्तव्यः । दण्डनायकस्यादेशवर्त्तिना सर्वत्र विचरणीयं, निजमनोहार्यो क्षणमपि न वर्तितव्यं यथा दण्डनायकस्तदीयनिदेशवर्त्तितास्वरूपं श्रीमदस्मास्कं सदैव विज्ञापयति । वैशाखशुदि १५ सोमे दूयके स्वयमादेशः । प्रमाणं मनसाऽपि नोल्लङ्घनीयम् ॥

शासनपत्रं यथा—

I A संवत् ८०२ वर्षे कार्तिकशुदि ११ गुरावद्येह श्रीमदणहिल्लपत्तने समस्तद्वादशराजमण्डलीसमलङ्कृत-परमेश्वर-परमभट्टारक-उमापतिवरलब्धप्रौढप्रताप-संशोषितारातिनिवह-दक्षिणाधीशवरूथिनीगजघटाकुम्भस्थलविदारणैकपञ्चानन-रणाङ्गणविनिर्जितगर्जनिकाधिराज-अभिनवसिद्धराजचक्रवर्ति-राज्यलक्ष्मीस्वयंवर-चतुर्दशविद्यापारङ्गम-षट्त्रिंशद्दण्डायुधप्रयुञ्जने महानिपुण-शक्तित्रयोपचितोदय-सिद्धित्रयोपेत-सम्पूर्णषड्गुणनिधान-चारप्रयोगैः सदैवाधिगतपरराष्ट्रस्वरूप-षड्दर्शनाधार-बार्हस्पत्यौशनसीराजनीतिप्रयोगनिपुण-परच्छिद्रान्वेषणे महाजागरूक-आश्रितकल्पद्रुम-प्रजारञ्जने पितृरूप-ब्रह्मविष्णुरुद्रादिदेवतामहाभक्तितत्पर-महाराजाधिराजश्रीवणराजविजयराज्ये तत्पादपद्मोपजीविनि तन्नियुक्तमहामात्यश्रीशीलणे श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपन्थयति सतीत्येवं काले प्रवर्तमाने तद्विभोः प्रसादपत्तलायां भुज्यमानभीमपल्लीमण्डलकरणे महाराणाकश्रीमण्डलीकदेवपादैर्नियुक्तदण्ड०साङ्गणे पञ्चशतेषु व्याप्रियमाणे शासनपत्रमभिलिख्यते यथा ।

अग्नितीर्थे स्नात्वा त्रिभुवननाथं श्रीसोमनाथं पञ्चोपचारविधिना समभ्यर्च्य नमस्कृत्य च संसारासारतां विचिन्त्य दृष्टिगोचरगतानां समस्तपदार्थवस्तूनामनित्यतां ज्ञात्वाऽमुना प्रकारेण नलिनीदलगतजललवतरलतरं हि जीवितं भृगुशिरःपतनभयचकितमृगीकटाक्षविक्षेपभङ्गुरं शारदाभ्रपटलप्रायं च यौवनं, प्रहरद्वयच्छायासदृशी लक्ष्मीः, विषप्राया विषयाः, दुःखप्राया भोगाः, पुत्रमित्रकलत्रं च स्वार्थोपपत्त्या निर्विकारि अन्यथा सविकारि, इदमपि संसार-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विलसितं क्षणदृष्टविनष्टं मत्वा मायामयः संसारोऽयमिति निश्चित्य नित्योऽविनश्वरः केवलो धर्मः कीर्तिश्चेति सम्यगवबुध्य सोमपर्वणि सूर्यपर्वणि वा राणः कश्रीअमुकदेवेन परमया भक्त्या परलोकहिताय अमुकग्रामः स्वसीमापर्यन्तसवृक्षमालाकुलो नवनिधानसहितः पूर्वरीत्या पलमानदेवदायब्रह्मदायगवां गोचरवर्जं पानीयप्रवेशनिःसारसंयुक्तः । स्वसीमायां पूर्वस्यां च अमुकग्रामसीमायां सीमामर्यादा । एवं चतुराघाटोपलक्षितश्चतुरशीतिमठायनादिमुख्यानां विप्राणां तापसानां च विदितं अधिवाससक्तचातुर्वर्ण्यसमक्षं च चतुर्विधविप्रान् तन्निवासिनो विप्रवर्यान् तथा तन्नियुक्ताधिकारिणो अपरान् ग्रामजनपदावस्थानाधिपतीन् राजपुत्रांश्च दानेन कांश्चित्, सूनृतवाणीभिः कांश्चिद्विशेषप्रदानमानेन कांश्चित्सुवर्णरूप्यमणिमुक्ताभिः कांश्चिद्वस्त्रदानैश्च सम्पूज्य दानमानादिकेन सन्तोष्य अमुकदेवाय विप्राय वा शासने प्रदत्तः । तदेतस्मिन् ग्रामे यथोत्पद्यमानकणहिरण्यरूप्यादि पूर्वरीत्या भागलागादिकं ग्रामेयकैराज्ञाविधेयकैर्भूत्वा सर्वं श्रीदेवाय विप्राय वा दातव्यम् । ग्रामोऽयं ममान्वयेनापरेण वा धार्मिकेण भूत्वा स्वपुत्रपौत्रपरम्परया पालनीयो यथा दाता श्रेयोभाग् भवति तथा पालयिता च । तथा पुरा चोक्तं भगवता श्रीव्यासेन—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ १ ॥

स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ २ ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाः सर्पाः प्रजायन्ते दत्तदानापहारिणः ॥ ३ ॥

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरकं वसेत् ॥ ४ ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥ ५ ॥

तडागानां सहस्रेण अश्वमेधशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥ ६ ॥

दत्वा दानं भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामचन्द्रः ।
सामान्योऽयं दानधर्मो नृपाणां स्वे स्वे काले पालनीयो भवद्भिः॥ ७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इह हि जलदलीलाचञ्चले जीवलोके तृणतुषलघुसारे सारसंसारसारे ।
अपहरति दुराशः शासनं देवतानां नरकगहनगर्त्तावर्त्तपातोत्सुको यः ॥ ८ ॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ ९ ॥

अकराकरकर्त्ता यो गोसहस्रवधोपमः ।
गोसहस्रप्रदानेन पूर्वदत्तमलोपयन् ॥ १० ॥

मान्धाता स महीपतिः कृतयुगाऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥ ११ ॥

मम वंशक्षये क्षीणे कोऽपि राजा भविष्यति ।
तस्याहं करलग्नोऽस्मि मम दत्तं न चालयेत् ॥ १२ ॥

इति शासनपद्धतिः ।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपत्तने समस्तराजावलीसमलङ्कृतमहाराजाधिराजपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापसंशोषितारातिनिकरसप्तमचक्रवर्तिश्रीपार्वतीपतिप्रसादसम्पादितराज्यलक्ष्मीस्वयंवराभिनवसिद्धराजरिपुराज्यश्रीभीमश्रीमद्भीमदेवः श्रीअमुकदेवस्यार्थे ब्राह्मणस्य वा शासनं प्रयच्छति यथा ॥ अग्नितीर्थे स्नात्वा त्रिभुवनस्वामिनं श्रीसोमनाथं पञ्चोपचारविधिना समभ्यर्च्य नमस्कृत्य च संसारासारतां विचिन्त्य दृष्टिगोचरगतानां समस्तपदार्थवस्तूनामनित्यतां संदर्श्येत्यमुना प्रकारेण नलिनीदलगतजललवतरलतरं यौवनं प्रहरद्वयच्छायासदृशी लक्ष्मीः विषप्राया विषयाः दुःखप्राया विभोगाः पुत्रमित्रकलत्रं च स्वार्थसम्पत्त्या निर्विकारि अन्यथा सविकारि । इदमपि संसारविलसितं क्षणदृष्टविनष्टं निश्चित्य नित्यः केवलो धर्म्मः कीर्तिश्चेति मत्वा सोमपर्वणि परया भक्त्या धार्मिकेन भूत्वाऽमुकग्रामः देवस्य ब्राह्मणस्य वा देवदायब्रह्मदायवर्जं शासनेन प्रदत्तः । तदेवास्मिन् ग्रामे यथोत्पन्नद्रव्यहिरण्यरौप्यकणभोगभागवित्तादिकं ग्रामेयकैर्देवदाये ब्रह्मदाये वा दातव्यम् । ग्रामोऽयं मम्मान्वयेनापरेण धार्मिकेण भूत्वा पालनीयः । यथा दाता तथा पालकोऽपि श्रेयोभाग् भवति । यथोक्तं भगवता व्यासेन—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ १ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वदत्तां परदत्तां वा यो हरेच वसुन्धराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ २ ॥

श्रीपत्रं शासनमिति ॥

ताम्रशासनं यथा—

B श्रीनृपविक्रमसमयातीतसंवत्सरशतेषु द्वादशसु अष्टाधिकाशीत्यधिकेषु संवत्सरान्तः वैशाखमासे शुक्लपक्षे तृतीयायां गुरुवासरेऽस्यां संवत्सरमासतिथिवारपूर्वं शासनपत्रमिदम् । अत्रांकतोऽपि संवत् १२८८ वर्षे वैशाखशुदि ३ गुरावद्येह श्रीमदणहिल्लपाटके समस्तराजावलीसमलङ्कृतमहाराजाधिराजपरमेश्वरपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापश्रीबृहन्मूलराजदेवपादानुध्यातमहाराजाधिराजपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापश्रीचामुण्डदेवपादानुध्यातश्रीअरिराजनन्दनशङ्कर(?)श्रीवल्लभदेवपादानुध्यातश्रीमहाराजाधिराजश्रीदुर्लभदेवपादानुध्यानरतमहाराजाधिराजश्रीबृहद्भीमपादानुध्यानरतमहाराजश्रीमत्कर्णदेवपादानुध्यानरतमहाराजाधिराजरिपुराज्यलक्ष्मीस्वयंवरबर्बरकजिष्णुअवन्तीनाथत्रिभुवनगण्डश्रीमज्जयसिंहदेवपादानुध्यातरणविनिर्जितशाकम्भरीभूपालश्रीकुमारपालदेवपादानुध्यातप्रतापाक्रान्तकरदीकृतसपादलक्षलक्ष्मीपालश्रीमदजयपालपादानुध्यातबालनारायणावताररणाङ्गणविनिर्जितगर्जनकाधिराजश्रीमूलदेवपादानुध्यातअभिनवसिद्धराजरिपुराज्यलक्ष्मीस्वयंवरश्रीमद्भीमदेवकल्याणविजयराज्ये तत्पादपद्मोपजीविनि प्रभुभक्तिसिद्धमन्त्रैकाभ्यसनव्यसनिनि सुनयानुरञ्जितगीयमानगुणौवे महामात्यश्रीभाभूये श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपन्थयतीत्येवं काले प्रवर्तमाने प्रभोः प्रसादान्महामण्डलाधिपतिराणकश्रीलावण्यदेवप्रसादेन प्रसादपत्तलायां भुज्यमानखेटकाधारपथके तन्नियुक्तदण्ड०श्रीमाधवप्रभृतिपञ्चकुलप्रतिपत्तौ ताम्रशासनं लिख्यते यथा । श्रीमच्चौलुक्यवंशान्वये प्रसूतराणकश्रीआनलदेसुतमहामण्डलेश्वराधिपतिश्रीराणकलावण्यप्रसाददेवः स्वपितुरात्मनश्च परमपुण्याभिवृद्धये अग्नितीर्थे स्नात्वा त्रिभुवनस्वामिनं श्रीसोमनाथं पञ्चाङ्गपूजोपहारविधिना समभ्यर्च्य नमस्कृत्य च संसारासारतां विचिन्त्य दृष्टिगोचरगतानां समस्तपदार्थवस्तूनामनित्यतां संदृश्येत्यमुना प्रकारेण नलिनीदलगतजललवतरलतरं यौवनं जीवितव्यं च प्रहरद्वयछायासदृशी लक्ष्मीर्विषप्राया विषया दुःखप्राया भोगाः पुत्रमित्रकलत्रादिकं च स्वार्थसम्पत्त्या निर्विकारमन्यथा सविकारीति युक्त्या इदमपि च परं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संसारादिकं विलसितं क्षणदृष्टविनष्टं चेत्याकलय्य सर्वमप्यनित्यं निश्चित्य नित्यः केवलो धर्मः कीर्तिश्च तस्मात्परलोकसुखाय देवब्राह्मणान् गुरूंश्च सुवर्णरूप्याभरणवस्त्रादिभिः सम्पूज्य तन्निवासिनो ब्राह्मणोत्तरान् नियुक्ताधिकारिणो ग्रामजनपदान् मठस्थानाधिपतीन् राजपुत्रांश्च दानेन कांश्चिद्धनसन्मानेन कोमलाप्य सम्भाव्य च बोधयन् सर्वेषां विदितं शासनं चकार । अस्मिन् खेटकाधारपथके अमुकग्रामः स्वसीमापर्यन्तः सवृक्षमालाकुलः सकाष्ठतृणोदकोपेतः सर्वस्वीयसीमोपेतो नवनिधानसहितः पूर्वरूढ्या पलमानदेवब्रह्मदायवर्जं श्रीदेवपत्तनवास्तव्यप्रत्ययजनकठ० अमुकाय श्रीसोमेश्वरदेवस्य पञ्चोपचारस्नानपूजादिनैवेद्यादिनिमित्तममुकपूर्वमस्माभिः शासनेन प्रदत्तः ॥ ग्रामाघाटा यथा ॥ इमं चतुराघाटोपलक्षितं ग्रामं प्रदत्तमित्यवगम्य तन्निवासिभिर्जनपदैर्ग्रामस्यास्य भोगकरहिरण्यादिकं सर्वमपि श्रीसोमनाथदेवस्य पूजार्थं प्रत्ययजनकठ० अमुकाकस्य समर्पयितव्यं सम्पादनीयं च । सामान्यं मत्पुण्यफलमेतदवगम्य मद्वंशजैरन्यैरपि भुवो भोक्तृभिरस्मत्प्रदत्तधर्मदायोऽनुमन्तव्यः पालनीयश्च ॥ उक्तं च भगवता व्यासेन—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ १ ॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरकं वसेत् ॥ २ ॥
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ ३ ॥
इह हि जलदलीलाचञ्चले जीवलोके तृणतुषलघुसारे सारसंसारसारे ।
अपहरति दुराशः शासनं देवतानां नरकगहनगर्त्तावर्त्तपातो ध्रुवोऽयम् ॥४॥
दत्वा दानं भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामचन्द्रः ।
सामान्योऽयं दानधर्मो नृपाणां स्वे स्वे काले पालनीयो भवद्भिः ॥ ५ ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥ ६ ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाः सर्पाः प्रजायन्ते दत्तदानापहारिणः ॥ ७ ॥
मम वंशक्षये क्षीणे कोऽपि राजा भविष्यति ।
तस्याहं करलग्नोऽस्मि मम दत्तं न चालयेत् ॥ ८ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मान्धाता स महीपतिः कृतयुगाऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥ ९ ॥

श्रीभूर्जपत्तला यथा—

I B (श्रीराज्ञो भूर्जपत्तला) श्रीमदमुकराजादेशात् अमुकराणकस्य सप्रसादं समादिश्यते यथा । अमुकदेशोऽयं श्रीअस्माभिः पूर्वरूढ्यापलमानदेवदायब्रह्मदायवर्ज्जं भवतः प्रसादेन प्रदत्त इति ॥ संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे दूयके स्वयमादेशः ॥

II A (श्रीमहामात्यपत्तला) स्वस्ति श्रीमहामात्यवचनादमुकदेशीयसमस्तमहाविषयिकाणां समादिश्यते यथा । यत् श्रीराजादेशादेशोऽयं राणाअमुकाकस्य पूर्वरूढ्या पलमानदेवदायब्रह्मदायवर्ज्जं प्रसादेन सञ्जातोऽस्ति । पत्तलामङ्गीकृत्य यथोत्पन्नसिद्धदानदायदानीभोगादिकं सर्वं निश्छद्मवृत्त्या प्रीतिपूर्वं राणाअमुकाकस्य दातव्यमिति । सं. ८०२ ज्येष्ठशुदि १५ गुरौ । मतं श्रीः ॥

III A (श्रीराणकपत्तला) संवत् ८०२ वैशाखशुदि ३ रवावद्येह समस्तयथालिख्यमानराजावलीपूर्वं अमुकमण्डलकरणदेशादिमहाराणकश्रीअमुकः पत्तलां प्रयच्छति यथा । यत् श्रीअस्माभिः राज० अमुकाकस्य अमुकमण्डलकरणे उद्ग्राह्यमाणअमुकग्रामोऽयं देवदायब्रह्मदायवर्जं प्रसादपत्तलायां प्रदत्तः । ततोऽस्मिन् ग्रामे पूर्वरूढ्या दानीवोलापिकागोचरतलाराभाव्यदानप्रभृति यत्किञ्चिदुद्ग्राह्यमाणं भवति तत्सर्वं राज० अमुकाकेन पूर्वरीत्या न्यायपूर्वमुद्ग्राहयितव्यम् । नवतरभूमी शासने कस्यापि देवस्य विप्रस्य वा न दातव्या । ग्रामे रक्षपालत्वं कार्यम् । क्षुद्रोपद्रवादिकं रक्षणीयम् । स्वसीमामध्ये पांथानां ग्रामे वसमानलोकानां च गतं वस्तु वालयित्वा प्रदातव्यम् । अपरमेवं ग्रामस्यास्यायपदं भोगवता (भुञ्जता) पदातिजन १०० घोटक २० एतैः घोटकमानुषैः कटके राजधान्यां श्रीअस्माकं सेवा कार्या । अक्षयतृतीयायां वसमानसमकरकुलैः समं ग्रामोऽयं श्रीअस्माकं उद्ग्राहणीयः । तथा लिखितपत्तलाविधिनिर्वहणाय नवीनविनाशरक्षणाय दावापितान्तरस्थाः रक्षपालाः सर्वं कृतविधिलोपं विनाशं च निर्वहन्ति । इहार्थे स्वहस्तेन उभयोरपि प्रदत्तमत्तानि साक्षिणश्च । दूयके श्रीस्वयमादेशः ।

इति त्रिविधपत्तलाविधिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

IV C संवत् १५३३ वर्षे ज्येष्ठशुदि २ भौमे अद्येह श्रीभृगुकच्छे समस्त-राजावलीपूर्वं महाराजाधिराजश्रीमत्अमुकदेवपादाः पत्तलां प्रसादीकुर्वन्ति यथा। राज०अमुकाउत्तअमुकाकस्य अमुकदेशो देवदायब्रह्मदायवर्जं प्रसादपत्तलायां प्रदत्तोऽस्ति । अस्मिन्देशे पूर्वरूढ्या उद्ग्राह्यमाणमस्ति । तत् न्यायपूर्वकं राणाश्रीअमुकाकेन परम्परारीत्या उद्ग्राह्य ग्रहीतव्यं, देशमध्ये चौरचरटादिक्षुद्रोपद्रवादिकं रक्षणीयम् । रुचिरा रक्षा कार्या । स्वसीमायां गतं वस्तु दातव्यम् । अपरं च राणकश्रीअमुकाकेन पालापदातिजन ४०० वारुघोटक १०० प्रवहणकघोटक १०० एतावद्बलहरणेन अवलगा करणीया । नवतरभूमी शासने न दातव्या । एतावन्मात्रकुलैर्वसमानदेश उद्ग्राहणीयः । इति मतं श्रीः ।

देशोत्तारो यथा—

I A स्वस्ति महं०श्रीअमुकवचनान्मार्गे समस्तदेशाधिपठाकुरवुलावीयातलारहिण्डीपकप्रतीसारकप्रभृतीनां समादिश्यते यथा । यत् श्रीअणहिल्लपुरपत्तनात् नागसारिकाउपरि वाहनैः वस्तुस्वरूपाणि षष्ठ्यधिकशतक्रियाणकानि साहुअमुकाकेन चलापितानि सन्ति । वुलापिकाविषये सन्मुखं नावलोकनीयं, षश्चा न कार्या इति । संवत् ८०२ वैशाष शुदि ३ गुरौ । मतं श्रीः ॥

II B राजादेशात् अद्य महंतकश्रीअमुकवचनात् मार्गे अमुकदेशमध्ये समस्तग्रामेषु समस्तनदीषु च उभयतटसंतिष्ठमानबृहद्वाजिकपश्चकुलदेशाधिपठकुरग्रामतलारहिण्डीपकप्रतीसारकवोलापिकनियामकादिप्रभृतीनां आदिश्यते यथा । मार्गे अमुकाकेन सममभुकग्रामात् अमुकग्रामे राज० अमुकाकसत्कसमागच्छमानउचालकभृतलाङ्गडि २ तथा ४ कण मूडा ४ बलीवर्द ८ महिषी १० एवमेतेषां सन्मुखं स्थानदानवोलापिकतलाराभाव्यप्रभृतीनां व्यतिकरे काऽपि खश्चा बद्धा न करणीया, केनापि क्वापि किमपि न भणनीयं च । दू० स्वयमादेशः ॥

III B बालाधि०श्रीअमुकाकवचनान्मार्गे समस्तदेशठक्कुरदेशतलारग्रामतलारहिण्डीपकप्रतीसारकवोलापिकप्रभृतीनां समादिश्यते यथा । वाहनभृतसमस्तक्रियमाणकानां श्रीमत्पत्तनान्नागसारिकाउपरि साधुअमुकभृतबलीवर्दानां च दानवोलापनादिविषये केनापि न सन्मुखमवलोकनीयमिति । संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे मतं श्रीः ॥

ग्रामपट्टको यथा—

I A संव ८०२ वैशाख शुदि ३ गुरौ अद्येह अमुकपथके महं०श्रीअमु-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कप्रभृतिपञ्चकुलं राज० गोदाकस्य अमुकग्रामपट्टकं प्रयच्छति यथा । राजगोदाकेन सां० आगामि ८०३ वर्षोपरि ग्रामपट्टके देय द्र० ३००० सहस्रत्रयं द्रम्मास्तथा पञ्चकुलस्य कर्पटभावे देयद्रम्माः २१६ षोडशाधिकशतद्वयं द्रम्मा विकरपदे देयद्र० ४० चत्वारिंशत् । चटापकमलमार्गणमाङ्गलीयकचतुरकपतितं देशाचारेण दातव्यम् । स्वसीमामध्ये मार्गो लोहमयो रक्षणीयः। पट्टकद्रम्माणां व्यवस्था यथा । प्रथमस्कन्धे सां० भाद्रपदे देयद्र०१००० तथा द्वितीयस्कन्धे सां० मार्गशीर्षे देयद्र० १००० तथा तृतीयस्कन्धे अक्षयतृतीयायां देयद्र० १००० । अनया व्यवस्थया स्कन्धत्रयेण श्रीभाण्डागारे श्रीकरणविदितं पट्टकद्रम्माः प्रवेशनीयाः । अमीषां पट्टकद्रम्माणां यथालिखितपट्टकविधिना दावापनाय पट्टकार्थस्य निर्वहणाय दावापितप्रतिभूः अमुकग्रामराज० अमुकाकसुतः सर्वं श्रीकरणपुरतो निर्वाहं करोति । इहार्थे प्रतिभूअमुकाकमतं । साक्षिणश्च ।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह अमुकपथके महं० श्रीअमुकाकः रा० अमुकाकस्य अमुकग्रामपट्टकं प्रयच्छति यथा ॥ परमारअमुकाकेन संवत् १२८९ वर्षोपरि ग्रामपट्टके देयद्र० ३००० त्रीणि सहस्राणि पञ्चकुलस्य भाव्ये देयद्रम्मा २१६ द्वे शते षोडशभिः सहिते, विकरपदे देयद्र० ४० चत्वारिंशत् । चटापकमलमाङ्गलीयकमार्गणचतुरकपतितं देशाचारेण दातव्यम् । स्वसीमामध्यमार्गो लोहमयो रक्षणीयः । पट्टकद्रम्माणां व्यवस्था यथा । प्रथमस्कन्धके सां० भाद्रपदे देयद्र० १००० तथा द्वितीयस्कन्धे सां० मार्गशीर्षे देयद्र० १००० तथाऽक्षयतृतीयायां देयद्र० १००० । अनया व्यवस्थया पट्टकद्रम्माः स्कंधत्रयेण दातव्याः । पट्टकद्रम्माणां दानाय पट्टकार्थसमस्तकरणाय दोषविनाशावष्टम्भिरक्षणाय दत्तप्रतिभूअमुकवास्तव्यठ० अमुकमतं श्रीः ॥

III C संवत् १५३३ वर्षे ज्येष्ठशुदि ८ भौमे अद्येह श्रीनरसमुद्रे राणकश्रीअमुकदेवप्रतिपत्तौ महं० अमुकप्रभृतिपञ्चकुलं पट्टकं प्रयच्छति यथा । राज० अमुकाकेन पूर्वरूढ्यापलमानदेवदायब्रह्मदायगवांगोचरवर्ज्जममुकग्रामस्य पट्टके देयद्रम्माः ४००१ विकरपदे देयद्र० ६४ महं०श्री अमुकाकस्य कर्पटपट्टे द्र० ११६ पारि० कर्पटपट्टे ६४ एवं देयद्रम्माः ४२४४ पञ्चचत्वारिंशदधिकशतद्वयाधिकचत्वारि सहस्राणि दातव्याः । भोगे देयकवतुलकलसी ४० मूटकचतुष्टयं भोगे दातव्यम् । अमीषां द्रम्माणां स्कन्धकव्यवस्था । दीपोत्सवे देयद्रम्माः २००० कार्तिकान्ते देयद्र० २२४५ । उभयथा अनया स्कन्धकव्यवस्थया द्रम्माणां दानाय पट्टकार्थस्य करणाय । दोषविनाशावष्टम्भिरक्षणाय, ओषधिप्रभृतीनां निस्सारणाय, अवधेरनन्तरं थाकमानानां पञ्चकशतप्रत्या सव्याजकद्रम्माणां दा-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नाय, समकरकुलानां निस्सारेण पालनाय, उद्वसकुटुम्बिकानां प्रदत्तगुणाक्षरैः पालनाय, कुलकुटुम्बिकानामन्यायेनादंडनाय, पञ्चविंशतिद्रम्माणामूर्ध्वं अधिक-दण्डस्य राजकुले प्रवेशनाय, स्वसीमायां स्वसङ्केतेन चौरादिकोपद्रवरक्षणाय, पाद्रीयकानां नवीनपञ्जिकानकरणाय, देवब्राह्मणेभ्यो नवतरभूमीनदानाय, भाइ आडतत्त्वा(?)मेहकुलानां वनवासनाय, मातङ्गानां गृहे गवां निषेधनाय, समस्त-लिखितपत्रविधेः परिपालनाय दत्तप्रतिभूः राज०अमुकाउत्तअमुकाकः १००० तथा २००० राज० अमुकउत्तअमुकाकः, तथा १२५५ राज० अमुकअमुकाकः । एभिस्त्रिभिः प्रतिभूभिः पट्टकनिर्गमः करणीयः ।

समकरउद्धग्रामपट्टकविधिर्यथा—

A सं० अमुकवर्षे यथालिखितराजावलीपूर्वं जयश्रीनिर्भरालिङ्गितशरीर-महामण्डलेश्वरराउलश्रीअमुकप्रतिबद्धमहं० श्रीअमुकाकप्रभृतिपञ्चकुलं ग्राम-पट्टकं प्रयच्छति यथा । यत् पूर्वरूढ्या पलमानदेवदायब्रह्मदायगवांगोचरस्थि-तिमुक्तिराजप्रसादवर्जं दाणवुलावीमाण्डवीवर्जं स्वसीमापर्यन्तस्य अमुकग्रामस्य अमुकज्ञातीयअमुकाकेन समकरपट्टकेऽथ उद्धपट्टके यथाकालं व्याप्रियमाणेन देयद्रम्माः ४००४ चतुरुत्तरचत्वारि सहस्राणि पञ्चकुलविदितं श्रीभाण्डागारे विशुद्धिसहिताः प्रवेशनीयाः ।

व्यवस्था यथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह श्रीकरणमहामात्य-श्रीअमुकादिपञ्चकुलमत्रैव प्रयच्छति कृतापराधदण्डे वा० अमुकाकस्य दण्ड-द्रम्माणां व्यवस्थाक्षराणि यथा ॥ वाणि०अमुकाकेन दण्डपदे देयरौप्य५००० पञ्चसहस्रम् । अमीषां मध्यात्प्रथमस्कंधके देयद्र० २००० तथा माघान्ते देयद्र० १५०० तथा अक्षयतृतीयायां देयद्र० १५०० । अनया व्यवस्थया स्कन्धत्रयेण द्रम्मान् ग्रहीष्यामः इति । मतं श्रीः ॥

राजहुण्डिका यथा—

I A स्वस्ति । महामण्डलेश्वरराणकश्रीअमुकाकः स्वमण्डले अधिकारि-णममुकाकं समादिशति यथा । आदेष्टव्यमिदम् । यत् राज० अमुकाकस्य भवता प्रथमोद्ग्राहितपोत्तकात् देयद्र० ३००० सहस्रत्रितयं द्रम्मा देयाः । तथा तत्रसमा-याततदीयपदातिजन ८ अष्टपदातीनां द्रम्माणां विशुद्धिं यावत् दिनं प्रति देय कणभक्तक ८ । संवत् ८०२ ज्येष्ठ शुदि १५ गुरौ । मतं श्रीः । दू० स्वयमेवादेशः।

II B स्वस्ति । महामण्डलेश्वरराणकअमुकाकः अमुकमण्डले अधि० अ-

P. P. Ac. Gunratnasuri M.S.		Jin Gun Aaradhak Trust

मुकाकं समादिशति यथा ॥ आदेष्टव्यमिदम् ॥ परमारराज०अमुकाकस्य भवता प्रथमोद्गहणकपोत्तकात् द्र० ३०० शतत्रयमर्पणीयम्। एतदीयपदातिजन ८ अष्टपदातीनां द्रम्माणां विशुद्धेर्यावत् दिनं प्रति देयकणभक्तक ८। संवत् १२८८ वर्षे वैशाख शुदि १५ सोमे दू० स्वयमादेशः॥

III C राजादेशात् अथ श्रीअमुकवचनात् अमुकदेशे अमुकाकस्य हुण्डिका लिख्यते यथा। राज०अमुकाउत्तअमुकाकस्य फलितपदे हुण्डिकाचारेण देयद्र० १२४ चतुर्विंशत्यधिकशतमेकं देयम्। अवधौ दिन १५। ऊर्ध्वदिनपाटिकायां दिनं प्रति देयद्र० १ क० २। संवत् १५३३ वर्षे ज्येष्ठ शु० ८ भौमे। मतम्।

गुप्तपट्टको यथा—

I A स्वस्ति। श्रीदेवकरणमहामात्यश्रीअमुकादिपञ्चकुलं श्रे० पासडसुत श्रे० बाहडस्य गुप्ताक्षराणि प्रयच्छति यथा। यत् श्रीत्रिपुरुषदेवस्याग्रतो अमुकपाटके पूर्वाभिमुखं समालिन्दकं द्विभूमिकं सफलहिकं चतुराघाटनिबद्धं श्रे० वाहडस्य गुप्तकेन समर्पितम्। गुप्तके प्रतिवर्षं दीपोत्सवे श्रीदेवस्य देयद्र० २१६ षोडशाधिके द्वे शते द्रम्मास्तथा विकरपदे देयद्र० २४ चतुर्विंशतिद्रम्माः प्रतिवर्षं दातव्याः। गुप्तकलिखितद्रम्मान् ददतो वा० बाहडेन पुत्रपौत्रपरम्परया गृहमिदं भोक्तव्यम्। चटापकं कुर्वतोऽन्यस्य कस्यापि गृहमिदं पञ्चकुलेन न दातव्यम्। अद्यदिनान्तरं गृहं ध्रुषितं भग्नं दैववशाज्ज्वलितं वा० बाहडेन यथापूर्वं समरापणीयं निजद्रव्येण। संवत् ८०२ वैशाषशुदि ३ गुरौ। मतं श्रीः प्रमाणम्।

II B स्वस्ति। श्रीदेवकरणमहंतकश्रीअमुकादिपञ्चकुलं श्रे० अमुकउत्तश्रे० अमुकस्य गुप्तपट्टकाक्षराणि प्रयच्छति यथा। श्रीत्रिपुरुषदेवस्याग्रतो अमुकपट्टके गृहं समालिन्दकं द्विभूमिकं सफलहिकं चतुराघाटनिबद्धं श्रे० अमुकाकस्य पट्टकेन समर्पितम्। गुप्तपट्टके प्रतिवर्षं दीपोत्सवे द्र० २४ चतुर्विंशतिद्रम्माः प्रतिवर्षं दातव्याः। प्रतिवर्षं तु चतुर्विंशतिद्रम्मान् दत्त्वा वा० अमुकाकेन पुत्रपौत्रपरम्परया भोक्तव्यम्। अन्यस्य चटापकेनापि पञ्चकुलेन नार्पणीयम्। अद्यदिनानन्तरं गृहं ध्रुषितं भग्नं चात्मीयद्रव्येण समर्चापनीयम्। संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे मतं श्रीः॥

उत्तराक्षराणि यथा—

I B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह लाटापल्ल्यां अधि०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अमुकाकप्रभृतिपञ्चकुलं व्यव० अमुकाकस्योत्तराणि प्रयच्छति यथा ॥ ततः संप्रत्यागामि सं० ८९ वर्षोपरि अमुकग्रामं सकलमपि अमुकेनोत्तारेण समर्पितम् । उत्तराङ्के कृतद्रम्म २०००० विंशतिसहस्राणि राजमाङ्गलीयके व्यवहारपदे देय द्र० ४००० चत्वारिंशत् शतानि पञ्चकुलपदे कर्पटकभाव्ये २०० द्विशतं विकरणपदे देय ५० पंचाशत् । व्यवहारकेण ग्राममध्ये द्विकशतव्याजेन द्रम्मा उद्ग्राह्याः । वाह्रोटकोऽपि द्विकशतव्याजप्रमाणेन ग्राह्यः । व्यवहारकेणोत्तारकद्रम्माः स्कंधत्रयेण श्रीमद्राजकुले प्रवेशनीयाः । सां० कार्त्तिकान्ते प्रथमस्कंधके देयद्र ७००० सप्तसहस्रं माघांते द्वितीयस्कन्धके देय ७००० सप्तसहस्रं चैत्रान्ते तृतीयस्कन्धके देय ६६५० षट्षष्टिशतानि पञ्चाशदधिकानि । अनया व्यवस्थया श्रीमद्राजकुलेन ग्राह्यम् । लिखितविधिपालनाय स्कन्धके द्रम्माणां दानाय च दत्तप्रतिभूव्यव० अमुकाकसुतअमुकाकमतं श्रीः ॥

II A संवत् ८०२ वैशाख शुदि ३ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं लाटापल्ल्यां अधिकारिदण्डनायकपञ्चकुलं व्यव०सोमसीहस्य उत्तराक्षराणि प्रयच्छति यथा । यदागामिवर्षोपरि सं० ८०३ वर्षे अमुकग्रामे कोटीया ४ चत्वारो ग्रामा भवतः समर्पिताः ॥ अमीषां ग्रामाणामागमिष्यमाणायपदोपरि भवता श्रीराजकुले देयटंकाः २०००० तथा माङ्गलीयके देयटंकाः ४०० पञ्चकुलस्य कर्पटभावे देयटङ्का २१६ विकरपदे देय टं० ५० एवं समस्तपदेषु व्य० सोमसीहेन देयटं० २०६६६ षट्षष्ठ्यधिकषट्शतोपेतविंशतिटंका व्य०सोमसीहेन अङ्गीकृत्य ग्रामाणामायपदात् कुटुम्बिकानां पार्श्वादुद्ग्राह्य गृहीतव्याः । व्य० सोमसीहेन उत्तारकद्रम्माः स्कन्धकत्रयेण श्रीराजकुले प्रवेशनीयाः ॥ सां० कार्तिकान्ते प्रथमस्कन्धे टं० ७६६६ सां० माघान्ते द्वितीयस्कन्धे ६५०० सां० चैत्रान्ते तृतीयस्कन्धे टं० ६५०० अनया व्यवस्थया ग्रामाणां मध्यादुत्पन्नद्रम्मा लिखितोत्तराक्षरप्रमाणेन राजकुले देयाः । ग्रामाणां मध्ये दण्डमाङ्गलीयकादिकं सर्वं श्रीराजकुलेन लभ्यम् । इहार्थे लिखितविधेः पालनाय स्कन्धकत्रयेण टङ्कानां विशुद्धिकरणाय च दावापितप्रतिभुवौ अमुकसुतौ अमुकाकौ उत्तरप्रत्युत्तररहितौ । समग्रनिर्वाहकरणाय उभयोरपि मतानि स्वहस्तेन ।

निरूपणा यथा—

I A स्वस्ति । श्रीमहामात्यश्रीमालदेवः अमुकपथके अधिकारिणं महं० हरिराजं बोधयति यथा । बोद्धव्यमिदम् । अस्माभिस्तव स्थाने अधिकारी मालदेवो निरूपितोऽस्तीत्यवबुध्य तदस्य भवता समस्तमुद्रासहितपदलेख्यकपो-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तकवहिकादिकं यथावस्थितमुद्रणनीयम् । भवता उत्थायात्रागन्तव्यम् । सं० ८०२ ज्येष्ठशुदि १३ भौमे ।

II B स्वस्ति । श्रीअमुकाकः अमुकपथके अधि० अमुकं बोधयति यथा ॥ बोद्धव्यमिदम् ॥ अस्माभिस्तव स्थाने अधिकारी अमुकाको निरूपितोऽस्ति । तदस्य भवता समस्तमुद्रादिउद्रणकलेखकपोत्तकवहिकादिकं च समर्प्पणीयम् । भवतात्रागन्तव्यम् । वैशाखशुदि १५ सोमे । मतं श्रीः ॥

अपराऽपि निरूपणा यथा—

I A स्वस्ति । महामात्यश्रीनागडः अमुकपथके अधि० अजयसीहं बोधयति यथा । बोद्धव्यमिदम् ॥ भवतां पार्श्वे तन्त्रे राज० अमुकाको निरूपितोऽस्ति । भवता तदस्य स्वाङ्गभोगपदे दिनं प्रति देयद्रम्माः २ । अमीषां दृष्टपञ्चाशत्पदातीनां मासं जनं प्रति देय द्र० ७, तथा दृष्टघोटक ८ खादनमोदने दिनं प्रति देय द्र० २ । अमीषां दृष्टघोटकपदातीनां अवलगा सदैवावलोक्या । अमीषां घोटकपदातीनां जातक्षूणानि समग्राण्यपि दिनगतानि वहिकायां लिखनीयानि । सं ८०२ ज्येष्ठशुदि १३ गुरौ दू० कडुआ । अमुकाकप्रतीतडोकरा राघदेवमतं । श्रीः ।

I B स्वस्ति । महामात्यश्रीअमुकाकः अमुकपथे अधि० अमुकाकं बोधयति यथा । बोद्धव्यमिदम् ॥ भवतां पार्श्वे निरूपिततंत्रराज० अमुकाकस्तत्रायातोऽस्ति । तथा दृष्टघोटस्य खादनमोदने दिनं प्रति देय द्र० ४ तथा दृष्टपदातीनां मासं प्रति जिनं प्रति सभोजनं द्र० ८ । सदैवावलोकनीया । अमीषां क्षूणादिकं वहिकायां ज्ञातव्यम् ॥ संवत् १२८८ वर्षे वैशाखशुदि ८ सोमे दूयक अमुकाकः । मतं श्रीः ॥

अश्वविक्रयपट्टको यथा—

A सं० ८०२ वैशाखशुदि ३ गुरावद्येह बला०श्रीनागराजपञ्चकुलं हेडाउनागडस्य अश्वविक्रयपट्टकं प्रयच्छति यथा । यत् व्य० अमुकपार्श्वात् हेडाउनागडेन क्रीतं श्रीषण्डघोड्ड १ मूल्ये द्रम्माः ५००० पञ्चसहस्रद्रम्मा घोटकस्यास्य दानसम्बन्धे दशबन्धे देय द्र० ५०० पञ्चाशतानि द्रम्माः श्रीकरणे प्रवेशिताः । देशमध्ये देशान्तरे प्रचलतो हेडाउनागडस्य केनापि कीदृश्यपि खञ्चा न कार्या । सं ८०२ ज्येष्ठशुदि १५ गुरौ । मतं श्रीः प्रमाणमिति ।

गुणाक्षराणि यथा—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

I A स्वस्ति। महामण्डपिकायां बला०श्रीअमुकपञ्चकुलं वाणि० मदनस्य गुणाक्षराणि प्रयच्छति यथा ॥ नागसारिकायां श्रीपत्तनोपरि वा० मदनेन क्रीतपूगनालिकेरमञ्जिष्ठाहरीतकीमरीचषण्डगुलवस्त्रभृतपोठीयाबलीवर्द्दानां पूर्वरीत्या रूढया च गृह्यमाणदानस्य पादोनं दानं ग्रहीष्यामः ॥ सार्थवाहकस्य कर्पटपदे प्रसादमुक्तौ बलीवर्द्दाः २० विंशतिपोठीयकाः । संवत् ८०२ वर्षे वैशाखशुदि ३ गुरौ मतं श्रीः । प्रमाणम् ।

II B स्वस्ति । महामण्डपिकायां बला०श्री अमुकपञ्चकुलं वाणि० अमुकाकस्य गुणाक्षराणि प्रयच्छति यथा ॥ श्रीपत्तनोपरि नागसारिकाया वाणि० अमुकाकेन पूगनालिकेरमञ्जिष्ठाश्रीखंडप्रभृतिबलीवर्द्दानां रूढ्या दीयमानदानस्य पादोनं दानं ग्रहीष्यामः ॥ सार्थवाहस्य बलीवर्द्दानां विंशतिः। संवत् १२८८ वर्षे वैशाख शुदि १५ सोमे मतं श्रीः ॥

टिप्पनकं यथा—

I A स्वस्ति। बाला० अमुकपञ्चकुलं अरलूआपथके श्रीवर्धमानपथकवास्तव्यव०चाहडस्य टिप्पणकं प्रपच्छति यथा । यत् श्रीपत्तनोपरि वाणि० चाहडेन भृतमुगमूडक १०० मूल्ये द्रम्मा १०००० दशसहस्राणि । द्म्माणां दानं तत्रैव ग्राह्यं, प्रतिटिप्पणकं समर्पणीयम्। सं० ८०२ ज्येष्ठशुदि १५ गुरौ । मतं श्रीः प्रमाणम् ।

II B स्वस्ति । अमुकपथके बला० अमुकादिपंचकुलं वाणि० अमुकाकस्य टिप्पनकं प्रयच्छति यथा ॥ श्रीपत्तनोपरि वाणि० अमुकाकेन भृतबलीवर्द्दमुद्गमूटक १०० शतमेकम् । दानं तत्रैव ग्राह्यं, प्रतिटिप्पनकं समर्प्पणीयमिति ॥ संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे मतं श्रीः ॥

अथ मार्गाक्षराणि यथा—

I A सं० ८०२ वैशाखशुदि ३ गुरौ अद्येह श्रीअमुकपञ्चकुलं पट्टकलिखितं प्रयच्छति यथा। यत् वाणि० पासडेन भृतगंत्री १ धाणा १० । सगुणनीदाने द्र० ४ चत्वारः । मतं श्रीः प्रमाणम् ।

II B संवत् १२८८ वर्षे वैशाख शुदि १५ सोमे अद्येह श्रीअमुकपथके महं अमुकादिपञ्चकुलं पट्टकं प्रयच्छति यथा ॥ वाणि० अमुकाकेन भृतबलीवर्द्द १० तिलभृतवाहन ४८ । सगुणीदाने द्र० ४ चत्वारः । श्रीः ॥

III C संवत् १५३३ वर्षे ज्येष्ठशुदि ८ भौमे मंडपिकानिबद्धमहं०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अमुकाकप्रभृतिपञ्चकुलं पट्टकं प्रयच्छति यथा। साह्अमुकाकसत्कवाह्ण ४ ठामि १० मंजिष्ठा भार १५ सूंकडि गांठि १० श्रीषंडभार १ ठामि ४ प्रवालां मण ५० मेथी २ । एवं सगुणदानात् प्रवेशद्र० १००० सहस्रमेकमेतत् ज्ञातम् ।

श्रीमहामात्यस्य भूर्जपत्रं यथा—

I A श्रीमहामात्यश्रीनागडस्यादेशात् पेटलाउद्रे अधि० महिपस्य लिख्यते यथा । यद्भवता निजव्यापारस्य त्रिपदलेख्यकानां दानाय दृष्टादेशप्रमाणेनात्रागन्तव्यम् । अस्मिन् सम्बन्धे प्रहितभट्टपुत्रस्य देय द्र० २ दिनं प्रति द्वौ द्रम्मास्तथा कणभक्तक ४ चत्वारि देयानि । ज्येष्ठशुदि १५ गुरौ । मतं श्रीः प्रमाणम् ।

II B श्रीमहंतकवचनात्पेटलापद्रे मह० अमुकस्य लिख्यते यथा ॥ लेखानां दानायात्रागन्तव्यम् । सम्बन्धे प्रहितभट्टपुत्रस्य दिनं प्रति देय द्र० २ कण भक्तक ४ । वैशाखशुदि १५ सोमे । मतं श्रीः ॥

मण्डलेश्वरभूर्जपत्रं यथा—

A स्वस्ति । श्रीअमुकमण्डलकरणात् महामण्डलेश्वरश्रीधारावर्षपादानामादेशात् अमुकग्रामे राज०जगडस्यादिश्यते यथा । यत् लभ्यराजकीयद्रम्माणां सम्बन्धे उद्ग्राहणाय प्रहितभट्टपुत्र ४ दिनं प्रति देयद्र० ४ चत्वारो द्रम्माः । एवं प्रतिदिनं द्र० १६ षोडश द्रम्माः । वैशाखवदि ३ गुरौ । इति लिखितं प्रमाणम् ।

न्यायवादो यथा—

A संवत् ८०२ वर्षे वैशाखशुदि ३ गुरावद्येह श्रीपत्तने यथासन्तिष्ठमानपूर्वलिखितराजावलीपूर्वं महामात्यविदितं धर्माधिकरणे न्यायपत्रमभिलिख्यते यथा । यत् केनाऽपि पिशुनेन परकीयां ऋद्धिमसहमानेन लोभाभिभूतेन वक्रकार्यकारणमलीकं चित्ते विमृश्य श्रीराजकुले गत्वा जल्पितं यदमुकाकस्य पत्नी स्वैरिणी सती विटेषु रमते साङ्गत्यं कुरुते इत्यादिक्षुद्रवचनैराक्रोशिता ब्राह्मणी धर्माधिकरणे गत्वा पण्डितानामग्रे विज्ञप्तिकां कृतवती यद्यहं स्वपतिं परित्यज्य मनसा वाचा कर्मणाऽपि परपुरुषमभिलषामि तदा मम कुलगृहमेव प्रमाणम् । इति भाषोत्तरमाकर्ण्य पण्डितैर्निर्णीतम् । दोषचक्षुःसाक्षी श्रोता च नास्तीति दिव्यं प्रमाणमिति प्रकटो न्यायः । प्रमाणं विना दण्डसाध्यो न भवति । इति न्यायवादः ।

प्रतिपृच्छा यथा—

B स्वस्ति । श्रीमहाकुलपादानां विज्ञप्तं यदक्षतमदौवारिकअमुकाकेन प्राघू-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

र्णकेन आनीतयुगाक्षेत्रजासुक्षेत्रकेषु (?) ३६ षट्त्रिंशत् । तदेतद्दीयपाहुडप्रमाणेन प्राघूर्णकं दीयते लग्नम् । सर्ववारं प्रभावितवस्तूनां पृच्छा क्रियते । संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे दूयके स्वयमादेशः ॥

ग्रामसंस्था यथा—

I A स्वस्ति । लाटापल्यां अधिकारिश्रीअमुकपञ्चकुलं पेटलाउद्रे समस्तविषयिकाणां समस्तग्रामेयकानां संस्थाक्षराणि प्रयच्छति यथा । यत् समस्तग्रामेषु समकरभूमिविशोपकं प्रति देय द्र० २४, तथा पोचिलभूमिविशोपकं प्रति देयद्र० २०, उद्धखिलभूमिविशोपकं प्रति देय० १६, तथा नव्यसमायातकुटुम्बिकैः उद्धखिलभूमिविशोपकं प्रति द्र०१० दश द्रम्माः नाडीयके द्र०३ त्रयो द्रम्माः महिषीगोचरे द्र०२ द्वौ, बलीवर्दगोचरे द्र०१ एकः, वल्होडीयाछालीगोचरे द्र० ०॥ द्रम्मार्धं, वहमानहलबलीवर्दानां गोचरो नहि । तथा चर्मचौरिकायां दण्डपदे द्र० २५ पञ्चविंशतिः, मस्तकस्फोटने द्र० ६ षड्, भागकर्षणे द्र० ५ पञ्च द्रम्माः, सकणकानां वारके १ एकः, आज्ञाभङ्गे द्र० ५ पञ्च द्रम्माः । अनया व्यवस्थया समग्रदेशीयग्रामा उद्ग्राहिताः । सं० ८०२ ज्येष्ठशुदि १५ गुरौ । मतं श्रीः प्रमाणम् ।

II B स्वस्ति । लाटापल्यां देशमध्ये समस्तग्रामेषु समकरनव्यवासितसमस्तकुटुम्बिकैर्वणिग्भिश्च वहमानसमकरभूमिविशोपकं प्रति दान्यां देय द्र० २४ तथा पोचिलउद्धविशोपकं प्रति द्र० २० उद्धखिलविशोपकं प्रति द्र०१६ तथा खिलविशोपकं प्रति द्र० १० तथा अणाडियकं प्रति द्र० ३ महिषीगोचरे द्र० २ बलीवर्दगोचरे द्र० २ वल्होडागोचरे द्र० ०॥ छालीगोचरे द्र० ०॥ वहमानबलीवर्दानां गोचरो नहि । तथा दण्डपदे मस्तकास्फोटने द्र० ६ षड्, भागकर्षणे ५ चर्मचौरिकायां द्र० २५ सकलाभारके द्र० १ आज्ञाभङ्गे द्र० ५ । अनया व्यवस्थया देशमुद्ग्राहयिष्यामि । मतं श्रीः ॥

धर्मचौरिका यथा—

I A संवत् १२८८ वर्षे वैशाख शुदि गुरावद्येह श्रीआशापल्यां राजधान्यां अधिष्ठित–द्वादशराजमण्डलीसमलङ्कृत–महाराजाधिराज–परमेश्वर–परमभट्टारक–श्रीउमापतिवरलब्धप्रौढप्रताप–संशोषितारातिवनगहन–निजभुजविक्रमेण रणाङ्गणनिर्जितशाकम्भरीभूपाल–श्रीमच्चौलुक्यान्वयनृपतिमूलराजकुलकमलिनीविकाशनैकमार्तण्ड–उदितोदितवंशपङ्क्तिमुक्तावलिनायकमणि–श-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रणागतवज्रपञ्जर–लडहलीलावतीस्तनकलशविलसनैकहार–प्रतिपन्नवाचाऽविचल–अशरणशरणद–प्रत्यर्थिक्षितिपालमौलिवलभीविन्यस्तपादाम्बुज–षट्त्रिंशद्दण्डायुधयोधविद्यानिपुण–वैरिपृष्ठिदानविमुख–सदाजयावदात–शक्तित्रयोपचितसमृद्धि–चतुरङ्गबलोपेत–गाम्भीर्यौदार्यविनयनयगुणप्रमुखगुणगुणालङ्कृतगात्र–देवद्विजगुरुपरिचर्यार्थं श्रद्धाभरबन्धुरचित्त–षट्त्रिंशद्राजकुलीमुकुटरूप–यजनाध्ययनदानरत–गङ्गोदकनिर्मल–आश्रितकल्पद्रुमप्राय–धर्मधौरेय–आधिव्याधिरहितकलेवर–शशाङ्कनिर्मलयशोव्याप्तदिगन्त–दूतचारनियोगैरनुदिनं परिज्ञातपरराष्ट्रस्वरूप–रूपेण निर्जिताश्विनीकुमार–स्वराष्ट्रोपचयप्रपञ्चनिपुण–यथास्थानं यथावसरं शमादिदण्डप्रयुञ्जनेऽतिकुशल–धीरोदात्तधीरललितगुणालङ्कृतविग्रह–परदारविमुख–अष्टमहासिद्धिसाधक–जगद्रक्षाजागरूक–अशेषविद्यापारग–व्यसनैरबाहित–प्रजारञ्जनतत्पर–सौभाग्यैकनिधान–विद्यावृद्धसङ्कुलसभातिलकायमान–द्विजजनपरिवृत–अभिनवरामार्जुनपराक्रम–क्षमया धरित्रीरूप–सत्येन युधिष्ठिरप्रतिम–स्थानभ्रष्टावनीशस्थापनाचार्य–रावणवद्दृढाहङ्कार–सागरवदगाधगाम्भीर्य–सत्सङ्गतितत्पर–श्रीमल्लक्ष्मीकान्तप्रणतिपर–श्रीसोमेश्वरपादपद्मयुगलध्यानैकनिष्ठ–दुष्टरिपुनिग्रहग–(विनिर्जित)मालवाधीशबलिबल्लाल–राजराजेन्द्रश्रीमत्कुमारपालकल्याणविजयराज्ये एतस्मात् परमस्वामिनः प्रसादावाप्तामात्यपदमहामात्यश्रीजगदेवे श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपन्थयति सतीत्येवं काले प्रवर्तमाने इहैव खेटकाधारमण्डलान्तश्चतुरुत्तरचतुरासिकायां अद्येह पेटलाउद्रे मह०भाभूप्रभृतिपञ्चकुलप्रतिपत्तौ तेषां प्रत्यक्षं धर्माधिकरणविदितं पञ्चमुखनगरे चातुर्वर्ण्यलोकमहाजनसमक्षं श्रीमज्जगतः स्वामिनः पुरतः अमुकाकः राजादिष्टेन शिर उपस्थापयति । अमुकदिव्यग्राही स्वीयसत्यादिप्रतिज्ञया इत्यादि चेष्टयति यन्मया अमुकाको अपराधो न कारापितः । यद्यहमपराधमिमं करोमि कारापयामि तदा सप्तविधि–एकादशप्रसृतीनां मध्यादेकया सम्बध्यमानो भवामि । यदस्मिन् क्रियमाणे अमुकदिव्ये शुद्धिं न प्राप्नुयां ततो मे अपराधो भूयात् । अथ चेत्केनापि द्विजिह्वरूपिणा पिशुनेन राजपुरुषाणामलीकदोष उत्पादिते कृतैकदिव्येन शुद्ध्यामि ततः पिशुनो राजनिग्राह्यः । अहं सभासदां विदितं पञ्चमुखनगरप्रत्यक्षं चन्द्रविशदो भवामि । तदिहार्थे इहावतरन्तु सत्यानृतसाक्षिणो दिक्पाला लोकपालाश्च साक्षिप्रतिभूताः ।

पुरा चोक्तं ऋषिभिः—

एह्येहि भगवन् धर्म ! अस्मिन् दिव्ये समाविश ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मो विजानाति नरस्य वृत्तम् ।
धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ।
क्षमा जयति न क्रोधो विष्णुर्जयति नासुराः ॥
धर्मो बन्धुर्मनुष्याणां धर्मो मण्डनमुज्ज्वलम् ।
अविनाशपरो धर्मः धर्मः सर्वत्र रक्षकः ॥
धर्म एव परो बन्धुर्धर्म एव परं धनम् ।
धर्म एव सहायश्च धर्मो रक्षति रक्षति ॥
यत्सत्यं त्रिषु लोकेषु इन्द्रे वैश्रवणे यमे ।
ब्रह्मवादिषु यत्सत्यं तत्सत्यमिह दृश्यताम् ॥
सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वायवो वान्ति सर्वं सत्ये प्रतिष्ठति ॥
एकपादस्थिते धर्मे सत्ये च प्रलयं गते ।
विपरीतगते लोके यतो धर्मस्ततो जयः ॥
यश्चक्षुः सर्वजगतां साक्षी लोकीयकर्मणाम् ।
आदित्याय नमस्तस्मै जगदानन्दहेतवे ॥
ब्रूहि साक्षिन् ! यद्वृत्तं लम्बन्ति पितरस्तव ।
तव वाक्यावसानेन पतन्ति न पतन्ति च ॥
अक्षरा मुनिभिः प्रोक्ता न पतन्ति कदाचन ।
अक्षरैर्विद्यमानैस्तु न दिव्यं न तु साक्षिणः ॥
विवादेऽन्विष्यते पत्रं तदभावे तु साक्षिणः ।
साक्ष्यभावे ततो दिव्यं प्रवदन्ति मनीषिणः ॥
धर्मशास्त्रार्थकुशलाः कुलीनाः सत्यवादिनः ।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः ।
आचतुर्दशयामान्तं यस्य नो राजदैवकम् ।
व्यसनं वा भवेन्मृत्युः तस्य शुद्धिं विनिर्दिशेत् ॥

पञ्चालबलारभूमिसंस्थाविधिर्यथा—

सं० १४०७ वर्षे माण्डलिकरणे राणाश्रीरिणमल्लदेवः पञ्चालदेशीयसमस्तग्रामेषु वासेलकुटुंबिकानां गुणपत्रं प्रयच्छति यथा । यत् समकरऊधडीया

झुंपडीयाकुलैः यदृच्छया ग्रामेषु वासनीयम्। वहिकायां स्वीयस्वीयलिखितप्रमाणेन दानीद्रम्माः श्रीराजकुले प्रवेशनीयाः ॥ अर्द्धा द्रम्मा दीपोत्सवे अर्द्धा राजोत्सवे देयाः । देयाचारः समग्रोऽपि देशरीत्या निर्वहणीयः । कुटुम्बिकैः खेडिबलारभूम्यां निष्पन्नकणानां भागद्वयं श्रीराणकुले प्रवेशनीयम् ॥ भागैकः कुटुम्बिकैः ग्राह्यः । एवंपरिणा बलारखिलभूमिकर्षणे निष्पन्नकणा विभज्य ग्राह्याः ॥ वहिकायां लिखितनिबन्धभूमी कुटुम्बिकैः समग्रापि खेडनीया वापनीया पातनीया नहि । पतितभूमी-आयपदं कुटुम्बिकानां विभागमध्यात् वलिष्यति । व्रीहिचिणागोधूमजवलाटबीजानि वृद्धानि मेढिमध्याद्वालनीयानि । अपराणि समग्रबीजानि कुटुम्बिकैः कर्तव्यानि । चारिः समग्रापि कुटुम्बिकैः ग्राह्या । समस्तकुटुम्बिकैः मेढिहारको राजकुले मेढिमध्याद्देयः । सूत्रधारलोहकारकुंभकारप्रभृतिपंचकारूअकानां बाचकानि खलके दातव्यानि ॥ राजकीखलकीविदियाविहितं सूत्रधारस्य हलं प्रति कणकः मेळ्यां दातव्यः । समस्तकणकानां माषकं मूडाकं प्रति पूंजीपदे कणसेर १ देयः । तथा पञ्चकुलमहाखलरक्षकाणां तलके मुक्तकणानां मध्यात् सूषडी देया । तथा राजविभागायातकणाः समग्रा अपि श्रीराजकीयकोष्ठागारे प्रविष्टाः कुटुम्बकैः कार्याः । देवदायीब्रह्मदायीकप्रसादसाचित्तप्रभृतीनां भूमी कुटुम्बिकैः अग्रकैर्न खेडनीया। तथा कुटुम्बिकैः कणा न चोरणीयाः । सत्यस्वभावेन कणा विभज्याः । अथ कदाचित् कुटुम्बिकाश्चोरितकणैः प्राप्यन्ते ततः कणानां माणकैकं यावत् क्षूणं नहि ॥ एकवारकं तस्य पृष्ठे हस्तः । यदा द्वितीयवारं चोरितकणैः कुटुम्बिकः प्राप्यते तस्य कुटुम्बिकस्य सीरे निष्पन्नकणा राजकुले यान्ति । इहार्थे रक्षपालेन रावा न श्रोतव्या । तथा स कुटुम्बिको ग्रामादुद्वासनीयः । अन्यत्र प्रणश्यगतकुटुम्बिकस्य क्षेत्रखलककणधनढोरप्रभृति सर्वं राजकुले स्वाधीनं कर्तव्यम्। गुणपत्रप्रमाणेन रक्षकेण कुटुम्बिका रक्षणीयाः । यदा चत्वारः कुटुम्बिका गुणपत्रं गृहीत्वा आगच्छन्ति तदा रक्षकेण रावा श्रोतव्या । अन्यथा जनैकस्य मुखेन रावा न श्रोतव्या ॥ इति समस्तपञ्चालदेशीयकुलानां गुणपत्रविधिः ॥

आधौ कृतवस्तूनामुपरि गृहीतद्रव्यपत्रविधिः—

A संवत् १२८८ वैशाखशु० १५ गुरावद्येह श्रीपत्तने यथासन्तिष्ठमानराजावलीपूर्वं आधौकृतवस्तूनामुपरि गृहीतोद्धारद्रम्माणां पत्रं लिख्यते यथा ॥ यत् इहैववास्तव्यप्राग्वाटज्ञातीय व्य० चाहडपार्श्वात् संखारीग्रामीय पट० मालाकेन आधौकृतमहीषी८ बलीवर्द १६ गौ ५० फिक्र २ एतद्वस्तूनि आधौ दत्त्वा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहरमाणजीर्णविश्वमल्लप्रियद्र० २४०४ चतुरधिकचतुर्विंशतिशतानि द्रम्मा गृहीताः । व्याजेन मासं शतं प्रति२ चटन्ति । एते द्रम्माः सां० दीपोत्सवे निर्विवादाः कलिकाकलिरहिताः अष्टप्रहरे ऽर्थधारिणकेन व्यवहारकस्य देशान्तरगतस्यापि एकमुष्ट्या प्रवेशनीयाः । यदि व्यवहारको ग्रामे न भवति ततो धारिणकेन एकधनस्य तद्भ्रातुः तत्सुतस्य वा गृहोदुम्बरमध्ये समानीय द्रम्माः प्रवेशनीयाः । अथ चेद्दायकग्राहकयोर्मध्ये दैववशतः एको म्रियते नश्यति कस्यापि दैवविहितं किमप्यनिष्टं दुर्निमित्तमुत्पद्यते, ततस्तयोः पुत्रपौत्रैरपि द्रम्माः पत्रप्रमाणेन देयाः । जल्पितदिनैः यदा धारणिक एकमुष्ट्या सव्याजकान् द्रम्मान् व्यवहारकाय न ददाति एकमुष्ट्या समग्रद्रम्मान् न प्रवेशयति तदा कियद्भिः प्रवेशितद्रम्मैर्लिखितपत्रविधिना अपूर्यमाणथाकमानद्रम्मा व्यवहारकेण आधौ मुक्तउपरिलिखितवस्तूनि शाकपणिकान्यायेन धारणिकप्रतिभुवां विदितं विक्रीय द्रम्मा ग्रहीतव्याः । कदापि मुक्ताधिवस्तुभिरपि पत्राङ्किताः सव्याजकाः सोपक्षया द्रम्मा न पूर्यंते तदनु प्रतिभूभिः अन्यव्यवहारकात् व्याजेनाकर्ष्य अथवा स्वगृहादात्मीयं वस्तु विक्रीय व्यवहारकस्य सव्याजकाः द्रम्मा दातव्याः । धारणिकेन प्रतिभूभिश्च व्यवहारकसमं वादविवादो राजकुले न कार्यः । जातविवादे संजातोपक्षयो हीनवादिभिः सर्वोऽपि सहनीयः । अथ मुक्ताधिवस्तूनां मध्यात् कस्यापि वस्तुनो दैवायत्तं दुर्निमित्तमनिष्टं किञ्चिदपि जायते, अग्निदाहेन चौराद्युपद्रवेन अतिजलपातेन विनाशः स्यात् , ततोऽपि धारणिकप्रतिभुवो व्यवहारकस्य पत्रप्रमाणेन समस्तसोपक्षयव्याजकद्रम्मैः प्रविष्टैः उच्छृंखलाः जायन्ते । इहार्थे विनष्टाधिसक्तकरकचकन्दलं व्यवहारकसमं न कार्यम् । अथ कदापि व्यवहारकस्य उत्पन्नस्वीयगृहकार्यवशात् द्रम्मैः हस्तप्राप्तैः प्रयोजनं जायते, ततो व्यवहारकेण धारणिकप्रतिभुव आक्रम्य भट्टपुत्रानुपवेश्य सव्याजद्रम्मा ग्राह्याः । इहार्थे विहितभट्टपुत्राणां य उपक्षयो व्रजति स समग्रोपि धारणिकप्रतिभूभिश्च सर्वोऽपि निर्वहणीयः । अस्योपरिलिखितविधेः पालनाय सव्याजकसोपक्षयद्रम्माणां लिखितपत्रविधिप्रमाणेन दापनाय आधौ मुक्तवस्तूनां योगक्षेमनिर्वहणाय अपरसमस्तग्राहकाचारेण स्वयं ग्रहीतारौ इव प्रतिभुवौ व्यवहारकसमं समग्रनिर्वाहं कुरुतः । यथा बहवः प्रतिभुवो भवन्ति तथा एकेन सर्वे सर्वैरपि एकः सङ्कलिता एव निर्वाहं कुर्वन्ति । धुरप्रतिभुवोरन्तरं नावगन्तव्यम् । प्राप्तेनैकेनापरेषामुत्तरमकुर्वतां व्यवहारकसमं लिखितपत्रविधिद्रम्माणां सव्याजकानां सोपक्षयानां धनिकवत् समग्रनिर्वाहो विधातव्यः । प्रतिभूभिरात्मानं धा-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रणिकं भणित्वा मनसि कल्पनीयम् । अत्रार्थे रावां परित्यज्य प्रतिभुवामाचारं केवलं च विधाय आधिपालकप्रतिभूभिर्व्यवहारकस्य पत्रप्रमाणेन सोपक्षयसव्याजकद्रम्माणां निर्गमः कार्यः । इहार्थे अमुकामुकग्रामीयअमुकामुकज्ञातीयअमुकामुकनामानश्चत्वार आधिपालाः । तेषां स्वहस्तेन दत्तमतानि ॥ तथा धारणिकस्वहस्तेन प्रदत्तमतम् । तथा अधिवाससत्कीया अमुकज्ञातीया अमुकनामानश्च पञ्च साक्षिणश्च । लिखितमिदं पत्रं उभयाऽभ्यर्थितेन पारश्रीजयताकेन । हीनाक्षरमधिकाक्षरं च पत्रं प्रमाणमिति ॥

वृद्धिधान्याक्षराणि—

A संवत् १२८८ वैषाख शुदि १५ गुरावद्येह श्रीपत्तने यथासन्तिष्ठमानराजावलीपूर्वं समृद्धिधान्यपत्रमभिलिख्यते यथा । धनिको नाम नामतः इहैव वास्तव्यश्रीमालज्ञातीयवाणि० पाताको लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्ताद्धारणिको नाम नामतः संखारीग्रामीयनागरज्ञातीय वा० पद्मासुत वा० महिपाको गोधूममाणि २० विंशतिः अङ्कतोऽप्युद्धारे गृह्णाति । तदेते गोधूमाः सपादिकाः वर्द्धमाना खलकान्ते सञ्जातधान्यराशेर्वातोपनीतमृत्तिकाचिबडारहिता अक्षता रजोहीना ज्येष्ठीपूर्णिमां निरुद्ध्य अयाचिताः कलिकालवलिकउचटरहिता निर्विवादा राजभागादत्तानन्तरं तत्कालमेव खलकादथ गृहायाताः प्रथमज्येष्ठपूर्णिमादिसक्तीया भव्या निजशकटे कृत्वा वृद्धिसमं व्यवहारकपातागृहे यथागृहीतप्राप्येन वा०महिपाकेनानीय प्रवेशनीयाः । यदि सां० ज्येष्ठान्तादर्वाक् सवृद्धिगोधूमान् वा० महिपाको न प्रवेशयति तदा धान्याचारेण देशाचारेण च भव्यानां गोधूमानां वर्तमानमूल्यद्रम्मान् ददाति महिपाकः ॥ इहार्थे लिखितसमस्तपत्रविधिनिर्वाहणाय अमुकग्रामीयअमुकज्ञातीयअमुकनामानौ द्वौ दावापितप्रतिभुवौ । एकेन द्वौ द्वाभ्यामेकः । एकेन हस्तप्राप्तेन द्वितीयेन उत्तरमकुर्वता धारणिकवत् लिखितपत्रार्थः समग्रोऽपि व्यवहारकसमं निर्वाहयितव्यः इहार्थे धारणिकप्रतिभुवोः स्वहस्तेन समीपस्थअमुकामुकमुख्यसाक्षिपञ्चकविदितं प्रदत्तमतानि । उभयाभ्यर्थनेन लिखितमिदं पत्रं पारश्रीजयताकेन । हीनाक्षरमधिकाक्षरं वा प्रमाणम् ।

दिव्यं यथा—

फालं कोशो धटश्चैव घटसर्पो जलं तथा ।
षष्ठं च तन्दुलैर्दिव्यं सप्तमस्तप्तमाषकः ॥
फालदिव्यं महारौद्रं प्रक्षिप्तं च करांजलौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दहस्वैनं च पापिष्ठमपापे शीतलं भव ॥
त्वमग्ने ! सर्वभूतानामन्तश्चरसि नित्यशः ।
साक्षिवत् पुण्यपापानां ब्रूहि सत्यं च पावक ! ॥
इति फालाधिवासना ।
त्वं तोय ! प्राणिनां प्राणाः सृष्टेरादौ विनिर्मिताः ।
शुद्धं धारय मामग्ने अशुद्धं चेत्प्रकाशय ॥
इति कोषाधिवासना ।
त्वं तुले सत्यवक्तासि पुरा देवैर्विनिर्मिता ।
यत्सत्यं वद कल्याणि ! संशयान् मां विमोचय ।
शुद्धोऽहं चेदधो गच्छ अशुद्धश्चेदूर्ध्वगा भव ॥
इति तुलाधिवासना ।
वासुकेः कुलसंभूत भगवन् उरग ! संशृणु ।
शुद्धस्य पुष्पमालेवाशुद्धश्चेदन्तको भव ॥
इति घटसर्पाधिवासना ।
धर्मपापावलोकाय गोलकौ जलमाश्रितौ ।
अशुद्धस्य चटेत् रूप्यः शुद्धस्य हेमजश्चटेत् ॥
इति गोलकजलाधिवासना ।
तन्दुला सिद्धशंखाभा वक्त्रात् सत्यप्रभावतः ।
महिषीक्षीरसंकाशा जायन्ते शुद्धचेतसः ॥
चर्विता रक्तसंकाशा जायन्तेऽशुद्धचेतसः ।
इति तन्दुलाधिवासना ।
परं पवित्रममृतं घृतं त्वं यज्ञकर्मणि ।
परं सुराणामाहारः परं पावनमुच्यसे ।
त्वमग्ने ! सर्वभूतानामन्तश्चरसि पावक ! ।
दह त्वं पापकर्माणः शुद्धानां शीतलो भव ।
इति तप्तमाषाधिवासना ।
दिव्यं सप्तविधं प्रोक्तं यथायोग्यतया बुधैः ।
दिव्याधिवासना पूर्वं कर्तव्या देवसन्निधौ ।
एतानि सप्त दिव्यानि यथा प्रोक्तानि भूतले ।
क्रमेणैतानि सर्वाणि मया चोक्तानि धीमताम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तुलायां नाधमो योज्यः स्त्रीणां फालं विवर्जयेत् ।
न कोशं श्लेश्मले देयं तप्तमाषश्च कुष्ठिनः ।
विषं च सर्वतो वर्ज्यं सद्यःप्राणहरं च यत् ।
कुष्ठिते वह्निजं नास्ति एतद्दिव्यस्य लक्षणम् ।
न बालानां नातिवृद्धानां न स्त्रीणां दिव्यमर्हति ।
षण्ढानां च न दातव्यं व्याधितानां विशेषतः ।
जयश्च क्वाप्यशुद्धानां शुद्धानां च पराभवः
दिव्यं देयं परं भाव्यं दिव्या दिव्यगतिर्भवेत् ।

डोहलिकामुक्तिर्यथा—

I A संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह श्रीमदणहिल्लपाटके यथासन्तिष्ठमानराजावलीपूर्वं धर्माधिकरणे श्रीमहामात्यआलिगविदितं डोहलिकाभूमीमुक्तिपत्रिका लिख्यते यथा । यत् मोढेरामहास्थानस्थदुवेबलाइतेन श्रीधर्माधिकरणे उपविश्य पण्डितानामग्रे चिरन्तनलोकानां प्रदत्तसाक्षिवादेन श्रीकरणविदितं स्वकीयां भूमिं निःसन्देहां विधाय डोहलिकाभूमेः व्याषेधः कारितः । अत ऊर्द्धमस्य विप्रस्य वहमानभूमेः केनाऽपि राजवर्गीयमानुषेण प्रतिबन्धो न कार्य इति । मतं श्रीः प्रमाणम् ।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह श्रीमदणहिल्लपाटके महाराजाधिराजश्रीभीमदेवाधिष्ठितधर्माधिकरणीयदेवताः श्रीश्रीकरणादिमहामात्यश्रीअमुकनिमित्तं द्विवेदब्राह्मणअमुकाकस्य डोहलिकायां पत्रिकां प्रयच्छन्ति । अमुकग्रामीयब्राह्मणअमुकाकस्य श्रीधर्माधिकरणे उपविश्य धर्माधिकरणीयपण्डितानामग्रे चिरन्तनलोकैः प्रदत्तसाक्षिवादे श्रीकरणविदितं स्वकीयां भूमिं कृत्वा लुप्तडोहलिकाया व्याषेधः कारितः । अत ऊर्द्ध्वमस्य ब्राह्मणस्य वहमानभूमिव्याषेधः केनापि न कार्य इति । मतं श्रीः ॥

व्याषेधो यथा—

I A स्वस्ति । श्रीमहामात्यश्रीआलिगवचनात् सुहुडासापथकेऽधि० विक्रमसिंहो बोधयति यथा । बोद्धव्यमिदम् ॥ यत्तत्र स्वपथके समस्तप्रसादसाचित्तग्रामेषु व्याषेधः कार्यः । संवत् १२८८ वर्षे वैशाखशुदि १५ गुरौ । मतं श्रीः

II B स्वस्ति । महं०श्रीश्रीकरणादेशात् अमुकग्रामे राजकीयनिबद्धराजपुत्राणां लिख्यते यथा । यत् श्रीराजादेशात् राणावीरमदेवस्य ग्रामेषु व्याषेधः सञ्जातोऽस्ति । तस्य दानीभोगादि सर्वं यथा पूर्वरीत्या ग्रहणाय दत्तम् । भवद्भिर्नि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जभागं गृहीत्वा उत्थाय गन्तव्यम् । खश्चा काऽपि कार्या । संवत् १२८८ वर्षे वैशाखशुदि १५ गुरौ । मतं श्रीः प्रमाणमिति ।

III B स्वस्ति । श्रीमहामात्यश्रीअमुकाकवचनादमुकपथकेऽधि० अमुकाकं बोधयति यथा । बोद्धव्यमिदम् । यत्त्वया स्वपथके स्वप्रसादग्रामेषु व्याषेधः कार्यः । संवत् १२८८ वर्षे वैशाख शुदि १५ सोमे । मतं श्रीः ॥

अथवा व्याषेधो यथा—

I A महामात्यश्रीआलिगवचनात् अरल्लूआपथके अधि० नागडं बोधयति यथा ॥ बोद्धव्यमिदम् । यदसिदण्डप्रहारेषु राणो नागो न संप्राप्तः । अथ राजादेशेन एतस्य ग्रामो व्याषेधनीयः । संवत् १२८८ वैशाखशुदि १५ ।

II B स्वस्ति । महामात्यश्रीअमुकाकवचनादमुकपथके अधि० अमुकाकं बोधयति यथा । बोद्धव्यमिदम् । परमारराज०अमुकाकः श्रीमद्विजयकटके न प्रविष्टः । अतो राजादेशेन एतदीयग्रामो व्याषेधनीयः इति । मतं श्रीः ॥

ग्रासलोपनं यथा—

I A स्वस्ति । श्रीमहामात्यश्रीआलिगवचनात् दण्डाहीपथके विजयसिंहं बोधयति यथा । अमुकयुद्धे राजा नागपालो नायातः । प्रणश्य ययौ । तदस्य ग्रामाः सज्ञात्यां कर्त्तव्याः । समस्तग्रामेष्वायपदग्रहणार्थं स्वीयमानुषाः नियोजनीयाः ॥ संवत् १२८८ वर्षे वैशाखशुदि १५ गुरौ । मतं श्रीः प्रमाणम् ।

II B स्वस्ति । श्रीमहामात्यश्रीअमुकाकवचनादधि० अमुकाकं बोधयति यथा ॥ अमुकराज्ञा सह युद्धे सज्ञायमाने राजा अमुकाको नष्टः । ततः स्वराजादेशेन एतदीयग्रामा राजसज्ञात्यां कर्तव्याः । सर्वग्रामेष्वात्मीयमानुषाः प्रस्थापनीयाः ॥ संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे । मतं श्रीः ॥

विशुद्ध्यक्षराणि यथा—

I A संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमत्पत्तने महामात्यश्रीआलिगः पट्ट० अरडकस्य विशुद्ध्यक्षराणि प्रयच्छति यथा ॥ पट्ट० अरडकेन समस्तग्रामपट्टकेषु श्रावणाद्यं आषाढीनिरुद्धं पट्टकद्रम्मास्तथा मलमार्गणकमाङ्गलीयकचतुरकपतितादिसमस्तपदेषु पदकविशुद्ध्या देशरीत्या द्रम्माः प्रवेशिताः श्रीकरणे उपगताः । मतं श्रीः प्रमाणम् ॥

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमत्पत्तने महामात्यश्रीअमुकाकः पट्ट० अमुकाकस्य विशुद्ध्यक्षराणि प्रयच्छति यथा ॥ पट्ट०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अमुकाकेन समस्तपट्टकपदेषु श्रावण्याद्यं आषाढनिरुद्धं समस्तपट्टकद्रम्माश्चतुरकपतितमलमार्गणादिसमं विशुद्धाः सप्रतिष्ठाः प्रवेशिता इति। मतं श्रीः ॥

उपगता यथा—

I A संवत् १२८८ वर्षे वैशाखशुदि १५ गुरावद्येह श्रीपत्तने महामात्यश्रीआलिगपञ्चकुलं अधि० वीजडस्य उपगतां प्रयच्छति यथा। अधि० वीजडेन भण्डारीनरसिंहस्य पोतके प्रवेशितद्रम्माः ५००० पञ्चसहस्रम्। मतं श्रीः।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमत्पत्तने महामात्यअमुकाको अधि० अमुकाकस्य प्रयच्छत्युपगतां यथा। अधि० अमुकाकेनामुकपोत्तकेसंप्रवेशित द्र० ५००० पञ्चसहस्राणि। हस्त० भां० अमुकाकमतं। श्रीः ॥

मण्डलकरणस्य उपगता यथा—

A सं० १३६६ वर्षे वैशाख शुदि ३ गुरावद्येह मण्डलकरणे सीतापुरग्रामीयसंघवीहीराकस्य उपगतां प्रयच्छति यथा। यत् ग्रामस्यास्य पट्टकसम्बन्धे भण्डारीमेधाकस्य संघवीहीराकेन प्रवेशित रौक्यद्र ४००० चत्वारि सहस्राणि द्रम्माः प्रवेशिताः ॥ साभिज्ञानं भण्डारीमतं श्रीकरणाभिज्ञानं च प्रमाणम् ॥

कण-उपगता यथा—

C संवत् १५३३ वर्षे ज्येष्ठशुदि ८ भौमे अद्येह अमुककोष्ठागारे महं० अमुकाकप्रभृति पञ्चकुलं उपगतां प्रयच्छति यथा। अमुकग्रामखलिकाक्रीती अमुकाकः महं० अमुकाकप्रभृतिपञ्चकुलेन प्रवेशित अमुकमापेन चणा मूडा ४० चत्वारिंशत् चणासत्कमूटकाः प्रवेशिताः। मतम् ॥

ठेको यथा—

I A स्वस्ति। महामात्यश्रीआलिगवचनात् माण्डलिकपथकेऽधि० खेतसिंहं बोधयति यथा। बोद्धव्यमिदम्। महामण्डलेश्वरराणावीरमदेवग्रामेषु व्याषेधः कार्यः। विकरे द्र० १६, लिगा द्र० ६, धूपा द्र० १४, दर्शने द्र० ८, एवं द्र० ४४। स्वस्ति संवत् १२८८ वर्षे वैशाखशुदि १५ गुरौ। मतं। श्रीः प्रमाणम् ॥

II B स्वस्ति। महामात्यश्रीअमुकाकवचनादमुकपथकेऽधि० अमुकाकं बोधयति यथा। बोद्धव्यमिदम्। महामात्यश्रीअमुकाकस्य महामण्डलेश्वरराजअमुकाकस्य ग्रामेषु व्याषेधः कार्यः। विकरे द्र० १६ लिङ्गा द्र० ६ धूपा द्र०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

१४ दर्शने द्र० ८ एवं द्र० ४४ । स्वस्ति । संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे मतं । श्रीः ॥

सन्धिविग्रहौ यथा—

I A स्वस्ति । श्रीमुहुडासानिवासितश्रीमद्विजयकटकात् राउलश्रीवाघपादानामादेशात् अणघुरे राणाश्रीजयताकस्य सान्धिविग्रहिकं सादरं बोधयति यथा । बोद्धव्यमिदम् । श्रेयोऽत्र श्रीमदस्माकं सौराज्ये अवबुध्य स्वचित्ते परमप्रमोदं विचिन्त्य निजनाथकल्याणवतीभिः किंवदन्तीभिः श्रीवयमजस्रमानन्दनीयाः । कार्यं च । यत् श्रीमदस्माकं महाराष्ट्रीयदण्डाधिपतिना सह विग्रहः सञ्जातोऽस्ति । अतः साधनसहस्त्रैकं नीत्वा श्रीअस्माकं प्रतीकारग्रहे समग्रजयनशालासामग्रीसहितं सत्वरं प्रहेयम् । यथा प्रहितवाचिकार्थो निजस्वामिनो हृदयङ्गमः कार्यः । संवत् १३९९ ज्येष्ठशुदि १५ गुरौ । दू० श्रीस्वयमादेशः ।

II B स्वस्त्यमुकस्थाने समवस्थितश्रीमद्विजयकटकात् महामण्डलेश्वरराणकअमुकाकसत्कसान्धिविग्रहिकं बोधयति यथा । बोद्धव्यमिदम् । कुशलमत्रास्माकमिति स्वमनसि प्रमोदं विधाय विजयकाय विग्रहः समुत्पन्नोऽस्ति इति मत्वा साधनसहस्रमेकं प्रतिग्रहे मुत्कलनीयम् । कार्यादिकं सदैव विज्ञाप्यमित्ययमर्थः स्वप्रभोर्हृदयङ्गमः कार्य इति । संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे । दूयके स्वयमादेशः ।

लिखितं यथा—

B स्वस्त्यमुकस्थानाद्राज० अमुकाको अमुकस्थाने भ्रातृअमुकाकं सादरं सोत्कण्ठं गाढमालिङ्ग्य कुशलं वार्त्तयति यथा । कुशलमत्रेति स्वमनसि प्रमोदमाधाय तत्रत्यकुशलवती किंवदन्त्यनुदिनं प्रहेया । कार्यादिकं सदैव समाख्याप्यमिति ।

लेखो यथा—

I B स्वस्ति । लाटापल्ल्यां महं० अमुकाकोऽमुकग्रामेऽमुकं समादिशति यथा । आदेष्टव्यमिदम् । तस्मिन् ग्रामे मिलितपोत्तकद्रम्माः सर्वेऽत्र प्रविष्टाः कार्याः । कार्यादिकं सदैव विज्ञाप्यमिति । मतं श्रीः ॥

II A स्वस्ति । श्रीचाडातः राणाश्रीरासिलपादानामादेशात् ओडाग्रामे प्रती० रासिलस्य सप्रसादं समादिश्यते यथा । आदेष्टव्यमदः । यत् दृष्टादेशेन

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वीयविलहृणासक्तघोटमानुषान् नीत्वा समग्रजयनशालासमं आतरसुम्बके राजश्रीजयतर्णमेलापके चाडायां समागन्तव्यम् । श्रीवयमपि बहुमेलापकं विधाय प्रभाते राजश्रीजयतकर्णचाडायां प्रचलिष्यामः । सं० १३६५ वैशाखशुदि १५ गुरौ । श्रीस्वयमादेशः प्रमाणम् ।

वधूहेतो राजलेखः—

स्वस्ति । मुहुडासानगरात् राउश्रीवाघदेवः अणघुरे कुमारश्रीनरसिंहदेवपत्नीं चन्द्राउलीनाम्नीं सप्रसादं सस्नेहं समादिशति यथा । आदेष्टव्यमिदम् । यावत् कुमारनरसिंहः श्रीकटकात् समेति तावत्समस्तपरिग्रहस्य महं० जयतापार्श्वात् कणभक्तकानि दृष्टप्रत्ययानि दावाप्यानि कोष्ठागारात् । तथा राजवर्गीयदासीदीकोलाकर्मकरप्रभृतीनां यथापूर्वमादिष्टा भूजाई (?) काराप्या । पोष्यवर्गस्य भोजनाच्छादनादिचिन्ता सर्वेषां वरा कार्या । अन्यच यात्रोत्सवे श्रीराजकुलात् क्वापि बाह्ये न गन्तव्यम् । परपुरुषदर्शनं परगृहगमनं च नैव विधातव्यम् । विशेषोत्पन्नराजकार्यं सदैव श्रीअस्माकं विज्ञापयितव्यम् । संवत् १४३२ वैशाखशु० १५ गुरौ । श्रीस्वयमादेशः प्रमाणम् ।

स्वरूपविधिः—

स्वस्ति । श्रीपत्तनात् महं० जयताकः श्रीघोघावेलाकूले परमसुहृदं महं० विजयसिंहं परमप्रीतिपरेण सोत्कण्ठं गाढमालिङ्ग्य सप्रश्रयं वार्तयति यथा । वार्तव्यमिदम् । कुशलमिह स्वीयसमस्तकुटुम्बेष्वगम्य भवता निजकुटुम्बारोग्यतया तथा यथास्थित्या स्वीयव्यापारस्थितस्वरूपेण च निरन्तरमहमानन्दनीयः । कार्यं च यत्साम्प्रतीनसमायातद्रुमजीवाहने कीदृशी वस्तु तथा तेजी घोटकाश्च कियन्तः समायाताः तत्स्वरूपं सुव्यक्तं लिखित्वा प्रहेयम् । तथा मदधिकृतं कार्यं सदैव सन्देशनीयम् । माघशुदि १५ गुरौ ।

श्रीराजविज्ञप्तिका यथा—

A स्वस्ति । श्रीमदुज्जयिन्यां समवस्थितश्रीमद्विजयकटके पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयान्, उमापतिवरलब्धप्रौढप्रतापसंशोषितारातिवनदहनान्, दुर्दान्तवैरिमदमर्दनचण्डशक्तीन्, प्रचण्डशात्रवराज्यलक्ष्मीस्वयंवरान्, सदोदितप्रतापान्, वैरिनिवहदुर्निरीक्षान्, प्रत्यर्थिक्षितिपालमौलिवलभीविन्यस्तपादाम्बुजान्, रिपुमण्डलीनिर्दहने भीमभयङ्करान्, षट्त्रिंशद्दण्डायुधादियोधविद्यानिपुणान्, अरिभूपगजघटानिर्दलने सिंहप्रायान्, वैरिपृष्ठदानवि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुखान्, सदाजयश्रीरक्षणरतान्, परिपन्थिपूगनिषूदनपटिष्ठान्, अशरणशरणान्, भयचकितप्राणिगणाभयदान्, शक्तित्रयोपचितान्, षाड्गुण्यप्रयोजनातिनिपुणान्, सिद्धित्रयोपगतान्, उदयत्रयभूषितकलेवरान्, त्रिवर्गपोषकान्, राजनीतिकोविदान्, समृद्धचतुरङ्गबलोपेतान्, महावीर्यान्, अष्टमहासिद्धिसाधकान्, शरणागतवज्रपञ्जरान्, भूभारोद्धरणकूर्मरूपान्, जगद्रक्षाजागरूकान्, गांभीर्यौदार्यधैर्यविनयनयप्रमुखगुणालङ्कृतगात्रान्, देवगुरुद्विजपरिचर्यार्थं श्रद्धाभक्तिभरबन्धुरचित्तान्, षट्त्रिंशद्राजकुलीमुकुटायमानान्, परमधार्मिकान्, परोपकारनिरतान्, लोकद्विष्टानां पापानां वधादुत्पन्नकीर्तिमन्दाकिनीपवित्रितभूमण्डलान्, यजनाध्ययनादिकर्मत्रयरतान्, किल्बिषवातेनास्पृश्यमानान्, सुरगुरुरिव दर्शितनीतिनैपुण्यान्, गङ्गोदकवन्निर्मलान्, परदारविमुखान्, स्वदारसन्तुष्टान्, धर्मधौरेयान्, आश्रितकल्पद्रुमायमानान्, षड्दर्शनाधारान्, दीनार्तिहरान्, बाह्याभ्यन्तरशौचतत्परान्, धर्मसंस्थापने ध्रुवपदप्रायान्, प्रतिपन्नवाचाऽविचलान्, आधिव्याधिबाधरहितान्, शिष्टैरुपदिष्टमार्गे प्रवर्तकान्, सदाचारान्, निजवंशकमलिनीवनविकासमार्तण्डान्, शशाङ्कनिर्मलयशोव्यक्तदिगन्तरान्, नानादानैः स्थगितबलिकर्णशिबिदधीचियशसः, रूपेण निर्जिताश्विनीकुमारसौन्दर्यान्, अशेषविद्यापारगान्, शस्त्रेषु वाहनेषु च कृताभ्यासान्, दूतवाचाभियोगैरनुदिनं यथासम्यगवस्थितपरिज्ञातपरराष्ट्रस्वरूपान्, धीरोदात्तधीरललितादिगुणालङ्कृतविग्रहान्, जितेन्द्रियान्, सप्तव्यसनैरबाहितान्, प्रजारञ्जनतत्परान्, अनेकगुणगणालयान्, स्वराष्ट्रोपचयप्रपञ्चप्रवीणान्, राज्यलक्ष्मीयोगक्षेमविशारदान्, सौभाग्यैकनिधानान्, सामदानदण्डभेदोपायानां यथास्थाने यथाविधिप्रयुञ्जनेऽतिकुशलान्, वदान्यान्, सर्वाधारान्, नानादेशीयकलाविद्भिर्दर्शितविज्ञानविशेषैर्मनीषितादप्यधिकाशापूरकान्, सेवकचकोरैश्चन्द्रकरानिवात्यर्थं पेपीयमानाननान्, नानादेशीयवनीपकानां मनोरथसाधने ऋषिकौत्सं प्रति राजश्रीरघुवदचिन्तितासंभाव्यहिरण्यदानादिदर्शनान्, परराष्ट्रेषु नानाबन्दिजनैरुद्गीयमानाऽनेकविक्रमयशोराशिभिश्चतुर्दिगन्तदिगीशभूपालानामन्तःकरणेषु मेरुतुल्यान्, विद्वज्जनपरिवारान्, विद्यावृद्धसङ्कुलसभातिलकायमानान्, पराक्रमेण अभिनवरामार्जुनादिवत्, क्षमया धरित्रीरूपान्, सत्येन युधिष्ठिरप्रतिमान्, स्थानभ्रष्टावनीशस्थापनाचार्यान्, रावणवद्दृढाहङ्कारान्, सागरवदगाधगाम्भीर्यान्, सत्सङ्गतिसंसक्तान्, श्रीसोमेश्वरपादपद्मयुगलध्यानैकचिन्तापरान्, श्रीमल्ल-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्ष्मीकान्तप्रणतितत्परान्, द्वादशराजमण्डलीसंसेव्यमानान्, सप्तमचक्रवर्ति-अभिनवसिद्धराजमहाराजाधिराजश्रीमज्जयसिंहदेवचरणारविन्दान्, श्रीआशापल्ल्या महामात्यश्रीआलिगः क्षितितलमिलन्मौलिना साष्टाङ्गं प्रणम्य परमसौहार्दात्सप्रश्रयमञ्जलिं बद्ध्वा विनयातिशयेन विज्ञापयति यथा । विज्ञप्यमाह । यदत्र श्रीस्वामिनां सौमनस्यात् श्रीलक्ष्मीकान्तप्रसादाच्च श्रीकुमारान्तःपुरादिराजवर्गे निखिलेऽपि निरुपमं श्रेयोऽस्तीति अवधार्य श्रीमत्प्रभुपादैः श्रीमत्कटके निजसौराज्यकुशलवतीभिः परमण्डलवतीभिः साधुबन्धनिःश्रेयसपराभिरमृतप्रायाभिः किंवदन्तीभिरुत्पन्नस्नेहजलामृतपूरणे महाविग्रहवशतो राजकार्यव्यग्रतया चिरकालमसंभावनया चिन्ताधिपरितापेन स्वीयमनोरथसारणीं यावत् प्लावयित्वा अनेकशाखानिबद्धेन पल्लवितव्यो वृद्धिं प्रापयितव्यश्चापुष्पफलदर्शनम् । कार्यं च । यत् श्रीमत्स्वामिपादैः प्रसादीकृतराजादेशं देवायतनानां शेषामिव शिरसाऽभिवन्द्य समादिष्टानि निखिलानि श्रीमद्राजप्रयोजनानि अहर्निशं सावधानः सन् एकाग्रचित्ततया यथानिर्दिष्टानि सिद्धिं प्रापयन्नस्मि । तथा मासैकमध्ये पुनरपि रथगजतुरगपदातिसङ्कुलं भूरिचतुरङ्गसैन्यं खड्गपट्टिशकुन्ततरवारिप्रभृतिषट्त्रिंशद्दण्डायुधोपेतं जरदजीवरक्षिकङ्कटप्रभृतियोधानां सन्नाहभूरिजयनशालासामग्रीसहितं रिपुवर्गप्रतिघातार्थं बहुतन्त्रं श्रीमद्वंघाटानां (?) परिग्रहार्थं प्रेषयन्नस्मीत्यवधार्य ममोचितो राजादेशः सदैव प्रसादीकार्यः । सं० १२८८ वैशाखशुदि १५ गुरौ । मदीयप्रहितरङ्गलेखो हस्तगतः प्रापयितव्यः यथा तत्प्रमाणेन त्रिपदमवधारयतां श्रीमत्सेव्यपादानां चित्ते आयव्ययस्य भ्रान्तिर्नोत्पद्यते इति ।

II B स्वस्ति । श्रीमद्विजयकटके महाराजाधिराजश्रीमहामात्यपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापसंशोषितारातिनिकरसप्तमचक्रवर्त्यभिनवसिद्धराजविजयविश्वलक्ष्मीस्वयंवररिपुराज्यभीमश्रीमद्भीमदेवपादारविन्दान् श्रीमत्पत्तनात् महामात्यश्रीअमुकाकः क्षितितलमिलन्मौलिना साष्टाङ्गं प्रणम्य सविनयं विज्ञपयति यथा । विज्ञपनीयमिदम् । श्रीमत्पादैः प्रसादीकृतराजादेशं शिरसाभिवन्द्य समादिष्टप्रयोजनानि सर्वाण्यपि कारयामास । अन्यदपि कार्यादिकं सदैव विज्ञाप्यमिति ॥ संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे ।

III C स्वस्ति । श्रीमद्विजयकटके महाराजाधिराजउमापतिवरलब्धप्रौढप्रतापसंशोषितारातिवनगहनान् सप्तमचक्रवर्त्तिअभिनवरिपुराज्यलक्ष्मीस्वयंव-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रान्, षड्दर्शनाधारान्, सेवकजनानां कल्पद्रुमप्रायान् राजनीतिमार्गप्रवर्त्तकान्, हरिहरानुध्यानाभिरतान्, राजश्रीसारङ्गदेवपादारविन्दान्, श्रीआशापल्ल्यां महामात्यश्रीधरणीधरो मौलिविन्यस्तकरयुगलेन सानन्दमाशीर्भिरभिषिच्य परमसौहार्देन सविनयं विज्ञापयति यथा । विज्ञप्यमदः । यत् श्रीस्वामिनामादेशप्रमाणेन समस्तानि राजकार्याणि सिद्धिं प्रापितानि सन्तीत्यवधार्य विशेषकरणीयादेशैः प्रतिदिनमहं सम्भावनीयः । कार्तिकशुदि १५ गुरौ इति ।

गुरुविज्ञप्तिका यथा—

I A स्वस्ति । श्रीभृगुकच्छे पूज्याराध्यादिअनेकतीर्थावगाहनपवित्रीकृतमानसान्, यजनयाजनाध्ययनप्रतिग्रहादिषट्कर्मनिरतान्, ऋग्यजुःसामाथर्वणाध्ययने अनवरतं कृतश्रमान्, देवद्विजगुरुसाध्वतिथिपूजातत्परान्, विमलकुलसरोजहंसान्, दीनानाथोद्धरणसमर्थान्, क्षितीयायां नवोदितपीयूषरुचिवत्सकलजनवन्दनीयान्, हिमकुन्देन्दुवत्स्वभावशीतलान्, विमलकुलोत्पन्नान्, गङ्गाजलवन्निर्मलचारित्रान्, सकामाशीर्भिरनवरतं पूरितयजमानाश्रितमनोरथान्, सदाचारान्, सुधर्मोपदेशकान्, याज्ञिकश्रीमोक्षपादान् चन्द्रावत्या राउलश्रीधारावर्षः साष्टाङ्गपातं प्रणम्य सविनयं विज्ञापयति यथा । विज्ञप्यमदः । यत् पूज्यानामाशिषां प्रसादादस्माकं सदैव निरुपमो महोदयस्तिष्ठतीत्यवधार्य सदैवानिर्वचनीयं सौमनस्यं मल्लक्षणानां स्वीयानामुपरि विचिन्त्य यथोचितादेश आशीर्भिः संयुतः प्रसादीकार्यः । सं० १२८८ वैशाखशुदि १५ गुरौ ।

II B स्वस्त्यमुकस्थानेऽनेकतीर्थावगाहनपवित्रीकृतमानसान् देवद्विजगुरुसाधुपूजानिरतान् विमलकलसरोराजहंसान् पूज्यपरमाराध्यपरमपूजार्चनीयपाठकअमुकपादारविन्दान् अमुकस्थानात्सदादेशकारी विनीतअमुकाकः परमश्रद्धया क्षितितलमिलन्मौलिना साष्टाङ्गं प्रणम्य सविनयं विज्ञपयति यथा । विज्ञपनीयमिति ॥ वयमत्राजस्रं युष्मत्पादारविन्दान् ध्यायन्तस्तिष्ठामः । युस्माभिरपि ममोपरि कारुण्यता कदाचिदपि न मोक्तव्या इति ।

पितृविज्ञप्तिका यथा—

A स्वस्ति । श्रीपत्तने पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयान्, अनेकगुणगणालङ्कृतकलेवरान्, निजकुलकमलिनीविकासने सहस्रकरप्रायान्, कुटुम्बभरणव्यग्रान्, दुर्भिक्षे स्वजातिपोषकान्, श्रीमल्लक्ष्मीकान्तभक्तिपरान्, परमधार्मिकान्, दीनानाथातिथिपोषकान्, आतुरभयापहारान्, महास्नेहभरेण निरुपमपुत्रवात्सल्यतत्परान्, सदाचारान्, निजवंशोद्योतकान्,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुकुलाचारप्रवर्तकान्, देवद्विजगुरुपरिचर्यानिष्ठान्, परोपकारनिरतान्, आधिव्याधिभिरबाधितान्, महासन्तोषयुतान्, नयविनयबन्धुरगात्रान्, सत्सङ्गतिप्रवर्तकान्, व्यसनैरवाहितान्, आश्रितानां कल्पद्रुमप्रायान्, परधनहरणपङ्गुरूपान्, विशेषविद्याकलासङ्ग्रहणे अत्यादरपरान्, कलौ कृतयुगाचारान्, वदान्यान्, षड्दर्शनाधारान्, दीनार्तिहरान्, सौभाग्यैकनिधानान्, गङ्गोदकवन्निर्मलचरित्रान्, अशेषविद्यापारङ्गमान्, दुर्भिक्षे पालनपरान्, सुजने दृढसौहार्दान्, अमितयशोनिधानान्, सदायोगक्षेमसाधने भृशं पटिष्ठान्, धर्मसाधने अहर्निशं महाजागरूकान्, पितृमहं० जयसिंहचरणकमलान् स्तम्भतीर्थात् सुतदेवडो महानन्देन साष्टाङ्गं प्रणम्य सोत्कण्ठं गाढमालिङ्गय च सविनयं विज्ञापयति यथा । विज्ञप्यमदः । पूज्यानां सौमनस्यात् निरामयं मामवधार्य तथा अत्रत्यसमस्तकुटुम्बमपि सारोग्यं विचिन्त्य पूज्यैः निजशरीरसौष्ठवेन तथा तत्रत्यसमस्तकुटुम्बनिर्व्याधितास्वरूपेण निरन्तरमेवाह्मानन्दनीयः । कार्यं च । यत्पूज्यैः कुटुम्बयोगक्षेमव्यग्रतया चिरकालात् प्रभृति अहं लिखितेन वाचिकेन न संभावितः । तेनाहं भृशमनुशयपरो वर्त्ते । अतो ममोपरि यथापूर्वं सविशेषं मयाऽवधार्य यथोचितकरणीयादेशैः विशेषशिक्षापनाभिश्च सदैव संभावनीयः, यथाऽऽयुष्मान् सौमनस्यात् स्वचित्ते परमसौहार्दं बिभ्राणो युष्मदादिष्टानि राजकार्याणि गृहकृत्यानि च निरन्तरं सावधानः सन् सिद्धिं प्रापयामि । इत्यवधार्य सदैव संभाला अवधार्या । मदधिकृतं कार्यं सदैवादेष्टव्यं, विशेषशिक्षा च प्रसादीकार्या । वैशाखशुदि १५ गुरौ ॥

II B स्वस्त्यमुकग्रामेऽनेकगुणालङ्कृतपरमधार्मिकस्नेहगुणभूषितपुत्रवत्सलपूज्यपरमाराध्यतमोत्तमपरमपूज्यार्चनीयपितृअमुकपादारविन्दान् अमुकस्थानात्सदाविनीतसुतअमुकाको महद्भक्त्या परमहर्षेण गाढमालिङ्ग्याभिवन्द्य साष्टाङ्गं प्रणम्य सविनयं विज्ञपयति यथा । विज्ञप्यमिदम् । कुशलमत्रास्माकमिति स्वमनसि प्रमोदं विधायात्मीयकार्यकल्याणवती वार्ता मम सन्तोषायाजस्रं प्रसादीकार्या । सर्वासां मातृप्रभृतीनां मदीयप्रणामो वाच्यः । कार्यादि सदैवादेष्टव्यमिति ॥

मातृविज्ञप्तिका यथा—

I A स्वस्ति । श्रीस्तंभतीर्थे पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयान्, गङ्गाजलवन्निर्मलचारित्रान्, अनेकगुणगणालङ्कृतकलेवरान्, देवीश्रीअरुन्धती-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वदहर्निशं पतिभक्तिरतान्, वधूजनपरिवृतान्, समस्तपोष्यवर्गभरणारतान्, समस्तगोत्रजापत्याशीर्वादतत्परान्, गुरुगोत्रजदेवद्विजातयतिथिपूजनेऽत्यन्तं जागरूकान्, कुटुम्बवृद्धभक्तिनिष्ठान्, मातृगङ्गादेवीपादान् श्रीपत्तनात् महं० गोवलः साष्टाङ्गपातं प्रणम्य परमसौहार्देन सविनयं अञ्जलिं बद्ध्वा विज्ञापयति यथा। विज्ञप्यमदः। यत्पूज्यानामाशिषां प्रसादात् मां निरामयमवधार्य ममोपरि निजचित्ते परमप्रमोदं चिन्तयित्वा पूज्यपादैः निजकुले वरारोग्यवतीभिः किंवदन्तीभिरमृतप्रायाभिः मां यथेष्टमभिषिच्य मत्परमकल्याणविवृद्ध्यर्थं सदैवाशीर्वाददानैरहमानन्दनीयः। कार्यं च। यन्मया अत्र सालवीधरणापार्श्वात् कांतीतणी पञ्चवर्णचीरमेकं वर्णापितमस्ति। तथा श्रीयोगिनीपुरात् गुडीआलचूनडी घाटडी बहुरङ्गविचित्र जोडूं एक १ तथा चुबनुं चूडीउं एक १ तथा सौराष्ट्रदेशात् निर्लाञ्छनहेमवर्णकचकडां बलीआं जोडूं १ तथा बदरीफलप्रमाणमौक्तिकहार १ इत्यादि सामग्री पूज्यानां भेटनाय सज्जीकृता तिष्ठति। माघीपूर्णिमोपरि श्रीमन्मातृपादानां चरणयुगलदर्शनाय उपरिलिखितकर्पटाभरणादिकं नीत्वा समागच्छन्नस्मि। तावता ममोपरि भूरिवात्सल्यं चित्ते अवधार्य सदैवाशीर्भिः संभावनीयो यथा पूज्यानां संभावनया ममाभिनवो महोदयो भवतीति सविशेषं यथापूर्वं सदा चिन्तनीयम्। सं० १२८८ मार्गशुदि १५ गुरौ।

II B अनेकगुणपवित्रगङ्गाजलनिर्मलचरित्रसदावधूजनपरिवृतसमस्तगोत्रजापत्याशीर्वादपरपरमाराध्यतमोत्तममहासाध्वीमातृगङ्गादेवीचरणकमलान् अमुकस्थानात्सदाज्ञाविधायी पितृमातृभक्तितत्परः सुतअमुकाकः साष्टाङ्गं प्रणम्य सविनयं विज्ञपयति यथा। विज्ञप्यमिदम्। कुशलमत्रास्माकं सपरिवाराणामिति स्वमनसि परमप्रमोदं विधायात्मीयशरीरकल्याणवार्तया वयमजस्रमानन्दनीयाः। सुतानां पाणिग्रहणार्थं स्वजनोऽमुकाकः समागतोऽस्तीति स्वमनसि विचार्य कृत्यमादेष्टव्यमिति।

आशीर्वादो यथा—

B स्वस्ति। श्रीमहास्थानात् यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहादिषट्कर्मनिरतात् अग्निष्टोमानेकक्रतुक्रियाकुशलकरणश्रीमदाचार्यः त्रैविद्यलोक श्रीमद्विजयकटके देवद्विजगुरुसाधुपूजनरतं राज० श्रीअमुकाकं पञ्चवदननिर्गताभिः ऋग्यजुःसामाथर्ववेदागमप्रणीताभिराशीर्भिरभिनन्द्य आशीर्वादयति यथा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कार्यं च। भवद्भिर्दापितअमुकग्रामीयभूम्या महती सारा कार्या। सदैवात्मीयधर्मो वृद्धिं नेतव्य इति।

व्यवहारपत्रं यथा—

I A संवत् १३३२ वर्षे आश्विनशुदि १० रवावद्येह श्रीमदणहिल्लपत्तने समस्तराजावलीसमलङ्कृतपरमेश्वरपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापसंशोषितारातिवनगहनबालनारायणावतारचौलुक्यकुलकमलिनीविकासनैकमार्तण्डैकरूपश्रीमल्लक्ष्मीकान्तप्रसादसंपादिताभिनवराज्यलक्ष्मीस्वयंवरमालालङ्कृतकण्ठकन्दलीरिपुमण्डलीवननिदहने प्रलयकालीयदुर्दान्तदावानलप्रायदक्षिणाधीशवरूथिनीगजघटाकुंभस्थलविदारणैकपञ्चाननाभिनवचक्रवर्त्तिश्रीमत्सारङ्गदेवकल्याणविजयराज्ये तत्पादपद्मोपजीविनि महामात्यश्रीधरणीधरे श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपन्थयतीत्येवं काले प्रवर्त्तमाने तद्विभोः प्रसादपत्तलायां भुज्यमानश्रीचन्द्रावतीकरणे महाराजकुलश्रीधारावर्षमहोदयिनि अमुकामुकपथके द्रय(द्रव्य?)मुद्रायां महं० श्रीविजयसिंहे तन्नियुक्तचण्डसिंहपञ्चकुलप्रतिपत्तौ व्यवहारपत्रमभिलिख्यते यथा। श्रीप्रह्लादनपुरवास्तव्यओसवालज्ञातीयसाधुजयचन्द्रसुतगणपतिना स्वीयसमुत्पन्नप्रयोजनवशात् व्यासलक्ष्मीधरपार्श्वात् श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितसुवर्णकणहट्टिकायां श्रेष्ठयर्थेन सञ्चरमाणजीर्णविश्वमल्लप्रिया भव्या एकमुष्ट्या गृहीतद्रम्म ५०००० पञ्चाशत्सहस्राणि द्रम्मा गृहीताः। अमीषां द्रम्माणां प्रतिमासं प्रतिशतं व्याजे द्र० २ द्विकं शतप्रत्या व्याजं चटति। एते द्रम्मा मट्टस्कन्धरहिता निर्विवादकलिकावलिकउचटरहिता अष्टप्राहरिक्या निर्योगक्षेमा व्यासलक्ष्मीधरमनस्वेच्छया चटितव्याजद्रम्मैः सहिता एकमुष्ट्या प्रवेशनीयाः। अमीषां सव्याजकद्रम्माणां दानाय समस्तकलिकन्दलखश्चानिषेधाय तत्रैववास्तव्यओसवालज्ञातीयसाहुजगसिंहसुतपद्मसिंहः तथा श्रीश्रीमालज्ञातीयव्यव०धरणासुतविक्रमसिंह उभौ जनौ व्यासलक्ष्मीधरस्यान्तराले मनोविश्वासनिमित्तं प्रतिभुवौ दापितौ। एकेन द्वौ द्वाभ्यामेकः। एकेनापि प्रतिभुवा हस्तप्राप्तेन परस्य द्वितीयस्य उत्तरमकुर्वाणेन व्यवहारकसमं धारणिकवत् लिखितव्यवहारपत्रद्रम्माणां निर्गमो निर्वहणीयः। इहार्थे धारणिकप्रतिभुवोः स्वहस्तेन प्रदत्तमतानि। तथा यथाज्ञानं लिखितमिदं व्यवहारपत्रमुभयाभ्यर्थितेन महं० श्रीपालेन। हीनाक्षरमधिकाक्षरं वा सदैव प्रमाणमधिगन्तव्यम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके समस्तराजावलीसमलङ्कृतमहाराजाधिराजपरमेश्वरपरमभट्टारकउमापतिवरलब्धप्रौढप्रतापसंशोषितारातिनिकरसप्तमचक्रवर्त्तिपार्वतीपतिप्रसादसम्पादितराजलक्ष्मीस्वयंवरअभिनवसिद्धराजरिपुराजभीमश्रीमद्भीमदेवकल्याणविजयराज्ये तत्पादपद्मोपजीविनि महामात्यश्रीअमुके श्रीश्रीकरणादौ समस्तमुद्राव्यापारान् परिपन्थयति सतीह अमुकामुकपथके द्वयमुद्रायां महं० श्रीविजयसिंहेऽधिकुर्व्वति सति एवं काले प्रवर्त्तमाने राज० श्रीचतुर्भुजस्य देवस्य प्रसादपत्तलायां भुज्यमानदन्दाहीयकपथके वालूआग्रामे तन्नियुक्तवाहकराज०अजयसिंहमहं० यशश्चन्द्रसुतमहं० जाजलप्रभृतिपञ्चकुलप्रतिपत्तौ व्यवहारपत्रमभिलिख्यते यथा। धनिको नाम नामतः इहैव वास्तव्यश्रे०अमुकाकसुतश्रे०अमुकाकः स्वधनं लाभाय प्रयुङ्क्ते । अस्य च हस्ताक्षराणि धनिको नाम नामतः । इहैववास्तव्यकुटुं० अमुकसुतकुटुं० अमुकाकेन समुत्पन्नप्रयोजनवशेन श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचलितश्रेष्ठश्रीमत्पारौपथरौक्यगृहीत द्र० २१० दशाधिकशतद्वयममीषां द्रम्माणां व्याजे प्रतिमासं शतं प्रति देय द्र० २ द्वौ। एते द्रम्मा सां०कार्तिकान्ते सव्याजका मट्टस्कन्धविवर्जिता निर्योगक्षेमा एकमुष्ट्या अष्टप्राहरिका दातव्याः। उपरिलिखितविधेः पालनाय द्रम्माणां दानाय सामान्यग्राहकाचारेण दत्तप्रतिभूः कुटुम्बिकअमुकाकः तथा द्वितीयप्रतिभूः अमुकाकः । अत्र मतम् । अत्र साक्षिणः ।

वलितपत्रविधिः—

I A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं वलितपत्रमभिलिख्यते यथा। धनिको नाम नामतः अमुकग्रामवास्तव्यअमुकज्ञातीयअमुकसुत अमुको लाभाय स्वधनं प्रयुङ्क्ते। अस्य च हस्ताक्षराणि धारणिको नाम नामतः । अद्यैववास्तव्यपूर्वाभाषया अमुकाकेन स्वीयसमुत्पन्नप्रयोजनवशात् श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचलित द्र० ३०० त्रीणि शतानि द्रम्मा रौक्या गृहीताः । एते द्रम्माः संप्रत्येव परत्र स्थापयित्वा द्विगुणीभूताः द्र० ६०० षट्शतानि जाताः। अमीषां द्रम्माणां संबन्धे व्यवहारकस्य मनोविश्वासनिमित्तं अमुकतडागे आम्रथड ५० पञ्चाशद्डाणके मुक्ताः । अमीषामाम्राणां किल मूल्यात् प्रतिवर्षं द्र० १०० शतैकं द्रम्मा व्यवहारकेण पत्रपृष्ठतो प्रवेश्य दातव्याः । षड्भिः वर्षैः संपूर्णैः स्वयमेव आम्रा व्यवहारकस्य पत्रग्रहात् छुटन्ति । षड्वर्षानन्तरं व्यवहारकस्य

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आम्रैः समं लागसंबन्धः कोऽपि नहि। आम्रा धनिकस्यैव निष्कावलाः सञ्जाताः। अस्य लिखितविधेः पालनाय आम्राणां दानाय अन्यगोत्रिदायादपत्रहस्तअन्यव्यवहारिक्यसमस्तखश्चानिवारणाय दावापितप्रतिभुवौ अमुकज्ञातीयौ अमुकामुकनामानौ अमुकामुकसुतौ अमुकामुकाख्यौ द्वौ रक्षपालौ धारणिकेन व्यवहारकस्यान्तराले दावापितौ। एकेन द्वौ द्वाभ्यामेकः। एकेन व्यवहारकस्य हस्तं प्रासेनापरस्योत्तरमकुर्वतः समग्रपत्रविधिर्निर्वहणीयः। इहार्थे धारणिकप्रतिभूभ्यां लिखिताधिवाससत्कपश्चसाक्षिविदितं स्वहस्तेन दत्तमतानि।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके समस्तराजावलीपूर्वमद्येह वाल्हूयाग्रामे वलितपत्रमभिलिख्यते यथा। धनिको नाम नामतः। इहैव वास्तव्यकुटुम्बिकअमुकाकेन समुत्पन्नप्रयोजनवशेन श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचलितश्रीमत्पारोपथरौक्यगृहीत द्र० ३०० शतत्रयमेते द्रम्मा द्विगुणीकृताः ६०० षट्शतानि स्थाप्याः। अमीषां स्थाप्यद्रम्माणां व्यवहारकस्य विश्वासनिमित्तं वलितायाडाणके मुक्तम्। अमुकतडागे आम्रथुड ५० पञ्चाशदाम्रा वलिताया भोग्ये मुक्ताः। अमीषां पञ्चाशदाम्राणां फलमूल्यात् प्रतिवर्षं प्रवेशे द्र० १०० शतमेकम्। आम्राणां फलानि व्यवहारकेण भोज्यानि। द्रम्माणां व्याजं नहि। संवत् १२८८ वर्षे सं. ९३ निरुद्धं षड्वर्षैराम्राः छुट्यन्ते। षड्वर्षादनन्तरमाम्राणां विषये व्यवहारकस्य लागभागो नहि। उपरिलिखितविधेः पालनाय राणकगोत्रिणां व्यवहारकाणां च खश्चारक्षणाय सामान्यग्राहकाचारेण दत्तप्रतिभूः कुटुम्बिकः अमुकाकः द्वितीयप्रतिभूः अमुकाकः। अत्र मतानि। अत्र साक्षिणः। लिखितमुभयाभ्यर्थितेन पारि० अमुकाकेन प्रमाणम्॥

गृहविक्रयविधिः—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं गृहविक्रयपत्रमभिलिख्यते यथा। यत् व्य० आशाकेन नागरज्ञातीयमहं० मालासुतगोदापार्श्वात् पूर्वपुरुषोपार्जितं द्विभूमिकं कावेलुकैः छन्नं दटितं समालिन्दकं पूर्वाभिमुखं सफलहिकं कोटडीसहितं पूर्वरीत्या यथानिर्गच्छमानजलमार्गयुतं स्वसीमापर्यन्तं चतुराघाटोपेतं नवनवत्याचारेण सवृक्षमालाकुलं नवविधानपूर्णं आचन्द्रार्कं शाकपणिकान्यायेन मूल्येन पञ्चमुखनगरविदितं गृहमूल्ये द्रम्म ५०० पञ्चाशत् द्रम्मैर्गृहीतम्। अत ऊर्ध्वं गृहमिदं व्यवहारकेण पुत्रपौत्रपरम्परया यदृच्छया भोक्तव्यं, यद्रोचते तत्कार्यं गृहस्यास्य।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथासन्तिष्ठमानालिखितगृहविक्रयपत्रानन्तरं गृहेऽस्मिन् मनःस्वेच्छया नवीनः कर्मस्थायः काराप्यः । धर्मेण गृहमिदं देयम् । अथान्यहस्ते विक्रेतव्यम् । इहार्थे धारणिकेन गृहस्यास्य विक्रीतस्य विषये व्यवहारकसमं वादविवादः कीदृशोऽपि न कार्यः । इहार्थे उपरिलिखितविधेर्निर्वाहणाय अन्यगोत्रिदायादराजवर्गीयकन्दलनिवारणाय पत्रहस्तान्यव्यवहारकखश्वानिवारणाय दावापितान्तःस्थअमुकज्ञातीयअमुकामुकजना व्यवहारकस्य सन्तानपरम्परया विक्रीतगृहं भोगवतः समस्तवादविवादं निवारयन्ति । एकेन सर्वे सर्वैरप्येकः। परस्परमुत्तरमपरस्याकुर्वतः लिखितपत्रविधिर्व्यवहारकसमं निर्वहणीयः । इहार्थे धारणिकरक्षपालानां नामानि । पत्रं प्रमाणम् ।

चन्द्रकालिकं विक्रयपत्रं यथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह श्रीमदणहिल्लपाटके समस्तराजावलीसमलङ्कृतपूर्वमद्येह बालूआग्रामे चन्द्रकालिकविक्रयपत्रमभिलिख्यते यथा । धनिको नाम नामतः । इहैववास्तव्यब्राह्मणअमुकाकेन पूर्वपुरुषोपार्जितं द्विभूमिकं कवेलुकाच्छन्नं समालिन्दकं पूर्वाभिमुखं सफलहिकं स्वसीमामर्यादं सवृक्षमालाकुलितं नवनिधानसहितं नवनवत्याचारेण व्य० खेतापार्श्वे चन्द्रकालिकं शाकफलकन्यायेन विक्रीतम् । गृहमूल्ये द्र० ५०० पञ्चशतानि । अत ऊर्ध्वं गृहमिदं व्यवहारकेण पुत्रपौत्रपरम्परया भोक्तव्यं, विक्रेतव्यं च । यद्रोचते तत्कर्तव्यम् । ब्राह्मणअमुकाकेन गृहसन्मुखं नावलोकनीयम् । गृहस्याघाटा यथा । अस्य विधेः पालनाय राणकगोत्रिकअन्यव्यवहारकादिखश्वारक्षणार्थं दत्तप्रतिभूः ब्राह्मणअमुकाकः, तथा द्वितीयप्रतिभूः अमुकाकः । अत्र मतानि । अत्र साक्षिणः । उभयाभ्यर्थितपारि० अमुकाकेन लिखितं प्रमाणमिति ॥

वृद्धिफलभोगपत्रं यथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके समस्तराजावलीपूर्वं अद्येह बालूयाग्रामे वृद्धिफलभोगपत्रमभिलिख्यते यथा ॥ धनिको नाम नामतः । इहैववास्तव्यकुटुम्बिकअमुकाकेन सञ्जातप्रयोजनेन श्रीश्रीमालीयखरटङ्कशालाहततत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचलितश्रेष्ठश्रीमत्पारौपथरौक्यगृहीतोद्धारे द्र० १०० शतमेकम् । अमीषां द्रम्माणां व्यवहारकस्य विश्वासनिमित्तं पूर्वाभिमुखं समालिन्दकं द्विभूमिकं सफलहिकं स्वसीमापर्यन्तं चतु-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

राघाटनिबद्धं गृहं वृद्धिफलभोगाचारेण अड्डाणके मुक्तम् । गृहस्य भाडकं नहि । द्रम्माणां व्याजं नहि । एष वृद्धिफलभोगन्यायः । गृहस्य पतितध्रुषितसमर्चापनोपक्षयः सर्वोऽपि धारणिकसमक्षं पत्रे चटति । छोड्यमानगृहे गृहसमर्चापनोपक्षयो व्यवहारकेण लभ्यः । एतद् गृहं यदा तदापि अक्षयतृतीयायां समग्रकद्रम्मान् सोपक्षयान् दत्त्वा धारणिकः छोटयति । गृहस्याघाटा यथा । अस्य पत्राधःलिखितविधेः पालनाय सोपक्षयद्रम्माणां दानाय दत्तप्रतिभूः कुटुं०अमुकाकः तथा द्वितीयप्रतिभूः अमुकाकः । अत्र मतानि । अत्र साक्षिणः ॥

गृहाड्डाणकपत्रविधिर्यथा—

A सं० १२८८ वैशाखशुदि १५ सोमेऽद्येह यथासन्तिष्ठमानराजावलीपूर्वं श्रीचन्द्रावत्यां राउलश्रीधारावर्षपञ्चकुलप्रतिपत्तौ गृहाड्डाणकपत्रमभिलिख्यते यथा । धनिको नाम नामतः अमुकग्रामवास्तव्यअमुकज्ञातीयअमुकाकसुतअमुकाको लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्ताक्षराणि धारणिको नाम नामतः । इहैववास्तव्यवायडज्ञातीयव्य०कूरासुतसूराकेण स्वीयसमुत्पन्नप्रयोजनवशात् श्रीश्रीमालीयखरटंकशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचलितश्रेष्ठश्रीश्रीविश्वमल्लप्रियद्र० ४०० चत्वारिंशतानि द्रम्मा व्यवहारकपार्श्वात् गृहीताः । अमीषां द्रम्माणां व्यवहारकस्य मनोविश्वासनिमित्तं पूर्वपुरुषोपार्जितं अद्यापि भुज्यमानं सफलहिकं चतुर्दिक्षु वरंडिकावृतं पट्टशालारसवतीसमन्वितं कवेलुकैः समाच्छन्नं दटितं द्विभूमिकं पूर्वाभिमुखं स्वगृहं अधोविलिखितचतुराघाटोपेतं वृद्धिफलभोगाचारे अड्डाणके मुक्तम् । गृहस्य भाटकं नहि । द्रम्माणां व्याजं नहि । अयं वृद्धिफलभोगाचारः । गृहस्याघाटा यथा । पूर्वस्यां दिशि देवसदनस्य वरण्डिकायां सीमा, दक्षिणस्यां दिशि वा०देवडगृहनीवपाते सीमा, पश्चिमायां दिशि राजभवनकोटडीमर्यादा, उत्तरस्यां दिशि राजमार्गे मर्यादा । एवं चतुराघाटोपेतं पूर्वपुरुषोपार्जितं स्वगृहं मया व्यवहारकस्य मनोविश्वासनिमित्तं अद्यदिनपूर्वं पञ्च वर्षाणि बन्धीकृत्य अड्डाणके मुक्तम् । यदि गृहस्यास्याङ्गजगोत्रिदायादराजकुलप्रभृतिना व्यवहारकस्य कीदृशोऽप्युपक्षयो जायते स सर्वोऽपि धारणिकेन निर्वहणीयः । अथ कदापि व्यवहारकस्य भीडायां जातायां द्रम्मा विलोक्यन्ते, तदा धारणिकमाक्रम्य द्रम्मा ग्राह्याः । नो वा धारणिकविदितमन्यव्यवहारकहस्ते पत्रमड्डाणकं दत्वा द्रम्मा ग्राह्याः । गृहमिदं दैववशादग्निदाहेन अति-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जलपाताद्वा ज्वलति पतति घुषति तदा धारणिकेन निजवित्तं व्ययित्वा तादृशमेव गृहं काराप्य व्यवहारकस्य देयम् । अथ कदापि धारणिकः स्वयं कारयितुं न शक्नोति, तदा व्यवहारकेण अग्रीकपायाउपरि धारणिकविदितं तादृशमेव काराप्यम् । काठकिवेलूकडीयमंजूरप्रभृतीनां लागिद्रम्मा व्याजसहिताः सोपक्षया धारणिकविदितं पत्रे चटाप्याः । गृहमध्ये कोष्ठकं कृत्वा अथ भूमावेव चणकलवणं वा व्यवहारकेण न क्षेपणीयम् । तेनोपद्रवेण यदि कीदृशोऽपि गृहे विनाशः स्यात्, ततो व्यवहारकेण स्वीयद्रव्यं व्ययित्वा गृहं समराप्यम् । एवं व्यवहारकेण लिखितावधिं यावन्निजमनोहार्यो गृहं भोगवनीयम् । अवधेरूर्ध्वं प्रतिवर्षं दीपोत्सवे सामकसोपक्षयद्रम्मैर्दत्तैः छुटति । दीपोत्सवादूर्ध्वं प्रतिपद्दिने ग्रन्थिबद्धैरपि द्रम्मैर्धारणिकः छोटयितुं न लभते । अस्योपरि लिखितविधेः पलापनाय सामकसोपक्षयद्रम्माणां दावापनाय अन्यगोत्रिदायादपत्रहस्तान्यव्यवहारिक्यादिसमस्तखश्चान्निवारणाय दावापितआधिपालप्रतिभूअमुकज्ञातीयअमुकसुतअमुकामुकाकौ द्वौ चरौ वा लिखितपत्रविधिं समग्रामपि धारणिकवद्व्यवहारकसमं निर्वहतः । एकेन सर्वे सर्वैरप्येकः । एकेन व्यवहारकस्य हस्तप्राप्तेन अपरस्योत्तरमकुर्वतो धारणिकवत् व्यवहारकलिखितपत्रविधेः निखिलोऽपि निर्गमो विधेयः । परस्परमुत्तरप्रत्युत्तरो न कार्यः । इहार्थे धारणिकआधिपालानां स्वहस्तेन अधिवाससत्कीयपञ्चसाक्षिविदितं प्रदत्तमतानि । लिखितपत्रमिदं उभयाभ्यर्थितेन पारथीजयताकेन । हीनाक्षरमधिकाक्षरं वा प्रमाणम् ।

गृहडूलिपत्रं यथा—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं आधिपत्रमभिलिख्यते यथा । श्रीपत्तनवास्तव्यवा०मालापार्श्वात् स्वकार्यवशात् व्य०सोमाकेन स्वीयगृहमाधौ मुक्त्वा गृहीतद्रम्म २०० शतद्वयं द्रम्मा गृहीताः व्याजे शतं प्रति द्र० २ । अमी द्रम्माः सव्याजका मट्टस्कन्धरहिता एकमुष्ट्या सां० अक्षयतृतीयायां व्यवहारकस्य देयाः । यदि कथितदिने द्रम्मान् न ददाति तदा द्विगुणदत्तद्रम्मैर्गृहमाचन्द्रार्कं डुलति । प्रतिभूभिर्धारणिकेन च डुलितगृहपत्रं नवनवत्याचारेण व्यवहारकस्य लिखाप्य देयम् । इहार्थे धारणिकप्रतिभुवां च पञ्चाधिवाससाक्षिसमं दत्तमतानि स्वहस्तेन प्रमाणानि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ क्षेत्राड्डाणकपत्रम्—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं क्षेत्राड्डाणकपत्रमभिलिख्यते यथा । धनिको नाम नामतः श्रीपत्तनवास्तव्यश्रीमालज्ञातीय व्य०चाहडो लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्ताक्षराणि धारणिको नाम नामतः । संखारीग्रामवास्तव्यकुटुं०मोखाकेन स्वीयसमुत्पन्नप्रयोजनवशात् व्य०चाहडपार्श्वात् श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितसर्वत्रव्यवहरमाणश्रेष्ठजीर्णविश्वमल्लप्रियगृहीतोद्धारद्रम्माः ५०० पञ्चशतानि द्रम्मा गृहीताः । अमीषां द्रम्माणां सम्बन्धे धनिकस्य मनोविश्वासनिमित्तं पूर्वपुरुषोपार्जितं अद्यापि भुज्यमानं सवृक्षमालाकुलं नवविधानसहितं चतुराघाटोपलक्षितं निजं क्षेत्रं वृद्धिफलभोगाचारेण अड्डाणके मुक्तम् । धनिकेन क्षेत्रमिदं सामकद्रम्मान् दत्वा अक्षयतृतीयायां प्रतिवर्षं छोटनीयम् । क्षेत्रस्यायपदं व्यवहारकेण भोक्तव्यम् । चतुर्थीदिने ग्रन्थिवद्धैरपि द्रम्मैः क्षेत्रं छोटयितुं धारणिको न लभते । अस्योपरि लिखितपत्रविधेः पलापनाय अन्यगोत्रिदायादपत्रहस्तान्यव्यवहारकसमस्तखश्रानिवारणाय दापितप्रतिभुवौ अमुकाकौ लिखितपत्रविधिं निर्वहतः । एकेन द्वौ द्वाभ्यामेकः । एकेन हस्तप्राप्तेन व्यवहारकस्यापरस्योत्तरमकुर्वाणेन लिखितपत्रविधिर्निर्वहणीयः । इहार्थे अधिवासे समेत्य जनत्रयसाक्षिसमं मतानि ।

अश्वाड्डाणकपत्रमभिलिख्यते यथा—

I A यथासन्तिष्ठमानपूर्वलिखितराजावलीपूर्वं सं० १२८८ वैशाखशुदि १५ सोमेऽद्येह श्रीपत्तने अश्वाड्डाणकपत्रमभिलिख्यते यथा । धनिको नाम नामतः । इहैववास्तव्यआसधीरो लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्ताक्षराणि धारणिको नाम नामतः । इहैववास्तव्यहेडाउनागडेन स्वीयसमुत्पन्नप्रयोजनवशात् श्रीश्रीमालीयखरटंकशालाहतत्रिःपरीक्षितहृद्व्यवहारिक्यप्रचलितजीर्णश्रेष्ठश्रीविश्वमल्लप्रियद्र० ८०० अष्टौ शतानि द्रम्मा गृहीताः । व्यवहारिआसधीरमनोविश्वासनिमित्तं हेडाउनागडेन स्वीयहरीउघोड्ड १ तथा श्रीषण्डु घोड्ड १ उभयं द्वौ घोटकौ व्य० आसधीरद्वारे निबद्धौ । तदेतयोर्द्वारनिबद्धघोटकयोः खडखादनमोदनस्थानपालवैद्यौषधग्राहरिक्याद्युपक्षयः सर्वोऽपि धारणिकेन वोढव्यः । यदि धारणिकः पत्रलिखितोपक्षयविधिं प्रतिदिनं न वहति ततो व्यवहारकेण खडस्थाने ज्ञां-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षरा खादनस्थाने वालुका वारिस्थाने मूत्रमश्वयोर्बन्धनीयानि । अनेनापि परिणा विधीयमाने तस्मिन्नर्थे धारणिकेन व्यवहारकस्य परिपन्था न कार्या । ईदृशे समये यदा धारणिकः पत्रसमयेन उपक्षयनिर्वाहं न कुरुते ततो दिनैकादूर्ध्वं व्यवहारकेण प्रतिदिनं सर्वोपक्षयलाग्यां द्र० १ ॥ सार्धद्रम्मैको वैद्यानामौषधोपचारलागिद्रम्माश्च उद्धारपत्रपृष्ठितो लिखनीयाः । घोटकयोर्योगक्षेमः धारणिकवत् सर्वोऽपि व्यवहारकेण निच्छद्मवृत्त्या विधातव्यः । तदेतयोर्घोटकयोर्द्वारनिबद्धयोः स्वकार्यवशात् व्यवहारकेण तत्परिजनेन यदृच्छया आसमुद्रान्तमारुह्य पर्यटनीयम् । यदि कदापि अतिवाहनात् रुधिरभृतावश्वौ म्रियेते , पलायनं कृत्वा व्रजतः, असारीयकैराकृष्येते, केडसरीयेते, उद्भ्रम्य गच्छतः, उत्कर्णितौ म्रियेते, जले ब्रुडतः, शूलायितौ म्रियेते, व्याधिना विपद्येते, मोकीरके व्याघ्रसिंहादिश्वापदैर्मार्येते, अथ राजविद्रवेण परचक्रे आगते म्रियेते, अथ धारणिकवैरिणा गृहे प्रविश्य मार्येते, कीलके स्फुटित्वा म्रियेते कोऽपि वैरी रसनाकर्तनं विधाय मारयति, उत्पन्नचरणव्रणैः माटौ जायेते, अग्निदाहाहतिजलवाताहतिसर्पदंशनाद्वा कदाचिदपि अन्येन दैवोपघातेन एतौ घोटकौ विनाशं प्राप्नुतः , तदा हेडाउनागडेन व्य० आसधीरद्वारे तद्वर्णौ तत्तुल्यौ तत्सुतौ वा अन्यौ तद्वयस्कौ अग्रीकृमृतविनष्टघोटकयोः स्थाने तादृशावेव बन्धनीयौ । एतौ द्वौ घोटकौ हेडाउनागडेन अद्यदिनपूर्वं मासद्वयमध्ये पत्रे लिखितसोपक्षयसव्याजकद्रम्मान् व्य० आसधीरस्य कलिकावलिरहितान् एकमुष्ट्या रौक्यानेव माटभाटवर्जं प्रवेशयित्वा छोटनीयौ । यदि लिखितदिनपूर्वं मासद्वयावधौ सव्याजकसोपक्षयद्रम्मान् दत्वा धारणिको व्यवहारकपार्श्वात् लिखितपत्रविधिना घोटकौ न छोटापयति, तदा शाकपणिकान्यायेन षण्डबदरीफलन्यायेन वा व्यवहारकेण धारणिकविदितं उभावपि घोटकौ हट्टे नीत्वा वर्तमानतद्दिनमूल्येन विक्रीय यथोत्पन्नद्रम्माः सव्याजकाः सोपक्षया ग्रहीतव्याः । कदापि तदेताभ्यां विक्रीतघोटाभ्यां पत्रे लिखितद्रम्माः सोपक्षया न पूर्यन्ते तदा व्यवहारकेण धारणिकपार्श्वात् अथवा दावापितप्रतिभूभ्यां घोटकविक्रयं धारणिकविदितं कारयित्वा लिखितपत्रविधिना घटितहीनद्रम्माणां निर्वाह उअयोरपि धारणिकप्रतिभुवोः गृहात् अपरवस्तु विक्रीय विशुद्धिः काराप्या । तथा विक्रीतघोटकयोर्हीनाधिकमूल्यविषये कालान्तरेणापि व्यवहारकसमं धारणिकेन परिपन्था काऽपि न कार्या । अस्योपरिलिखितपत्रविधेर्निर्वहणाय पलापनाय च दावापितप्रतिभूश्रीमालज्ञातीयवा०जगसीसुतपूना तथा गूर्जरज्ञातीयवा०मोषासुत-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

खोखाकः उभौ प्रतिभुवौ धारणिकवत् समग्रलिखितपत्राक्षरविधेर्निर्वाहं कुर्वतः। एकेन द्वौ द्वाभ्यां एकः। व्यवहारकस्य लिखितपत्राक्षरविधेर्निर्वाहं कारापयत एकेन हस्तप्रासेन द्वितीयस्य उत्तरो न विधेयः। धारणिकवत् समग्रपत्रविधेर्निर्वाहो व्यवहारकसमं विधातव्यः। इहार्थे धारणिकप्रतिभुवोः स्वहस्तेन दत्तमतानि। तथा यथाज्ञातियथानामप्रत्ययं साक्षित्रयं पंचकं वा पत्रे लिखितव्यम्। हीनाक्षरमधिकाक्षरं वा पत्रलिखितं प्रमाणम्।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह श्रीमदणहिल्लपाटके समस्तराजावलीपूर्वमद्येह बालूआग्रामे अश्वपत्रमभिलिख्यते यथा। धनिको नाम नामतः इहैव वास्तव्यव्य०खेताकः लाभाय स्वधनं प्रयुङ्क्ते। अस्य च हस्ताद्धारणिको नाम नामतः। इहैववास्तव्यहेडाजअमुकाकेन समुत्पन्नप्रयोजनेन श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितप्रचलितहट्टव्यवहारिक्यश्रेष्ठश्रीमत्पारौपथरौक्यगृहीतोद्धारे द्र० ८०० अष्टौ शतानि। अमीषां द्रम्माणां व्याजे शतैकस्य मासं प्रति द्र० २ द्वौ। अमीषां सव्याजकद्रम्माणां व्यवहारकस्य विश्वासाय व्यवहारकद्वारे निबद्धौ अडाणके मुक्तौ श्रीषंडपोलिघोटकौ। अनयोर्द्वारनिबद्धयोः खडखादनमोदनस्थानपालवैद्यौषधप्राहरिकप्रभृतिउपक्षयो हेडाज(हेडावुक्क) अमुकाकेन वोढव्यः। यदि हेडाजअमुकाकः खादनाद्युपक्षयं न प्रयच्छति तदा खडखादनादि उपक्षयं भणित्वा दिनं प्रति व्यवहारकेण पत्रे उद्धार्यम्। सार्द्धद्रम्मः दिनं प्रत्युपक्षये चटति। तथाऽनयोर्घोटकयोर्द्वारनिबद्धयोरग्निदाहादिभिर्जलपानात् सर्वातिदेशेनाश्वस्कन्धाधिरोहणादतिवाहाद्राजविद्रवात् समस्तराजकदैवकवशात् वातपित्तश्लेष्मादिरोगात् योगक्षेमादिकमुत्पद्यते तत्सर्वं धारणिकस्य। यदा च कथंचिज्ज्ञातयोगक्षेमः तदा तावद्वर्णौ तादृङ्मूल्यौ चानयोः स्थाने धारणिकेन धनिकस्य द्वारे घोटकौ बन्धनीयौ। आभ्यां घोटकाभ्यां धारणिकपरिवारेण समं व्यवहारकपरिवारेण वा आकर्णपुच्छं मर्यादी कृत्यारुह्यासमुद्रान्तायामवन्यां पर्यटनीयम्। अनयोर्द्वारनिबद्धअड्डाणकयोर्घोटकयोः खडस्थाने कुशाः खादनस्थाने कुलवाः डांषरादि नीरणे दीयमाने धारणिकेन कापि परिपन्था न कार्या। पत्रलिखितमितिपूर्वं मासैकेन घोटकौ न छोटयति तदा खण्डबदरन्यायेन व्यवहारको विक्रीणाति॥ विक्रीतघोटकयोः ये केऽपि द्रम्मा न पूर्यन्ते ते सर्वेऽपि द्रम्मा धारणिकेन आधिपालकेन प्रतिभुवा च उभाभ्यां सोपक्षयाः सव्याजकाः द्रम्माः स्वगृहाद्दातव्याः। अनयोर्विक्रीताश्वयोर्हीनाधिकमूल्यविषये कालान्तरेऽपि धारणिकेन परिपन्था कापि न कार्या। अस्योपरिलिखितविधेः पालनाय सोपक्षयकसव्याजकद्रम्माणां दानाय घोटकयोः छोट-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नाय सामान्यग्राहकाचारेण दत्तप्रतिभूः राज० अमुकाकः तथा द्वितीयप्रतिभूः । अत्र मतानि । अत्र साक्षिणः । लिखितमिदम् ।

आधिपत्रं यथा—

I A सं० १२८८ वैशाखशुदि १५ सोमेऽद्येह श्रीपत्तने यथालिखितराजावलीपूर्वं आधिपत्रमभिलिख्यते यथा । धनिको नाम नामतः इहैववास्तव्यवा०खीमाको लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्तात् धारणिको नाम नामतः । इहैववास्तव्यवा०पूनाकेन स्वीयसमुत्पन्नप्रयोजनवशात् व्य०खीमाकपार्श्वात् श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचरत्श्रेष्ठद्विवल्लक्यवीसलप्रियद्र०२००शतद्वयं द्रम्माः गृहीताः । अमीषां द्रम्माणां व्याजे मासं शतं प्रति द्र०२ द्वौ द्रम्मौ चटतः । ततोऽमीषां द्रम्माणां दानाय व्यवहारकस्य मनोविश्वासनिमित्तं आधीकृतं पूर्वाभिमुखं समालिन्दकं द्विभूमिकं दटितं कवेलुकैः छन्नं सफलहिकं सप्राङ्गणं यथालिखिताघाटसहितं वा०पूनाकेन आधौ मुक्तम् । गृहस्यास्य आघाटा यथा । पूर्वस्यां दिशि वा०जगसीगृहस्य पाश्चात्यनीव्रजलपाते मर्यादा । दक्षिणस्यां दिशि वा०चाहडस्य कोटडीमर्यादा । तथा पश्चिमायां दिशि राजमार्गे सीमा । उत्तरस्यां दिशि देवश्रीआदिनाथदेवालयस्य वरंडिकायां सीमा । एवं चतुराघाटोपेतं स्वीयगृहं व्यवहारकस्य आधौ कृत्वा दत्तम् । गृहमिदं सां० अक्षयतृतीयायां दत्तसव्याजकद्रम्मैः माटघाटरहितैः एकमुष्ट्या लिखितपत्रविधिना कलिकावलिवर्जं व्यवहारकस्य प्रवेशितैः छुटति । यदि धारणिको लिखिताक्षरविधिना सां० अक्षयतृतीयायां न छोटयति ततः प्रतिवर्षं अनेनैव विधिना व्यवहारकेण गृहमिदं लिखितपत्राक्षरप्रमाणेन व्यवहारकस्य प्रवेशद्रम्मैः छुटति । कदापि गृहमिदं राजकदैवकवशात् ज्वलति भ्रुषति पतति तदा धारणिकेन प्रतिभूभिश्च तादृशमेव गृहं काराप्य व्यवहारकस्य दातव्यम् । अनेन लिखितविधिना व्यवहारकेण गृहमिदं आचन्द्रार्कं भोगवनीयं, यावता धारणिको लिखितपत्रविधिना द्रम्मान् सव्याजकान् न ददाति । इहार्थे लिखितपत्रविधेर्निर्वाहणाय दावापितप्रतिभूः ओसवालजगसीसुतपूना तथा नागरवाहडसुतचाहड उभौ दावापितप्रतिभुवौ । एकेन द्वौ द्वाभ्यामेकः । परस्परमुत्तरं अपरस्य अकुर्वाण एक एव प्रतिभूर्धारणिकसमं लिखितपत्रविधेः निर्वाहं कुरुते । इहार्थे धुरप्रतिभुवोः स्वहस्तेन प्रदत्तमतानि ॥ तथा यथालिखितसाक्षिपञ्चकसहितं पारथीजयताकेन लिखिताधिपत्रं प्रमाणमिति ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके समस्तराजावलीपूर्वमद्येह बालूआग्रामे आधिपत्रं लिख्यते यथा ॥ धनिको नाम नामतः इहैववास्तव्यव्य० खेताकः स्वधनं प्रयुङ्क्ते । अस्य च हस्ताद्धारणिको नाम नामतः । इहैववास्तव्यकुटुम्बिकअमुकाकेन समुत्पन्नप्रयोजनवशेन श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितहट्टव्यवहारिक्यप्रचरत्-श्रेष्ठश्रीमत्पारुपथकगृहीतद्रम्म २०० शतद्वयममीषां व्यवहारकस्य विश्वासनिमित्तं आडीकृतं पूर्वाभिमुखं समालिन्दकं द्विभूमिकं कवेलुकाच्छन्नं सफलहिकं स्वसीमापर्यंतं गृहं मुक्तम् । गृहस्याघाटा यथा । एते द्रम्मा अक्षयतृतीयायां सव्याजका भट्टस्कन्धबाह्या रौक्या एकमुष्ट्या दातव्याः । यद्यक्षयतृतीयायां द्रम्मान्न ददाति, तदा द्विगुणद्रम्मैर्गृहमिदमनेनैव पत्रेणैव चन्द्रकालिकं डुलति । अस्योपरिलिखितविधेः परिपालनाय सामान्यग्राहकाचारेण दत्तप्रतिभूः अमुकाकः तथा द्वितीयप्रतिभूः । एकेन द्वौ द्वाभ्यामेकः । अत्र मतानि । अत्र साक्षिणः । लिखितमिदमुभयाभ्यर्थनया परि० अमुकाकेन ॥

धर्मेण दत्तभूमिपत्रविधिः—

I A सं० १२८८ वैशाखशुदि १५ सोमे यथालिखितराजावलीपूर्वं बालूआग्रामे धर्मपत्रमभिलिख्यते यथा । यदिहैववास्तव्यविप्रदामोदरसुतठ० मुकुन्देन संसारविलसितं क्षणदृष्टविनष्टमनित्यं नित्यः केवलो धर्म एव शाश्वत इत्यादि वैराग्यं तथा संसारासारतां च स्वमनसि निश्चयपूर्वं विचिन्त्य श्रीसोमपर्वणि उनाउआवास्तव्यजानीविद्यानिधिसुतजानीहरिहरशर्मणा द्विवेदाय विप्रवराय उनाउआग्रामीयस्वीयडोहलिकाभूमीमध्यात् तद्ग्रामीयग्रामेयकानां धर्मस्थानिनां अन्येषां विप्राणां च विदितं धर्मेण प्रदत्तभूमीहल १ हलैकस्य भूमी धर्मेण प्रदत्ता । अद्यदिनानन्तरं जानीहरिहरेण मया धर्मेण दत्तहलैकभूमेरायपदमाचन्द्रार्कं पुत्रपौत्रादिसन्तानपरंपरया भोगवनीयम् । इहार्थे लिखितपत्रं समस्तग्रामाधिवासिनां राजवर्गिणां च विदितं मुकुन्देन । तथा स्वीयसमस्तगोत्रकुटुम्बानां च स्वहस्तेन प्रदत्तमतानि । तथा तद्ग्रामाधिवासिनां चातुर्वर्ण्यलोकानां साक्षिणश्च । तथा समस्तकुटुम्बाभ्यर्थितेन पारथीजयसिंहेन लिखितमिदं धर्मपत्रं हीनाक्षरमधिकाक्षरं वा प्रमाणम् । खश्चा केनापि न विधातव्या इति ।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समस्तराजावलीपूर्वं वाल्हूआग्रामे धर्मपत्रमभिलिख्यते यथा ॥ इहैववास्तव्य-ब्राह्मणअमुकसुतअमुकाकेन संसारासारतां विचिन्त्य सोमपर्वणि प्रभासक्षेत्रे अमुकज्ञातीयब्राह्मणअमुकाय ग्रामीयडोहलिकामध्यात् तेषां ग्रामीयग्रामेयकानां धर्मस्थानिनां च विदितमाचन्द्रार्कं धर्मेण प्रदत्तभूमी हलः १ हलैका भूमी ब्राह्मणद्विवेदअमुकाय स्वपितुरात्मनश्च श्रेयसे प्रदत्ता । आचन्द्रार्कं धर्मेणाद्य-दिनानन्तरं तदीयपुत्रपौत्रपरम्परया एषा प्रदत्ता भूमी भोक्तव्या ॥ अत्र मतानि । अत्र साक्षिणः । समस्तपुत्रभ्रातृगोत्रविदितमभिलिख्यते ॥

दासीपत्रविधिः—

I A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथापूर्वलिखितराजावलीपूर्वं दासीविक्रयपत्रमभिलिख्यते यथा । यत्परराष्ट्रोपरि दत्तधाट्यां राणाश्रीप्रता-पसिंहेनानीता गौरवर्णा षोडशवार्षिकी पनुतीनाम्नी दासी शिरसि तृणं दत्वा पञ्चमुखनगरविदितं चतुष्पथे रहाप्य विक्रीता । व्यवहारकआसधरेण दासी-कर्मकरणाय राणाश्रीप्रतापसिंहस्य वीसलप्रियद्र० ५०४ चतुरधिकपञ्चशतानि द्रम्मान् दत्वा पनुती नाम दासी समस्तनगराधिवासचातुर्वर्ण्यलोकानां विदितं मूल्येन गृहीता । अतःपरमनया दास्या व्यवहारकगृहे खण्डनपेषणगृहलिम्पन-सम्मार्जनेन्धनानयनपानीयोद्वहनादिकं मूत्रपुरीषोत्सर्गादिकं महिषीगोअजादो-हनादिकं दधिविलोडनं तथा क्षेत्रखलके तक्रानयनं चारिआनयनादिकं निन्दन-कर्तनादिकं क्षेत्रकर्म अन्यदपि गृहकर्म सर्वमकुटिलबुद्ध्या करणीयम् । इत्थं प्रवर्त-मानाया दास्या व्यवहारदेशकालानुरूपं विभवानुमानेन भोजनाच्छादनादिकं सर्वमप्रार्थितं दातव्यम् । तथा अस्या दास्या व्यवहारकगृहे कर्म कुर्वत्याः तस्याः पिता भ्राता भर्ता वा धनिकत्वं विधाय कर्मविघातं कारयति तदा व्यवहार-केण बन्धताडनादिघातैर्निर्दयं ताडयित्वा पुनरपि समग्रपत्रलिखितदासी-कर्मणि नियोजनीया । दासीयं यदि कदाऽपि ताड्यमाना कूपकपतनादि आत्मघातं कुरुते, तदा गर्दभी शुनी चाण्डाली भूत्वा सा दासी म्रियते । व्यवहारकस्य गङ्गास्नानम् । अस्योपरिलिखितविधेः पालनाय निर्वहणाय द्यावा-पितरक्षपालाः तथा नगराधिवासिनः साक्षिणश्च । इहार्थे राणाप्रतापसिंहस्य तथा रक्षपालानां चतुर्णां च यथानाम्नां स्वहस्तेन प्रदत्तमतानि । लिखितमिदं पत्रं उभयाऽभ्यर्थितेन पारथीजयताकेन हीनाक्षरमधिकाक्षरं वा प्रमाणमिति ।

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपाटके

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समस्तराजावलीपूर्वमद्येह वालूआग्रामे दासीपत्रमभिलिख्यते यथा । धनिको नाम नामतः इहैववास्तव्यश्रे०खेताकः स्वधनं लाभाय प्रयुङ्क्ते । अस्य च हस्ताद्धारणिको नाम नामतः । इहैववास्तव्यराज०अमुकाकेन महाराष्ट्रोपरि चटितेन महामण्डलेश्वरराणकश्रीवीरधवलदेवधाट्यां समानीता गौरवर्णा षोडशवार्षिकी सुविषया सुलक्षणा अमुकनाम्नी विक्रीता। दासीमूल्ये द्र० ६० षष्टिद्रम्माः ।अद्यदिनानन्तरमनया दास्या स्वभावविनयनम्रया व्यवहारकगृहे खण्डनपेषणसम्मार्जनरन्धनसमालेपनादि अन्यदपि क्षेत्रखलकादिकं च सर्वमपि करणीयम् । अन्यत्र विक्रीणाति धर्मेण वा ददाति तत्र सर्वमप्यकुटिलबुद्ध्या कर्तव्यम् । यदि व्यवहारकगृहे चौर्यादिकं किमप्यन्यायं करोति तदा अस्या दास्यास्ताडनादिशिक्षा कार्या। यदि ताड्यमाना सती कूपतडागादिस्थानं करोति तदा एषा गर्द्दभचाण्डालन्यायेनास्थानं कृत्वा म्रियते । एषा आत्मघातका आत्मनैव लेपेन लिप्यते । निर्दोषव्यवहारकस्य गङ्गास्नानम् । तथास्या दास्या व्यवहारकगृहे कर्म कुर्वत्या धारणिकेन तदीयभ्रात्रा सुतेन स्वजनेन वा चक्षुःसञ्ज्ञया भ्रूसञ्ज्ञया कृत्रिमभर्त्रा वा कृत्वा कर्मविघातो मनसा विघातो वा कस्मिन्नपि विषये न कार्यः । धारणिकेन व्यवहारकेण वा कस्मिन्नप्यर्थे कुटिलबुद्ध्या न कर्तव्यम् । अस्योपरिलिखितविधेः पालनाय सर्वकार्यकरणादिविनाशादिरक्षणाय दत्तप्रतिभूः भ्रातृराज०अमुकाकः तथा कार्यकरणविषये अन्तरा प्रतिभूः । देवश्रीवैद्यनाथपत्रमुत्पाटयति । अत्र मतानि । अत्र साक्षिणः ॥ लिखितमिदम् ॥

स्वयमागतदासीपत्रविधिः—

I A सं० १२८८ वैशाखशुदि १५ सोमे यथापूर्वलिखितराजावलीपूर्वं स्वयमागतदासीपत्रमभिलिख्यते यथा । यत्पूर्वदिग्भवमहीतटदेशादागता सिरनारग्रामीया राजपुत्री जगडसुता दशवर्षीया संपूरीनाम्नी दुर्भिक्षवशादथ म्लेच्छैः व्यापादिता राष्ट्रलूषितनिखिलान्तेषु विसंष्ठुलनागरिकलोकेन समस्तकुटुम्बेन परित्यक्ता मात्रा पित्रा भ्रात्रा भ्रातृपुत्रपितृव्यकप्रभृतिपितृगृहकुटुम्बेन तथा श्वश्रूश्वशुरपतिज्येष्ठदेवरप्रभृतिश्वशुरवर्गेणापि न वारिता उभयोरपि पितृवर्गश्वशुरवर्गयोः कुटुम्बं दुर्भिक्षवशात् भिक्षाटनं कुर्वाणं परिज्ञाय एकाकिनी अधोमुखं नीत्वा निसृता । प्रतिग्रामं प्रतिगृहं कवलान्नं याचमाना, तदनु तस्यापि उदरपूरणाप्राप्तिवशादत्यन्तकृशा, मलिनगात्रा, जीर्णवस्त्रखण्डावृता, देवगृहमठप्रपासत्राकारादिस्था-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नेषु निवासिनी, घृष्टमूर्द्धका समस्तदिशो कान्दिशीकवद्विलोकयन्ती, क्षुत्पिपासादिना अन्यथा इत्येवं विचिन्तयन्ती सती यदहं किं करोमि, क्व गच्छामि, क्व तिष्ठामि, को मे अनाथायाः स्वामी भविष्यतीति, केवलं मृत्युतुलामापन्ना, देव ! अनाथाहं प्रतिगृह्णमिति वदन्ती कोऽपि दासीं रहापयतीति भाषमाणा विधिवशादित्थं परिभ्रममाणा सती अमुकवर्षमासतिथौ अमुकग्रामवास्तव्यवाणि०चाहडपादयोर्लगित्वा हस्तौ च संयोज्य स्वयमागत्यात्मानं दासीकर्मणि नियोजितवती त्वं मां कालापदिष्टदुर्भिक्षात् त्राहि । अहं युष्मदादेशेनामरणान्तं यावद्दासीकर्मणि युक्ता सती खण्डनपेषणसम्मार्जनपानीयानयनगोमयानुलेपनमूत्रपुरीषोत्सर्जनसमस्तगृहकर्म बाह्यकर्म कृषिकर्म क्षेत्रखलकादिसर्वकर्म सोत्साहा सती वर्षाशीतोष्णकालत्रयेऽपि दिवारात्रौ आलस्यरहिता निरुत्तरा सर्वं दासीकर्म युष्मादेशितं करिष्ये । भवद्भिः स्वशक्त्या मम केवलं भोजनाच्छादनोपानहादि दातव्यम् । अधिकं किं याचिष्ये । इति नगरचतुष्पथे समग्रचातुर्वर्ण्यलोकविदितं वाणि०चाहडेन तस्याः कथितं मानयित्वा सा दासीकर्मविषये रहापिता । तया पुनरपि तदा वाणि०चाहडपुरतो निजप्रतीतिदानाय ईदृशी श्रावणा सर्वनगरप्रत्यक्षं विहिता । यदहमामरणान्तं युष्मदावासेऽथान्यत्रापि दासीकर्म कुर्वाणा चौरिकां करोमि, गृहमध्ये पतितमथ शून्यं दृष्टं वस्तु गृह्णामि, अथ सुभिक्षे सञ्जाते पलायनं कृत्वा अन्यत्र क्वापि व्रजामि, अथ यौवने केनापि विप्रतारिता प्रलोभिता सती निर्गत्य व्रजामि, अथ कूटकपटवंचनद्रोहादिकं युष्मद्वैरिणा सह मिलित्वा करोमि कारापयामि, ततोऽहं अस्य लिखितपत्रस्य प्रमाणेन केशेष्वाकृष्य बन्धनताडनादिकं च कृत्वा पुनरपि दासीकर्मणि नियोजनीया । अहमहर्निशं सर्वकालं समस्तयुष्मत्कुटुम्बस्यादेशं करिष्ये । अथ कदापि परिपूर्णा सती कुटिलबुद्ध्या सर्वं समादिष्टं दासीकर्म न करोमि ततो भवद्भिः पादप्रहारैर्यष्टिप्रहारैश्च यदृच्छया व्यापाद्यमाना म्रिये । ततो मम निजः स्वामी अनागत एव निर्दोषः कृतोऽस्ति । चातुर्वर्ण्यलोकैः सर्वैरवधारणीयं यदहं स्वकर्मवशाद्दैवहता मृतास्मि । मत्स्वामिनः पुत्रपौत्रकलत्रादिपरिवारसहितस्य गङ्गास्नानम् । अथ कदाप्युदरबाधां करोमि, कूपतडागविषभक्षणादिना म्रिये, ततोऽपि मया पञ्चमुखनगरविदितं निजस्वामी निर्दोष एव विहितोऽस्ति । अहं कृतपूर्वकर्मविपाकेन दैवहता मृता । मत्प्रभोः सपरिवारस्य गङ्गास्नानमेव । इहार्थे पञ्चमुखनगरविदितं आमरणान्तं दासीकर्मणि रहणाय

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अमुकामुकाधिवासब्राह्मणपञ्चकुलमहाजनविदितं साधीयासाभिज्ञानसहितं स्वहस्तेन प्रदत्तमतम् । पञ्च साक्षिणश्च ॥

C पूर्विकासंवत्सरादि पूर्ववत् । कस्मादपि स्थानात् कस्यापि सुता स्वकर्मभिः प्रेरिता अमुकनाम्नी द्वादशवर्षप्रमाणा गौरवर्णा लम्बकर्णा मृतभर्तृका उत्सन्नपितृमातृश्वशुरज्येष्ठदेवरोभयबन्धुवर्गा अनाथा कृष्णाक्षी तीक्ष्णनासा उच्छन्नकेशा नातिदीर्घा नातिह्रस्वा अविकलसकलेन्द्रिया एवंगुणोपेता प्रत्यक्षा एव वर्तते । तदनया दास्या अद्यदिनादारभ्य स्वजीवितान्तं यावत् ग्राहकअमुकाकगृहे अस्य वादेशेन अन्यगृहे अन्यपरिवारे खण्डनपेषणरन्धनसम्मार्जनोपलेपनपानीयोद्वहनकर्षणहस्तपादप्रक्षालनखालकुण्डिकोल्लुञ्चनकृषिपाशुपाल्यदूरासन्नगमनमित्यादिगृहक्षेत्रखलकादीनां समस्तानि कर्माणि दिवा रात्रौ वा शीतातपादिक्षुधापिपासार्दितदासीत्वं करणीयम् । तदियं नवनवत्याचारेण मूल्यक्रीता दासी ग्राहकेण अङ्गणके मोक्तव्या । धर्मेण दातव्या । अथ स्तोकबहुद्रव्याकाङ्क्षया परदेशे वा प्रहित्य प्रवहणके चटाप्य परद्वीपे प्रस्थाप्य द्रव्येण वस्तुप्राभृतकेन वा विकेतव्या । यत् रोचते प्रभवे भासते तत्करणीयम् । एतस्या दास्या जन्मग्राहकअमुकाकस्य एव एतदीयमानुषाणामपि स्वाधीना इति सती दासीपदे विक्रीयमाणा दुष्कर्मणः प्रमाणेन आत्मसक्तयौवनोद्धता केनापि विप्रतारिता द्रव्यलिप्सया पितृमातृभ्रातृप्रभृतिस्वजनानां प्रीत्या वा ग्राहकअमुकाकस्य गृहात् सर्वप्रकारं प्रणश्य यदि गच्छति तदा हस्तस्थितपत्रेण ग्राहकअमुकाकेन राजकीयशिक्षायामधस्तादपि पातयित्वा केशादिकेष्वाकृष्य तदनु ग्रहणबन्धताडनादिशिक्षां विधाय पुनरपि दासीकर्मणि नियोज्या । अथ एषा दासी बहुकर्मणा······· । अद्यदिनाऽनन्तरं ग्राहकअमुकाकेन पुत्रपौत्रपरंपरया अस्या दास्याः स्वामित्वं करणीयम् । अद्यदिनादारभ्य आजन्ममरणान्तं यावत् ग्राहकअमुकसक्तपितृभ्रातृभ्रातृपितृव्यकस्वजनबन्धुवर्गप्रभृतीनां लागभागो नहि । बालेपि वृद्धा ग्रन्थिर्नहि ।

विभङ्गपत्रविधिः—

A सं० १२८८ कार्त्तिकशुदि १५ गुरावद्येह यथावर्त्तमानराजावलीपूर्वं विभङ्गपत्रमभिलिख्यते यथा । यत् पितुः परलोकं प्राप्तस्यानन्तरं चत्वारो भ्रातरः पृथग्धना जायन्ते । तदेभिश्चतुर्भिर्भ्रातृभिः नैजायमानैः प्रथमं पितृऋणं राजकीयदेयं देवसंबन्धि स्वजनसंबन्धि देयं तथा व्यवहारकाणां च देयं सर्वमेवात्राङ्कं विधाय समग्रगृहवार्त्तायां मणिमाणिक्यप्रवालमुक्ताफलटङ्कनाण-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कसुवर्णरूप्यमयमाभरणं तथा सप्तधातुमयमपरं च घटितमघटितं भूमिगतं ब हिःस्थितं च राच्छपोच्छादिकं तथा गोधूमजोवारिमुद्गमाषव्रीहितिलतूवरि- झालरचुलामालमसूरसरसवप्रभृतिधान्यानि गुडखंडघृततैलमधुप्रभृतिस्नेह- रसास्तथा अश्वोष्ट्रमहिषीगोअजाखरगाडरप्रभृतिचतुष्पदधनं क्षेत्रखलसंबन्धि लांगडिपाटगडाछकडावाहिनीप्रभृतिवाहनानि तथा पावडाकुहाडाकुदालाकु- सिदात्रलोहडीतावाप्रभृतिलोहमयं वस्तु हललाङ्गलप्रहणिदीवडाप्रभृतिकूपक्षे- त्रोपकरणानि भाजनटांवाटीसयकांसीयाप्रभृतिकांस्यमयानि राच्छानि तथा कडाहितांबडीप्रभृतिताम्रमयानि तथा देघीपडघाहींडोलीटकडात्रूजारांधूपहड- पालभृंगारप्रभृतिपित्तलमयानि भाण्डानि च कांस्यताम्रपित्तलवटलोमयं समग्रं वस्तु तथा घण्टीनीशाउदूषलमुसलचुकीवटसेजवटप्रभृतिगृहमण्डनादि राछ- पोछादिकं सर्वं कांजिकाधानीबीजमर्यादीकृत्य अपरं मृण्मयं कुंभणी- गुढाकोठीप्रभृतिकं च सर्वमित्यादिगृहवार्त्ता कुटुंबवृद्धैर्ज्ञातिमुख्यैश्च चतु- र्भिर्जनैर्विचार्य निच्छद्मवृत्त्या पञ्चभिर्विभागैर्विभज्य प्रदत्ता । एको विभा- गो मातुः प्रदत्तः । अवशिष्टाश्चतुरो विभागाश्चतुर्णां भ्रातॄणां प्रदत्ताः। अथ कदाऽपि एकः सुतः सुता वा अविवाहिता भवति, ततः साध्यगृहवार्त्ता- मध्यात् कुटुंबवृद्धानां चतुर्णां मुखेन तेषां पाणिग्रहणोपक्षयः पञ्चभिरपि विभागादेशैः सम एव जनन्या हस्ते दातव्यः । माता निजमनोहार्या यस्य सुतस्य मध्ये रहति तेन निजगोत्रदेवीवत् निजमातुर्भक्तिः कार्या । तथा मातुर्जातु विपत्त्यां और्ध्वदेहिकक्रिया एकादशद्वादशाहप्रभृतिका समस्ता तथा संवत्सरं यावत् दीपदानमासिकषाण्मासिकसांवत्सरं निजकुलाचाररीत्या नवाहपक्षमासत्रिपक्षादिक्रियाः सर्वा मातृविभागग्राहकेन सुतेन श्रद्धापूर्वं प्रतीतिसहितं सर्वं स्वर्गस्थितमातुः श्रेयोऽर्थं कर्तव्यम् । तथा मातुर्विपत्तेर- नन्तरं अपरिणीतबान्धवभगिनीनां विवाहार्थं रहापितपञ्चविभागमध्येऽन्य- द्रव्यं चतुर्भिः कुटुंबवृद्धैः पर्यालोच्य सुशीलस्य श्रद्धापरस्य स्नेहवतोऽव्य- सनिन एकस्य सुतस्य हस्ते दातव्यं, यथा स पितृवत् महाचिन्तापरस्तेषां विवाहं करोति । तथा एभिः सर्वैरपि बान्धवैः पृथग्भूतैः निजनिजविभागा- दत्तद्रव्यं व्यवसायेन वर्धनीयम् । अथ व्यसनैर्भक्षयित्वा न त्रोटनीयम् । तथा सर्वे भ्रातरः पृथग्भूताः स्वीयस्वीयकर्मभाग्यवशात् नवीनं द्रव्यं लक्षसंख्य- या उपार्जयन्तु । अथवा अग्रीकमप्यामूलं भक्षयन्तु । पुनरात्मनां मध्ये पर- स्परं कस्यापि ऋद्धिमतो बान्धवस्य समं हीनवित्तेन बान्धवेन तृष्णाभिभूतेन

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वाद्विवादः कीदृशोऽपि न विधातव्यः । परस्परं भागविभागः कीदृशोऽपि नहि । तडागेऽपि पानीयं साध्यं नहि । परस्परमात्मनां मध्ये केवलं जातमृतसूतकेन गृह्यते । अन्यः कोऽपि भागसंबन्धो नहि । परस्परमेकस्य व्यवहारेणापि न गृह्यन्ते । आत्मीयकृतकर्मणा सर्वेऽपि गृह्यन्ते । अथ चतुर्णां भ्रातृणां मध्यादेकः कोऽप्यात्मीयविभागात् द्रव्यं भक्षयित्वा अपरेषामृद्धिमसहमानो गृहवार्त्तायाचनाय कूटकपटं कुरुते स कुटुंबवृद्धैः तथा परपुरुषैः दावापितरक्षपालैश्च चतुर्भिर्जनैः लिखितविभङ्गाक्षरप्रमाणेन विधिलोपकर्ता निवारणीयः । इहार्थे समस्तभ्रातृणां तथा यथाज्ञातीययथानामदावापितरक्षपालानां पृथक् स्वहस्तेन दत्तमतानि । तथा ज्ञातिवृद्धानां विभागकर्तॄणां चतुर्णामपरेषां च बहूनां पत्र लिखितसाक्षिवादसहितं विभङ्गपत्रं प्रमाणमिति ॥

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे अद्येह बालूआग्रामे श्रेष्ठी अमुकाकस्तथा सुतअमुकाकः अनयोर्विभङ्गपत्रमभिलिख्यते । पूर्वपुरुषोपार्ज्जितहेमरूपताम्रादिकं तथा कर्प्पूरकस्तूरीकुङ्कुमादिकं तथा पट्टकूलशणादिकं तथा जोवारिकरडिगोधूममुद्गउडदादिकं तथा घोटकोष्ट्रमहिषीगोबलीवर्दादिकं जीवधनं तथा दासदासीप्रभृतिकं तथा गृहोपस्करखट्वादिकं राछपोछादिकं च गोत्रजवृद्धपुरुषैरन्यैश्चास्य नगरप्रवीणैः अमुकनामभिरुभयाभ्यर्थितैः कार्यकारणबाह्यन्यायपूर्वमेतत्पाश्चात्यलिखितवस्तुप्रभृतिकं अनयोरपि विभज्य समर्पितम् । उभावपि सम्बुद्धौ । उभाभ्यामप्यात्मीयात्मीयपक्षात्प्रतिभुवौ दत्तौ । अद्यदिनानन्तरमुभाभ्यामप्यात्मीयविभाग उपार्ज्य वर्तनीयः । पूर्वोपार्ज्जितादिविषये ऽन्योन्यं केनापि कस्यापि सन्मुखं नावलोकनीयम् । पूर्वोपार्ज्जनादिविषये परस्परं लागभागो नास्ति । तडागेऽपि साध्यं पानीयं नास्ति । अस्योपरिलिखितविधेः पालनायोभयोरपि कलहनिवारणाय दत्तप्रतिभूः श्रे०अमुकाकस्तथा द्वितीयपक्षादत्तप्रतिभूः श्रेष्ठी अमुकाकः । अत्र मतानि अत्र साक्षिणः । लिखितमिदमुभयाभ्यर्थितेन समस्तकुटुम्बविदितं अमुकाकेनेति प्रमाणम् ।

गर्दभपत्रविधिः—

A सं० १२८८ वर्षे वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं गर्दभपत्रमभिलिख्यते यथा । यत् कस्यचित् साधुवृत्तविप्रस्य न्याये वर्त्तमानस्यैव केनाऽपि पिशुनेनास्य विप्रस्य ऋद्धिं प्रसिद्धिं चासहमानेन विप्रस्य दण्डापनाय श्रीमद्राजकुले सत्यानृतनिरूपणानि जल्पितानि । ततो

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

राजादेशो धर्माधिकरणीयपण्डितानां निर्णयार्थं सञ्जातः । ततस्तैः पण्डितैर्विज्ञातं राज्ञो यद्वयं विप्रेणानेन दत्तं गर्दभपत्रं विना न्यायं न कुर्मः । तदनु तेन साधुविप्रेणोक्तं यद्यहं धर्माधिकरणीयपण्डितानां राजकुलस्य च न्यायं कुर्वतां उत्पन्नाधिना जातसन्तापेनाभिघातं करोमि , ततो गर्दभचाण्डालन्यायेन म्रिये । धर्माधिकरणपण्डितानां राजकुलस्य च गङ्गास्नानमेव । इहार्थे उपरिलिखितपत्रविधेर्निर्वहणाय स्वश्वासंरक्षणाय च मोढेरामहास्थानीयदुवेरामस्तथा डीसामहास्थानीयत्रिवाडीआलश्रमउभौ विप्रौ रक्षपालौ समग्रपत्रलिखितविधेर्निर्वाहं कुरुतः । इहार्थे धर्माधिकरणे न्यायविचारार्थं आनीतविप्रेण स्वहस्तेन दत्तमतं, तथा अन्तरस्थरक्षपालविप्राभ्यां स्वहस्तेन प्रदत्तमतानि च । तथा तन्नगरनिवासिनां चातुर्वर्ण्यलोकानां साक्षिवादाश्च । साधुविप्रेण तथा रक्षपालविप्राभ्यर्थितेन पारथीजयताकेन लिखितमिदं गर्दभपत्रं हीनाक्षरमधिकाक्षरं वा प्रमाणमिति ॥

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीबालूआग्रामे गर्दभपत्रमभिलिख्यते यथा ॥ कस्यचित्साधुब्राह्मणस्य ऋद्धिं प्रसिद्धिं चापि पिशुनेनासहमानेनालीकं चटापितम् । अथ दैववशाद्भाग्येन लोकमध्ये एतदेवाकाशात्पतितम् । तस्योत्तारणाय श्रीमद्राजकुले गत्वा शुद्धिं ययाचे । ततश्च धर्माधिकरणीयपण्डिता गर्दभपत्रं समर्पयन्ति । यद्यहं धर्माधिकरणीयब्राह्मणानां न्यायं कुर्वतां किमपि आत्मघाताद्यस्थानं करोमि, तदा गर्दभचाण्डालन्यायेनात्मघातकत्वेन म्रिये । धर्माधिकरणपण्डितानां राजकुलस्यैव गङ्गास्नानम् । अस्योपरिलिखितविधेः पालनाय अकरणनिवारणाय दत्तप्रतिभूः । अत्र मतानि । अत्र साक्षिणः । लिखितमिदम् ॥

शीलपत्रविधिः—

A सं० १२८८ वर्षे वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं श्रीवर्धमाननगरे अधिकारिखेतमन्त्रिपञ्चकुलविदितं राज०जगसींहराज०वीरमदेवौ डेडाद्राग्रामीयसीमायाः सन्धिलग्नक्षेत्रविषये परस्परं जातवैरे सभासद्भिः उभयोरपि भाषोत्तरं विचार्य मिलितावपि संबोधितौ । तदनु सभ्यैरुभयोरपि शीलपाला याचिताः यदद्यदिनादूर्ध्वमुभाभ्यामेकपितृमातृजातन्यायेन वर्त्तनीयम् । मत्सरस्थानं केनाऽपि न चिन्तनीयम् । सांप्रतं मर्यादां कृत्वा दत्तग्रासेन मिलितैरपि परमः सन्तोषः कार्यः । उभाभ्यामपि स्वीयपक्षात् दत्तशीलप्रतिभूराठोडजोगमसुतरा०चरकाकः तथा द्वितीयो

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वावेलाभाउमलसुतराज० चित्राक एतावुभावापि लिखितपत्रमर्यादायां शीलरक्षकौ जातौ । यदि संप्रत्यनन्तरं राज० जगसीहराज० वीरमदेवौ डेडाद्राग्रामीयसीमासन्धिलग्नपूर्वविवादयुद्धभूमीमर्यादायाः सभासद्भिर्निर्णीतविधिना यथाकृताघाटविधिलोपं कुरुतः तदा मिलितावपि राजग्राह्यौ दण्डसाध्यौ भवतः । तथा एताभ्यां विनाशस्य समग्रस्य निर्गमं श्रीराजकुले राज० चरकाकरा० चित्रकौ शीलयतः । एकेन द्वौ द्वाभ्यामेकः । एकेन हस्तप्रासेनापरस्य उत्तरो न विधेयः । समग्रविनाशः शीलनीयः । इहार्थे राजजगसींहवीरमयोः स्वहस्तेनाभिज्ञानसमं प्रदत्तमतानि । तथा रक्षपालरा० चरकाराज० चित्राकयोः कटारीसाभिज्ञानेन स्वहस्तेन लिखितमतानि । सभायां सन्तिष्ठमानमुख्यसाक्षिपश्चकं च । पत्रमिदमुभयाभ्यर्थितेन लिखितं पारथीजयताकेन । हीनाक्षरमधिकाक्षरं वा प्रमाणमिति ॥

II B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह वालूआग्रामे शीलपत्रमभिलिख्यते यथा । अमुकग्रामवास्तव्यराज० अमुकाकः तथा अपरग्रामवास्तव्यराज० अमुकाकः इमौ क्षेत्रैकस्य विषये कुटुम्बविषये परस्परं सञ्जातवैरौ अमुकग्रामीयरा० अमुकाकेन सम्बोध्य एकत्रोपवेशितौ । ततश्चोभाभ्यामप्येकमतीभूय शीलपत्रमकारि । अद्यदिनपूर्वमावाभ्यामेकमातृन्यायेन वर्त्तनीयम् । मत्सरस्थानं केनापि न कार्यम् । स्वकीयग्रासेन सन्तोषो विधेयः । केनापि परकीयग्रासस्य स्पृहा न कार्या । उभाभ्यामपि निजपरस्परं शीलप्रतिभूः राज० अमुकाकः तथा लिखितविधेः पालनाय भ्रूसञ्ज्ञया चक्षुःसञ्ज्ञया वा व्यभिचाररक्षणाय दत्तान्तराप्रतिभूः । उभयोः देवश्रीवैद्यनाथपत्रमुत्पाटितम् । अत्र मतानि । अत्र साक्षिणः । लिखितमिदमुभयाभ्यर्थितेन पारि० अमुकाकेन प्रमाणमिति ॥

समयपत्रं तथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह वालूआग्रामे समयपत्रभिलिख्यते यथा । अमुकग्रामीयसमस्तब्राह्मणानामन्योन्यं मध्यादेकस्य कस्यापि विभूतिं लब्ध्वा कोऽपि केनापि द्विजेन समं विग्रहं प्रारभते तदा तस्य द्विजस्य सर्वैरपि द्विजैरात्मीयशम्बलेन साहाय्यं कार्यम् । राणकराजकुलेन स्वीयशंबलेन कार्यम् । अमीषां मध्यात्कस्यापि पिशुनस्य मिलित्वा केनापि भाषाभेदो न कार्यः । अमीषां मध्याद्यः कोऽपि परपक्षैः मिलित्वा भ्रूसञ्ज्ञया चक्षुःसञ्ज्ञया वा राजकुलभाषाभेदं करोति, तदा ब्रह्मघाती लिङ्गभेदी ब्रह्महत्यादिदोषेण

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गृह्यते इत्यर्थं प्रत्येकं सर्वब्राह्मणानां जन्मसुकृतम् । तथा श्रीदेवे दिव्यपूर्वं पत्रमुत्पादितम् । अत्र मतानि । अत्र साक्षिणः । लिखितमिदं उभयाभ्यर्थितेन पारि० अमुकाकेन प्रमाणमिति ॥

यमलपत्रं यथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमद्विजयकटके महाराजाधिराजश्रीमत्सिंहणदेवस्य महामण्डलेश्वरराणकश्रीलावण्यप्रसादस्य च संराजकुलश्रीश्रीमत्सिंहणदेवेन महामण्डलेश्वरराणश्रीलावण्यप्रसादेन पूर्वरूढ्याऽऽत्मीयात्मीयदेशेषु रहणीयम् । केनापि कस्यापि भूमी नाक्रमणीया । उभयोर्मध्याद्यः कोऽपि बलिष्ठः शत्रुणा गृह्यते तदा तस्य शत्रोरुपर्युभाभ्यामपि कटकं कर्तव्यम् । अथ च शत्रुदण्डाधिपो गृह्णाति, तदा दलेन संवाहना कार्या । यद्युभयोरपि देशयोर्मध्यात्कोऽपि राजपुत्रः किमपि विनाश्यापरदेशे प्रविशति तदा स्वदेशे केनापि स्थानं न दातव्यम् ॥ अन्यत्र विनष्टं समारोपणीयम् । लिखितविधेः पालनाय व्यभिचाररक्षणाय दत्तप्रतिभूः । दत्तान्तरं देवश्रीवैद्यनाथपत्रमुत्पादितम् ॥

ढौकनपत्रं यथा—

B स्वस्ति । श्रीपत्तने महामात्यश्रीअमुकाकः इहैववास्तव्यमेहरचांइंआकस्य ढौकनाक्षराणि प्रयच्छति यथा । यन्मेहरलूंणीयाकेन कुलहरकुटुम्बं कृत्वा स्वसुता चांइंआपार्श्वान्मोचापिता । ततो गतदिवसे मेहरचांइंआकेन कुटुम्बसमवायेन आत्मीयस्वजनलोकविदितं आभीरधउलीआकस्य ढौकनव्यवहारेणादायि स्वसुता । ढौकनपत्रं राजकुलाद्गृहीतम् । अतः कालान्तरेऽपि पूर्वभर्त्रा कस्यापि कस्यापि सन्मुखं नावलोकनीयमिति संवत् १२८८ वर्षे वैशाखशुदि १५ सोमे । मतं श्रीः ॥

उत्थानपत्रिकाविधिः—

A स्वस्ति । श्रीवर्धमानमण्डलकरणात् महाराजाधिराजश्रीसारङ्गदेवविजयिनां महामात्यश्रीआलिगपादानामादेशात् व्यापारनियुक्तश्रीकरणचांडसींहपञ्चकुलं जांबूग्रामे लभ्यराजकीयद्रम्माणां संबन्धे विलहितदू०मालदेवसमं भट्टपुत्र ८ समस्तभट्टपुत्राणां दू०मालदेवस्य च उत्थानपत्रिकां प्रयच्छति यथा । यत् राजादेशप्रमाणेन राणाखेताकेन जांबूग्रामीयसमस्तराजकीयपदार्थानां लभ्यद्रम्माणां शोधनं भण्डारीनागडसमं विहितम् । भण्डारी-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नागडेन अस्माकं पुरतः श्रीराजकीयसमस्तपदार्थानां लभ्यद्रम्माः भांडागारप्रविष्टाः मानिताः विशुद्धिसहिताः । अतो भवता समस्तविलहितभट्टपुत्रैः समं दृष्टादेशेन इहागन्तव्यम् । तथा विलहितभूर्जपत्रस्य प्रथमदिनादारभ्य अद्यदिननिरुद्धं प्रहितउत्थानपत्रिकाप्रमाणेन चटितदिनानां कणभक्तकानि तथा यथालिखितभूर्जद्रम्मान् अपि विशुद्धिसहितान् नीत्वा सपदि आगन्तव्यम् । इहार्थे दूयके स्वयमादेशः । साभिज्ञानश्रीकारोऽवगन्तव्यः ॥ सं० १२८८ वैशाखवदि १३ सोमे उत्थानपत्रिका प्रमाणम् ॥

कृष्णाक्षरउज्ज्वलाक्षरविधिः—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथावर्त्तमानराजावलीपूर्वं कृष्णाक्षराणि लिख्यन्ते यथा । यत् संघवीपदमसुतपूनाकः अन्यायेन विचरमाणो भणित्वा राजकुले आनीय पितृमातृभ्यां समस्तकुटुम्बसमेताभ्यां समस्तश्रीपत्तनाधिवासिनां पञ्चमुखब्राह्मणानां विदितं तथा पञ्चमुखनगरस्य महाजनसमक्षं च ईदृशं प्रघोषं जल्पित्वा पूनाकः कालाक्षरितः यत्संप्रति पश्चादेतदीयकृतान्याये पितृभ्रातृपितृव्यकभ्रातृपुत्रप्रभृतयः तथा समस्तगोत्रिणो दायादा अन्ये राजग्राह्या न भवन्ति । अस्याचरितानाचारेणास्माकं राजग्रहो राजदण्डो न पातयितव्यः । अद्य दिनात् यद्यसौ बहूनपराधान् कुरुते, अथ भाण्डागारं विदारयति, अथ पाटहेडाहेतोः शस्त्रघातं विदधाति, अथ नगरमध्ये कस्याऽपि विप्रक्षत्रियसाधुव्यवहारकप्रभृतीनां महिलां सुरूपां दृष्ट्वा दूतिकामुखेन द्रव्यलोभं दर्शयित्वा विप्रतार्य गृह्णाति, अथ बाह्ये गता सती बलादेवाकृष्यादाय काप्यन्यत्र बाह्यग्रामे देशान्तरे वा व्रजति, अथ मार्गे वहमानवच्छीवित्तवणिज्याकारादीन् वित्तलोभवशात् व्यापादयति, अथाखाद्यखादनमपेयपानमवध्यवधमगम्यागमनमनाचारं साधुलोकविरुद्धमाचरति, ततोऽप्यस्य समस्तलिखितापराधैः अन्यैरपि प्रचण्डदूषणैराचरितैर्दुश्चरितैरसंभाव्यैः अविवाहितैः अस्य पितृवर्गीयभ्रातृवर्गीयस्वजनसंबन्धिगोत्रवर्गदायादवर्गादृष्टमित्रादिः कोऽपि राजकुले दण्डसाध्यो न भवति । एतस्य कृतापराधैः एष एव दण्डसाध्यो निग्रहणीयः । प्राणान्तिकमपि प्रापणीयो भवति । अस्य उल्लिखितकुटुम्बवर्गः स्वजनवर्गश्च अस्य कृष्णाक्षरितस्य जातमृतसूतकेन न गृह्यते । अपरं यद्दिनानन्तरं यदि पूर्वस्नेहेन तद्वर्गमध्यादस्य कृष्णाक्षरितस्य प्रच्छन्नं आच्छादितं गुप्तं प्रकटं स्थानदानरहणभोजनाच्छादनादिकं गुप्तं प्रकटं वा ददाति स एव राजकुले दण्ड-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

साध्यो भवति। अथ कस्याप्यन्यस्य पार्श्वादक्षिसंज्ञया भ्रूसंज्ञया वा तस्यान्यायिनो भोजनाच्छादनद्रव्यादिकमुपायान्तरेण ददाति दावापयति स तस्य कालाक्षरितस्य पार्श्वादधिको अन्यायी भणित्वा राजकुले निग्रहणीयः। अथ कदापि कुटुंबेन परित्यक्तः कष्टं सहमानः क्षुत्पिपासार्दितश्चित्तेऽनुशयं विचिन्त्य कालान्तरेण सानुकूलदैववशात् पुनरपि साध्वाचारे समायातो भवति, कुटुंबस्य मिलनायाभिलाषं कुरुते, तथा एतदीयकुटुम्बमपि सदाचारे प्रवर्त्तमानं लोकोक्त्या स्वयं च परिभाव्य पुनरपि कुटुम्बमध्ये प्रवर्त्तमानं कर्त्तुमिच्छति, ततः कुटुम्बवर्गेण स्वजनवर्गेण चासौ निजमनोहार्यो कुटुम्बमध्ये वर्त्तमानो न विधेयः। तद्वर्गीयैः पितृमातृपक्षीयैः सर्वैरपि स्वजनवर्गेण च राजकुले यात्वा स्वामिनो निजविभवानुरूपं माङ्गलिक्यं किमपि दत्वा परिवारं च सन्तोषयित्वा यथोचितं राज्ञो विज्ञाप्य समस्तनगराधिवासविदितं लिखितकृष्णाक्षराणि विदारयित्वा पुनरेवाधिवासविदितं स्वामिनोऽग्रे उज्ज्वलाक्षराणि धर्माधिकरणे लिखाप्य अग्रेकृतापराधानां विषये स्वामिनः पार्श्वात् पृष्ठौ हस्तं दावाप्य पुनरपि सदाचारो भणित्वा पञ्चमुखनगरविदितं कुटुम्बमध्ये उज्ज्वलाक्षरैर्हस्तगतैर्व्यवहरमाणः कर्तव्यः। अथ नगरमध्ये अग्रेकृतानेकापराधैः कस्याप्युपालम्भयोग्यो न भवति। इहार्थे धर्माधिकारसभासदां पुरतः सर्वेषां स्वहस्तेन दत्तमतानि। तथा बहवः साक्षिणश्च कर्तव्याः। इत्यादि अक्षराणि धर्माधिकरणनियोगिनां दत्वा तस्य कालाक्षरितस्य मातृपितृभ्यां उपरिलिखितविधिना तस्य कृतापराधानां निग्रहनिषेधार्थं अभयदानाक्षराणि राजमुद्राङ्कितानि सन्मुखानि ग्रहीतव्यानि। तथा उज्ज्वलाक्षराणि ग्राह्याणि। अनेन विधिना कृष्णाक्षरउज्ज्वलाक्षरप्रबन्धः।

दानमण्डपिकापत्रविधिः—

A संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह श्रीमदणहिल्लपत्तने यथासन्तिष्ठमानराजावलीपूर्वं महामात्यश्रीआलिगपञ्चकुलं श्रीनुसारीपथके समस्तमाण्डवीपथकीयाकानां प्रतिसारिणां उपरहींडीयाप्रभृतीनां सर्वेषां दानसंबन्धिकानां समादिश्यते यथा। यत् षष्ठ्यधिकशतक्रियाणकालङ्कृतमुखेन प्राग्निस्साररीतिप्रमाणेन आगमनिगमदानं वच्छीवित्तानां पार्श्वात् ग्रहीतव्यम्। अरीतिरयुक्तिः काऽपि वच्छीवित्तानां समं न व्यवहरणीया। विकरपदानि च प्राग्रीतिप्रमाणेन ग्राह्याणि। प्रतीसारकैः क्षिप्राभाव्याः ऊर्ध्वमधिकं किमपि न ग्रहीतव्यम्। पाग्रीते ऊर्ध्वमनाचाराः केऽपि न

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कार्याः । यदि वच्छीवित्तान् दूहवित्वा अयुक्त्या किमप्यधिकं दानं गृह्यते तथा दानसक्तद्रम्माणां लभ्यानां बलात् वच्छीवित्तानां पार्श्वात् पण्यग्रहणं किमपि निजमनोहार्या गृह्यते तदा देशान्तरभाण्डानामप्रवेशकरणं वच्छीवित्तैर्दूहवितैर्जायते । मार्गोऽपि सुन्दरो न वहति । इति मत्वा मार्गे वहमानविणजारावच्छीवित्ताश्च मानपुरःसरं सुन्दरेणावर्जनीयाः । तथा अग्रतः पार्श्वात् श्रीपत्तनमालवकस्यान्तराले मण्डलकरणेषु राउलराणकप्रभृतीनां व्यापारिणां वच्छीवित्तानां पार्श्वादन्यायेन बुलारामिषेण कोऽपि किमपि याचते स निषेधनीयः । नो वा श्रीअस्माकं सुव्यक्तं विज्ञाप्यम् । अत्रार्थे श्रीकारमुद्राङ्कितं लिखितं प्रमाणम् ॥

हस्ताक्षराणि यथा—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह यथासन्तिष्ठमानराजावलीपूर्वं हस्ताक्षराणि लिख्यन्ते यथा । धनिको नाम नामतः श्रीपत्तनवास्तव्यश्रीमालज्ञातीयव्य०जगसीहसुतपूनाको लाभाय स्वधनं प्रयुङ्क्ते । अस्य च हस्ताद्धारणिको नाम नामतः । इहैववास्तव्यनागरज्ञातीयमहं०मालासुतपूनाकेन स्वीयसमुत्पन्नप्रयोजनवशात् श्रीश्रीमालीयखरटङ्कशालाहतत्रिःपरीक्षितकणसुवर्णहट्टिकायांव्यवहरमाणश्रेष्ठजीर्णविश्वमल्लप्रियगृहीतोद्धार द्र० ५०४ चतुरधिकपञ्चशतानि द्रम्मा व्य०पूनसीहपार्श्वात् गृहीताः । अमीषां द्रम्माणां व्याजेन मासं शतं प्रति द्र० २ चटतः । अमी द्रम्माः चटितव्याजसहिताः कलिकावलिकुचटवर्जं निर्विवादा मया अष्टप्राहरिक्या एकमुष्ट्या व्य०पूनसीहस्य देयाः । अमीषां लिखितपत्रप्रमाणेन सव्याजकद्रम्माणां दावापनाय स्वयं ग्रहीतारौ इव दावापितप्रतिभूर्गूर्जरज्ञातीयवा०मोखासुतपूनाकस्तथा ओसवालज्ञातीयमहं० रतनसुतमहं०राजड उभौ प्रतिभुवौ दापितौ ॥ एकेन द्वौ द्वाभ्यामेकः । धुरप्रतिभुवोरन्तरं नहि ॥ एकेन प्रतिभुवा हस्तप्राप्तेन द्वितीयस्योत्तरमकुर्वाणेन व्यवहारकसमं लिखितपत्रविधिर्धारणिकवन्निर्वहणीयः । इहार्थे मुख्यसाक्षित्रयविदितं धुरप्रतिभुवोः स्वहस्तेन दत्तमतानि । लिखितमिदमुभयाभ्यर्थितेन पारथीजयताकेन हीनाक्षरं अधिकाक्षरं वा पत्रं प्रमाणमिति ॥

सन्मुखहस्ताक्षराणि—

A सं० १२८८ वैशाखशुदि १५ गुरावद्येह श्रीपत्तने यथासन्तिष्ठमानराजावलीपूर्वं सन्मुखहस्ताक्षराणि लिख्यन्ते यथा । यत् श्रीमालज्ञातीयमहं०पूनासुतमालाकः इहैववास्तव्यगूजरमहं०कवणासुतपूनाकस्य सन्मुखहस्ताक्षराणि प्रयच्छति यथा । यत् मम पार्श्वात् व्यवहारेण महं०पूनाकेन व्याजसमेतगृहीतद्र०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

४०० चत्वारि शतानि द्रम्माः सव्याजा यथालिखितपत्रविधिना जल्पितावधौ एकमुष्ट्या रौक्या एव प्रवेशिताः। अमीषां द्रम्माणां लिखितपत्रस्य पतितस्य निर्गमनस्य विषये महं०धरणासमं लागः सम्बन्धः कीदृशोऽपि नहि। अस्योपरिलिखितविधिपलापनाय समस्तखश्चानिवारणाय च दावापितांतरस्थअमुकामुकज्ञातीयौ अमुकामुकनामानौ द्वौ रक्षपालौ महं० मालाकं महं० धरणासमं उपरिलिखितद्रम्माणां प्रवेशितानां व्यतिकरे वादविवादं कुर्वाणं निवारयतः। इहार्थे स्वहस्तेन धुरप्रतिभुवोः साक्षिसुजनपञ्चकसमं दत्तमतानि। प्रमाणानि।

स्वहस्ताक्षराणि यथा—

B संवत् १२८८ वर्षे वैशाखशुदि १५ सोमेऽद्येह वालूआग्रामे व्य०अमुकाकः अमुकाकसुतः स्वपितुः स्वकीयहस्ताक्षराणि प्रयच्छति यथा। यन्मया आत्मीयविभागस्याऽपि उद्धार्यव्यवहारार्थं स्वपितुः अमुकपार्श्वात् गृहीतद्र० ५०० पंचशतानि। यद्यहं स्वपितुः पार्श्वाद्भागं ग्रहीष्यामि तदा आत्मविभागात् पञ्चशतानि पातयिष्यामि। अस्य लिखितविधेः दत्तप्रतिभूः व्यव० अमुकाकः। अत्र मतानि। अत्र साक्षिणः। लिखितमिदममुकेन।

अभयाक्षराणि यथा—

B स्वस्ति। श्रीअमुकाकः अमुकस्थाने अमुकस्याभयाक्षराणि प्रयच्छति यथा। भवदुपरि श्रीमद्राजकुलस्य प्रसादं कुर्व्वतः श्रीश्रीकरणीयउद्धारद्रम्माः प्रसादेन मुक्ताः। अग्रीकसमस्तदोषानां मटमटा सञ्जाता। श्रीमद्राजकुलेनास्माभिश्च भवत्पृष्ठे हस्तः प्रदत्तोऽस्ति इति मत्वा सत्वरमत्रागन्तव्यम्। शङ्कास्थानं किमपि न कार्यमिति॥

विधिपत्रम्—

C संवत् १५३३ वर्षे ज्येष्ठशुदि ८ भौमे अद्येह नरसमुद्रमण्डलकरणे महं० श्रीअमुकअमुकप्रभृतिपञ्चकुलप्रतिपत्तौ विधिपत्रमभिलिख्यते यथा। न्यायोपविष्टश्रे०अमुकप्रभृतिजन ४ श्रेष्ठिविषयकअमुकप्रभृतिजन ४ अमीषां अग्रतो मारायां (?) उभयपक्षोपक्षयादिकं अर्धार्धेन दातव्यम्॥

भाषोत्तरं यथा—

C ज्येष्ठशुदि ८ भौमे अमुकामुकेन लिखापितं यत् एतदीयसुतअमुकाकेन खलके क्षेत्रे च निशायां माषकणाश्चोरिताः। यदि चोरिता न भवंति, तदा अहं कारणं करोमि इत्यर्थे पञ्चाशद्दशगुणानां द्र० ५०० पणो मुक्तः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अस्य वचनपले वर्तमाने तेनैव प्रभुणा नियुक्तअमुकमण्डलकरणे महं०श्रीअमु-काकप्रभृतिपञ्चकुलप्रतिपत्तौ दायकग्राहकयोरेकमतीभूतयोरेकमतेन ॥

आलापो यथा—

C पूर्विका पूर्ववत् । पञ्चकुलमालापं प्रयच्छति यथा । राज०अमुकाकेन अमुकग्रामस्य पूर्वरूढ्या पलमानदेवदायब्रह्मदायवर्जं संवत् १५३३ वर्षे आलापे देयद्रम्माः ४००० चत्वारि सहस्राणि दातव्याः ॥

श्रीपत्रिका यथा—

C महं० अमुकाकवचनात् अमुकनाल्यां प्रतीसारकअमुकाकस्य लिख्यते यथा । लिखितव्यमिदम् । साहुअमुकाकसत्कमञ्जिष्ठाधोकडां ६० पूग छाट ४ खजूर वाडीयां ८ श्रीषंड गांठि १० । एतत् मोक्तव्यम् । ज्येष्ठशुदि ८ भौमे । मतं । ज्ञातम् ॥

विकरणपट्टको यथा—

C पूर्विका पूर्ववत् । पञ्चकुलं पट्टकं प्रयच्छति यथा । अमुकज्ञातीयअमुक-उत्तअमुकाकेन पूर्वरूढ्या पलमानदेवदायब्रह्मदायवर्जं परम्परारीत्या सां०श्राव-णाद्यं आषाढनिरुद्धं द्वादशमासान् परिकल्पितावधौ अथ यदि अधिकमासकं भवति तदा अधिकमासेन समं त्रयोदशमासान् परिकल्पितावधौ मण्डपिका-पट्टके देयद्र० ६०००० षष्टिः सहस्राणि द्रम्माणां दातव्यानि । अत ऊर्ध्वं स्कन्ध-कव्यवस्था क्रियते यथा । सां०कार्तिकान्ते प्रदेयद्र० १०००० चैत्रान्ते देयद्रम्म ३०००० ज्येष्ठान्ते देयद्र० २०००० एवमनया रीत्या स्कन्धकत्रयेण व्यव-स्थया द्रम्माणां सर्वविशुद्धिः करणीया । अथ यदि राजकदैवकवशात् स्वचक्रपर-चक्रागमात् यावन्ति दिनानि उरन्द्रो भवति तेषां दिनानां सत्कदिनपाटिकाः पट्टकाङ्कप्रमाणेन श्रीमद्राणकैः पातनीयाः । अस्य समस्तलिखितपत्रविधेः परिपालनाय द्रम्माणां दानाय दत्तप्रतिभूः अमुकउत्तअमुकाकः ॥

चीठिका यथा—

C संवत् १५३३ वर्षे ज्येष्ठशुदि ८ भौमे श्रीचीठिका यथा । राजादेशात् अथ महन्तकअमुकवचनात् कोष्ठागारपञ्चकुलस्य लिख्यते यथा । पदातिअमुकाकस्य भाद्रमासीयकणभक्तसक्तजोवारि०॥। ३ आज्यं ०) १॥। अनया रीत्या कण-भक्तसक्तजोवारि आज्यं च देयमिति । दू०स्वयमादेशः । दू० अमुकाकः ।

८–९ लेखप०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लेखपद्धतिः

II

D प्रणम्य शम्भुं गुरुपादपद्मं पत्रस्थितं लेखविचित्ररूढम् ।
कायस्थकण्ठस्य विभूषणार्थं विज्ञाय तत्त्वाङ्गमशेषमेषाम् ॥
विघ्नेशं भारतीं नत्वा भक्त्या वक्ष्यामि पद्धतिम् ।
लेखानां मुग्धबोधाय संश्रयं सर्वसम्पदाम् ॥
चतुःसागरपर्यन्ते सकले क्षितिमण्डले ।
देशो नास्ति विना राज्ञा न राजा लेखनं विना ॥
स्वस्तिशब्दं प्रसिद्ध्यर्थं मङ्गलार्थं च कारयेत् ।
क्षेमार्थं वाचकस्यापि तेनादौ लिखते बुधः ॥
श्रीकारमादितः कुर्यात्स्थाने प्राकारवेष्टिते ।
गुरोर्नृपस्य नामादौ मन्त्रिणां चाधिकारिणाम् ॥
मण्डलाधिपतेर्नाम्नि राज्ञो दारसुतादिषु ।
तथा गुरुप्रसादानां व्रतीशानां च युज्यते ॥
श्रीकाराश्च त्रयो मित्रे एकैकं पुत्रके तथा ।
षड् गुरौ स्वामिनः पञ्च द्वौ भृत्ये द्विगुणौ रिपौ ॥
स्वस्थाने पञ्चमी देया परस्थानेषु सप्तमी ।
आत्मनः प्रथमा देया द्वितीया च परस्य च ॥
लिखेदादौ महास्थानं पादपूज्यसमन्वितम् ।
लेखस्थानं लिखेत्पश्चात् आज्ञाविनयपूर्वकम् ॥
यः प्रस्थापयते लेखं तन्नाम सविसर्गकम् ।
ईकारान्तं स्त्रियाश्चापि एवं नाम विनिर्दिशेत् ॥
यस्य प्रस्थापयेल्लेखं कस्यापि चात्मनो बुधः ।
सानुस्वारं तु तन्नाम कुर्यादक्षरमन्तिमम् ॥
मातुलश्वशुरश्वश्रूस्वामिप्रभृतयश्च ये ।
पूज्यास्तन्नाम पादान्तं यदेतत्पूर्वकाग्रतः ॥
एकपुटे चातिदीर्घे रजोहीने च गुण्ठिते ।
त्रिभिर्वाचनिके लेखे नास्ति सिद्धिः करार्पिता ॥
स्वस्तिहीने रजोहीने शिरोनामविवर्जिते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अमुद्रे हस्तदत्ते च लेखे सिद्धिर्न विद्यते ॥
ग्रीवाग्रन्थिर्हरेद्राज्यं मध्यग्रन्थिश्च लेखकं ।
पृष्ठग्रन्थिर्हरेत्सर्वं निर्ग्रन्थ्या लेखनी(न्या)लिखेत् ॥
स्वस्त्याद्यमितिकारान्तं मध्ये कुशलसंयुतं ।
सरजश्च च समुद्रं च कागदं भूगतं शुभम् ॥

C ऊर्ध्वं यो युज्यते लेखः अधो या युज्यते विज्ञप्तिका । लेखलिखिताशीर्वादः राजादेशश्च ऊर्ध्वम् । तथा त्रिपंचसप्त श्रीकारा विज्ञप्तिकायां, लेखलिखिताशीर्वादराजादेशानामुपरि अभिधानं लिख्यते ।

समस्तलेखलिखितविज्ञप्तिकादयो लिख्यन्ते यथा—

सर्वत्र यो यस्य पितृमातृवृद्धभ्रातृगुरुश्वशुरपूज्यवर्गः, तस्य योग्या विज्ञप्तिका प्रस्थाप्या। अन्यच्च। यो यस्य लघुः पदातिवर्गस्तस्य हेतोर्ज्येष्ठप्रतिपत्तौ तथा सामान्यप्रतिपत्तौ लिखितं प्रस्थाप्यमिति । तथा पितृमातृस्वसृभगिनीप्रभृतिस्त्रीवर्गेषु आत्मीयभ्रातृसुतप्रभृतिलघुवर्गयोग्य आशीर्वादः प्रस्थाप्यः । तथा यो यस्य सम एव तस्य योग्यप्रतिपत्त्या लेखः प्रस्थाप्यः।

श्रावकगुरुविज्ञप्तिका—

C & D स्वस्ति । श्रीपार्श्वजिनमानम्य अमुकनगरस्थाने विनिर्जितक्रोधादिकषायचतुष्टयारातीन् पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयान् प्राणातिपातादिविरतिलक्षणपञ्चमहाव्रतपरिपालनोद्यतैकमानसान् व्याकरणच्छन्दोऽलङ्कारप्रमाणआगमचरित्रकथाकथानकसिद्धान्तादिसकलशास्त्रावगततत्वान् त्रिगुप्तिजननीपरिपालनवत्सलान् संसारसागरनिमज्जमानजन्तुपोततुल्यान् निरन्तरसदोपदेशप्रदानात्प्रतिबोधितानेकजन्तून् सुगृहीतनामधेयान् भट्टारकअमुकश्रीपादाम्भोरुहान् सपरिवारोपेतान् अमुकनगरात् सदादेशकारिश्रेष्ठिश्रावकअमुकाः तथा अमुकश्राविकाः द्वादशव्रतवन्दनकेनाभिवन्द्य सविनयं विज्ञपयन्ति यथा । विज्ञप्यमाह । पूज्यानां प्रसादेन निरामया वयम् । तत्रत्यआत्मीयनिरामयवार्ताभिः प्रत्यहं वयमानन्दनीयाः। अपरं पूज्यैरुपदिष्टमार्गे देववन्दनप्रतिक्रमणस्वाध्यायादिधर्मानुष्ठानरताः वयं कालमधिगच्छामः । अन्यच्च । पूज्यैः प्रसादं विधाय कलिकालकल्मषकलुषिताः वयं विमलसद्धर्मलाभवारिणा सत्वरमिहागत्य प्रक्षालनीयाः । पुस्तकोपकरणादिप्रयोजनेन यत्कृत्यादेशोऽनन्तरं प्रसादीकार्यः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आचार्यः श्रावकस्य प्रस्थापयति लेखं यथा—

C & D स्वस्ति । श्रीवीरजिनमानम्य अमुकस्थानात् प्रभुश्रीअमुकसूरिचरणकमलाः सपरिवाराः अमुकस्थाने देवगुरुपूजनप्रतिक्रमणस्वाध्यायादिधर्मानुष्ठाननिरतान् सन्न्यायोपार्जितवित्तपरितोषितार्थिजनान् अमुकामुकप्रभृतिश्रावकान् श्राविकाअमुकाप्रभृतिसमुपेतान् कलिकालकल्मषमषीप्रक्षालितवारिणा सद्धर्मलाभेनाभिवन्द्य सबहुमानमादिशन्ति एवम् । आदेष्टव्यमिदम् । तदेवं निरामया वयं सपरिवारास्तिष्ठामः । तत्रत्यस्वीयकुशलवत्या वार्तया अनवरतं वयमानन्दनीयाः । अपरं रामारत्नैरपि इहपरलोकसुखसम्पदोघजनके सद्धर्मानुष्ठाने प्रतिदिनमुद्यमो विधेयः ।

धर्मादेवाप्यते स्वर्गस्तस्माद्धर्मं समाचरेत् ।
धर्मादेवाप्यते सम्पत् धर्मात् सुखफलोदयः ॥

माहेश्वरयोग्यविज्ञप्तिका—

C & D स्वस्ति । अमुकस्थाने अनवरतक्रियमाणवेदाध्ययननिर्मलीकृतमानसान् अष्टादशस्मृतिपुराणादिधर्मकथाशास्त्राभ्यासनिरतान् गहनज्योतिःशास्त्रावगततत्वान् दुष्टग्रहशाकिनीभूतमुद्गलोच्चाटनमन्त्रवादपरिस्फुरणावासपरमप्रसिद्धीन् हरमुरारिब्रह्मप्रभृतीष्टदेवताराधनसक्तान्तःकरणान् पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयभट्टारकश्रीअमुकपादान् अमुकस्थानात् सदाज्ञाविधायी शिष्यः अमुकाकः क्षितितलनिहितोत्तमाङ्गेन साष्टाङ्गं प्रणम्य सविनयं विज्ञापयति यथा । विज्ञाप्यमाह । पूज्यपाददत्तआशीर्वादानुभावतः समस्तमानुषाणां कुशलवार्तामवधार्य तत्रत्यात्मीयकुशलवती वार्ता मम सन्तोषाय निरन्तरं प्रसादीकार्या । अपरं च । पूज्यपादानामतीव समुत्कण्ठितं स्वीयदर्शनामलजलेनागत्य कलिमलावलिप्रक्षालनपूर्वं मदीयमङ्गं निर्मलीकरणीयम् । तथा पर्वद्वयात्मनः प्रभृति सुकृतकल्पना तथा चीर्णव्रतोपायनकं समेत्य स्वयं प्रतिग्राह्यम् । यत्कृत्यादेशोऽनवरतं प्रसादीकार्यः ।

गुरुः शिष्यस्याशीर्वादं प्रस्थापयति यथा—

C & D स्वस्ति । अमुकस्थानात् आचार्यअमुकाकः अमुकस्थाने अनवरतसद्धर्मानुष्ठानपयःप्रक्षालितकलिमलकलंकं सन्न्यायमार्गप्रवृत्तं वरगुणगणालंकृतशरीरमायुष्मन्तं शिष्यअमुकाकं वेदचतुष्टयोक्ताभिराशीर्भिरभिनन्द्य सबहुमानमाशीर्वादयति यथा । आशीर्वादार्थोऽयम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुशलमत्रास्माकम् । तत्रत्यात्मीयकुशलवती वार्त्ता अनवरतं प्रहेया । अपरं च । प्रतिदिनं प्रातरुत्थाय शुचिर्भूत्वा भवता स्वरूपं द्रष्टव्यम् । मार्गेण देवपितृतर्पणाग्निद्विजात्यतिथीनां पूजा करणीया । तथा पितृमातृस्वसृनेष्टभ्रातृप्रभृतिबन्धुजनशुश्रूषा चानवरतं करणीया । दुःस्थावस्थितभागिनेयदौहित्रादिपोष्यवर्गावज्ञा च न करणीया । विद्वज्जनारविन्दनिर्गच्छद्धर्मशास्त्रमधुरसास्वादलालसमधुपेन भवितव्यम् । साधुजनसंसर्गः सदा विधातव्यः । सन्न्यायोपार्जितवृत्तौ च मानसमाधेयम् । किं बहुना । यत्कर्म इह परलोके हितं तदनुष्ठेयमिति ।

कुंकुमपत्रिका यथा—

C अमुकस्थानात् मह॰अमुकाकः अमुकस्थाने यथाज्ञातिसम्बन्धं अमुकाकमामन्त्रयति यथा । अस्मदीयसुतस्य अमुकमासि अमुकतिथौ अमुकवारे अमुकाकस्य अमुकया सुतया पाणिग्रहणं भविष्यति इति मत्वा भवद्भिः सकुटुम्बैरत्रागन्तव्यम् ।

स्वामिलेखो यथा—

B & D स्वस्ति । यथास्थाने दुःस्थावस्थितजनाधारानवरतगुणगणोपेतानाश्रितजने यथोचितवृत्तिविभागान्निजगुणगणासादितराजलोकांतःप्रभावान् पूज्यपरमाराध्यतमोत्तमठाकुरअमुकपादानमुकस्थानात्सदादेशकारी अमुकः क्षितितलनिहितमौलिना साष्टांगं प्रणम्य सविनयं विज्ञापयति यथा । विज्ञपनीयमिदम् । पूज्यैरादिष्टशिक्षापनया व्यापारमहं कुर्वंस्तिष्ठामि । पूज्यानां प्रतापेन सत्वरमारब्धप्रयोजनानां सिद्धिर्भवति । यदुक्तम् ।

शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः ।
यत्पुनस्तीर्यतेऽम्भोधिः प्रभावस्तु प्रभोर्हि सः ॥

इत्यादि अपरं च । अत्र शिक्षापनाव्याजेन पूज्यपादानां नमस्करणाय तत्रहामागच्छामि लग्नः स्तोकदिनानां मध्ये । अत्रस्थानिवृत्तिः कस्मिन्नर्थे न विधेया । यदि किमप्यत्र च मया विनश्यति, तदा पूज्यैः परीक्षा मम कृतापि नैव इत्यवधार्य सर्वदा ममोपरि प्रसादो विधेयः । यत्कृत्यादेशोऽनवरतं प्रसादीकार्यः ॥

भृत्यलेखो यथा—

B & D स्वस्ति । अमुकस्थानात् ठाकुरअमुको अमुकस्थाने अमुकं सप्रसादं समादिशति यथा । कार्यं च । भवता तथा किमपि न व्यापारणीयं यथा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पिशुनप्रवेशः स्यात् । न मन्दप्रतापेन भवितव्यम् । सावष्टंभतया व्यापारणीयम् । तत्रत्यं व्यापारस्वरूपमनवरतमाख्येयमिति ॥

मित्रलेखो यथा—

B & D स्वस्ति । यथास्थाने विद्वत्त्वदाक्षिण्यौदार्यादिवरगुणगणालंकृतशरीरं परमप्रेमवत्सलं वयस्यममुकममुकस्थानादमुकः सोत्कण्ठं सस्नेहं सांजसं दूरप्रसारितबाहुभ्यां गाढमालिङ्ग्य कुशलं वार्तयति यथा । कार्यं च । कुशलमिहावगम्य तत्रत्यस्वीयकुशलवार्ताऽस्माकं धृतयेऽनवरतं प्रहेया । अन्यच्च । यद्दिनपूर्वं त्वया सह मम वियोगः समजनि तद्दिनपूर्वं भवत्स्मरणकावृतमनसो मे न बुभुक्षा न पिपासा न निद्रादीनि च सुखानि वर्तन्ते । त्वया सह क्रीडितदिवसानि स्मृत्वा सखेदं मनः संपद्यते । इति मत्वा लेखदर्शनादेव यदि चित्ते धारयसि तदा शीघ्रं प्राघूर्णकेन समागन्तव्यम् ।

उक्तं च—

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥

इत्यादि । अन्यत् । सर्वगुह्यस्थानकं मित्रं वर्तते, यद्विना कस्य हृद्गतानि सुखदुःखानि कथ्यन्ते ॥

तथा चोक्तम्—

सो को वि नत्थि सुयणो जस्स कहिज्जंति हिययदुक्खाइं ।
आवंति जंति कण्ठे पुणोवि हियए विलिज्जंति ॥

इत्यादि । कार्यप्रयोजनमनवरतमाख्येयमिति ॥

प्रसन्नभार्या भर्तृलेखं प्रस्थापयति यथा—

B & D स्वस्ति । यथास्थाने शान्तदान्तादिवरगुणोपेतान् दुःस्थानाथबन्धुकुटुम्बिकवर्गाधारान् भर्तृअमुकपादान् अमुकस्थानात्सदाज्ञाविधायिनी अमुका सस्नेहं सोत्कण्ठं सविनयं विज्ञपयति यथा । कार्यं च । कुशलमत्र सर्वमानुषाणाम् । स्वीयशरीरारोग्यवती वार्ताऽनवरतं प्रसादीकार्या । अपरं च । युष्मत्प्रदर्शितमार्गानुसारेण गतायातस्वजनजनस्य तथा पोष्यवर्गस्य चित्तमनुरञ्जयमानाऽनुदिनं तिष्ठामि । तथा गृहक्षेत्रकणादिविषये कृतसारा तद्विकरणेऽहोरात्रमपि कृतोद्यमा तिष्ठामि । अत्रत्यावसेरी काचिन्न कार्या । अन्यत् । तत्र यद्यपि स्वीयगुणैर्युष्माकं सर्वः कोऽपि गौरवं करोति, अतो यूयं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुखेन तिष्ठत । तथाप्यत्र ममानिर्वृतिर्वर्तते । तथा बालानामपि युष्मदीया मह-त्यवसेरी वर्तते । तत्रत्यप्रयोजनानि निष्पादयित्वा शीघ्रमिहागन्तव्यमिति ।

संरुष्टभार्याभर्तृलेखो यथा—

B & D स्वस्ति । अमुकस्थाने भर्तृअमुकपादान् अमुकस्थानात् अमुका सादरं वार्तयति यथा । कार्यं च । सर्वमानुषाणां कुशलमस्ति । तत्रत्यात्मकुशलवार्ता प्रहेया । अन्यच्च । यतस्त्वं गतस्ततस्तव पाश्चात्यगृहदारापत्यादिकं सममपि विस्मृतम् । तव यत्रैव चट्टनं तत्रैव पत्तनम् । त्वया गच्छता यच्छंबलं मुक्तं तच्चार्धमासं यावत् तव गृहे निर्यातम् । ग्रहणकानि अङ्गाणकानि मुक्त्वा उद्धारप(प्रो)द्धारादिना दिनानि निर्गमितानि । साम्प्रतमपत्यैः सह महत्कष्टं वर्तते। यदि भर्तृत्वमनवरतं महिलायाः कस्याश्चिद्विद्यते ततोऽत्रागन्तुं न शक्नोषि । बालकस्य व्यापादनेन गोहत्यादिकं पापं भवति । कुटुम्बकस्यापि सारां कर्तुं युज्यते इति परिभाव्य निष्ठुरहृदया यदि सा मुत्कलयति तदा साराकरणायागन्तव्यं, नो वा शम्बलं प्रहेयम् । यद्येतच्छीघ्रं न करिष्यसि तदाहं त्वदीयं गृहादिकं परित्यज्यापत्यान्यादाय पितृगृहं यास्यामि । इति मत्वा यत्तव सुखावहं स्यात्तदनुष्ठेयमिति ।

गुप्तप्रियायाः प्रियस्य लेखो यथा—

B & D स्वस्ति । अमुकस्थाने विनिर्जितमकरध्वजलावण्यानौत्सुक्यौदार्य-सौभाग्यादिगुणगणापहृतयुवतिमानसान्वल्लभअमुकपादान् अमुकस्थानात्सदा-देशकारिणी अमुका सस्नेहं सोत्कण्ठं गाढमालिङ्ग्य साश्रं विज्ञपयति यथा । कार्यं च । कुशलमत्र । तत्रत्यात्मीयकुशलताकिंवदन्तीभिरनवरतमहमानन्दनीया । यद्दिने युष्माकं विजययात्रा जाता तद्दिनपूर्वं विरहदुःखानलेन तप्यमानमानसा रात्रिन्दिवं सौख्यं क्वापि नानुतिष्ठामि ।

तथा चोक्तम्—

विरहहुयासकरालियह कहि पियंयम कहिं जंप ।
जाव न रइरसि विमलि जलि पेमदहि किय झंप ॥

इत्यादि परिभाव्य ममोपरि दयां धृत्वा बहून्यपि प्रयोजनानि मुक्त्वा अत्रागत्य निजदर्शनामृतवर्षेण विप्रलम्भपावकदह्यमानं मदीयमङ्गं निर्वापणीयम् । कालक्षेपो न कर्तव्यः ।

भार्यालेखो यथा—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

B & D स्वस्ति । अमुकस्थाने पालितपरमपतिव्रतगुणशालिनीमवगतास्मद्गृहसकलनीतिमार्गां त्रिवर्गफलसम्पादयित्रीं विनयवात्सल्यादिप्रियंवदादिवरगुणगणावर्जितसकलनिजजनमानसां भार्यामभुकां सस्नेहं साश्रसं सबहुमानं कुशलं वार्तयति यथा। कार्यं च । कुशलमिहास्माकम् । तत्रत्यसमस्तमानुषाणां कुशलवती वार्ता प्रहेया । अस्माभिरागच्छद्भिर्या शिक्षापना प्रदत्ता तया शिक्षया भव्यगत्या गृहं परिपालनीयम् । यथा गतायातकुलटिकाप्रभृतिजनो बहिरप्रसिद्धिं नारोपयति तथानुष्ठेयमिति । यद्गृहे कुसूत्रं भवति तदस्माकमिह निरूपणीयम् । अस्माभिरत्र प्रयोजनानि कृतानि, कियन्त्यकृतानि विद्यन्ते । अतोऽस्माकं विलम्बः । समग्रप्रयोजनानि सारयित्वा स्तोकदिनानां मध्ये वयमागच्छामो लग्नाः । अत्रत्यावसेरी न कार्या । यावद्वयमागच्छामस्तावद्गृहे यथा किमपि न विनश्यति तथा विधेयमिति ॥

सरोषभर्तृभार्यालेखो यथा—

B & D स्वस्ति । अमुकस्थानादमुको अमुकस्थाने भार्यामभुकां सादरं कुशलं वार्तयति यथा । कुशलमत्रास्माकम् । तत्रत्यसमस्तमानुषाणां कुशलवार्ता प्रहेया । अन्यत् । तत्रस्थानाद्यः कोऽप्यागच्छति स सर्वो गृहस्य रावामेव करोति । यत्रापि वयं न भवामस्तत्रापि किञ्चिन्न भवति । यदस्माभिर्मासद्वित्राणां हेतोः शम्बलं मुक्तं तत्त्वया दिनैर्दशभिरष्टभिरेव निष्ठापितम् । पदे पदे वयं दग्धास्त्वया । परं तव दोषो नास्ति । अस्मदीयप्राक्तनजन्मनोपार्जितदोषः । यदुक्तम् ।

पूर्वदत्ता तु या विद्या पूर्वदत्तं तु यद्धनम् ।
पूर्वदत्ता तु या नारी अग्रे तिष्ठति तिष्ठति ॥

अन्यत् । सर्ववारान् यद्वयं भणामस्तत्त्वं विपरीतं करोषि । किं बहुना । यत्तव कुलसदृशं तदनुष्ठेयमिति ।

सानुरागः प्रस्थापयति प्रियालेखो यथा—

B & D स्वस्ति । अमुकस्थानादमुकोऽमुकस्थाने निजतनुकान्तिविनिर्जितप्रत्यग्रकनकभासं किसलयकोमलकरचरणां पूर्णेन्दुमण्डलसमाननां चकितहरिणीशावनयनां रम्भास्तम्भसमानोरुयुगलां कलकण्ठैकरवां दृष्टिवागुराकृष्टकामिजनान्तःकरणहारिणीं कुन्दकलिकाकारदशनां सगर्ववनगजेन्द्रकुम्भोत्तुङ्गघनस्तनीं दयितामभुकां सोत्कण्ठं सस्नेहं निर्भरं गाढमालिङ्ग्य कुशलं वार्त-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यति यथा। कार्यं च । कुशलमत्रास्माकम् । तत्रात्मीयशरीरारोग्यवती वार्ताऽनवरतं प्रहेया। तदास्माभिरागच्छद्भिर्निर्भरमालिङ्ग्य यत्र दिने त्वं मुत्कलापिता तद्दिनपूर्वं रणरणकोपेतशून्यमनसां क्षुत्पिपासादिना चास्माकं सन्तापैकजनका वासरा व्रजन्ति ॥

यतः ॥ दससु वि दिसासु दीससि हिंडसि रत्थासु वससि मह हियए ।
तुममयमिह सयलमिणं तुह विरहे मुद्धि पिच्छामि ॥

तथा चानेन प्रतिबोधयामि ।

सवणाण य कायव्वो होइ पियंयमवत्ताओ ।
संगहियपियकलेवर खिज्जसि रे हियय मा अहियं ॥

तथैवानुदिनं चिन्तयामि ।

तद्दिनमिह किं भविता विरहानलजलदजलवर्षम् ।
यत्र तवामृतपूरं वदनं द्रक्ष्यामि मृगनेत्रे ! ॥

इति परिभाव्य यथा प्रवासे तस्कराः प्रेमसर्वस्वं समवयसो नापहरन्ति तथा विधेयमालम्बनम् । शीघ्रमागच्छामो लग्नाः । हृदयमध्येऽनवरतमेव त्वत्समा नास्ति । अत्रत्यानिर्वृतिर्न कार्या ।

कनिष्ठभ्रातृलेखो यथा—

B अमुकस्थानादमुको अमुकस्थाने भ्रातृअमुकं सोत्कण्ठं सादरं सबहुमानं समालिङ्ग्य कुशलं वार्तयति यथा । कार्यं च । कुशलमस्माकम् । तत्रत्यात्मीयकुशलवार्ता प्रत्यहं प्रहेया । यावद्वयं समागच्छामस्तावत्सर्वमानुषाणां भव्यसारा सम्भाला तथा गृहक्षेत्रवनादीनां सारा सुन्दरा कर्तव्या। यदि मम दयिते परस्परं राटिं रटतस्तदा सामवाक्यैर्निवारणीये । कस्यापि पक्षो न विधेयः । ममाग्रे कार्यप्रयोजनं प्रतिलेखेनानवरतमाख्येयमिति ॥

पूर्वोक्तपूज्यैर्विस्तरख्यापिसामान्यप्रतिपत्तिलेखो यथा—

B स्वस्ति । अमुकस्थाने व्य०अमुकामुकाभ्यां अमुकं सस्नेहं साञ्जसं सोत्कण्ठं कुशलं वार्तयति यथा । कार्यं च । प्रयोजनवशाद्यदत्र बहवो दिना लगन्ते ततोऽस्मद्गृहे सारा रम्या कार्या । यदि मानुषाः सीदन्ति तदास्माकमुपरि उद्धार्य यद्गृह्णन्ति तद्देयम् । वयमायाताः सन्तोऽग्रेतनोद्धारस्य साम्प्रतोद्धारस्य च सर्वं विशुद्धं करिष्यामः । साभिज्ञानमिदं यदस्माभिरागच्छद्भिर्गृहे गत्वा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यावृत्य युष्मत्पार्श्वाच्छंबले द्वादश द्रम्मा जगृहिरे । अनेन साभिज्ञानेन नान्यथा विधेयम् । कार्यप्रयोजनमनवरतमाख्येयमिति ॥

अमुकपुरे मित्रं प्रति प्रस्थापयति लेखो यथा—

B अमुकां—

स्नेहाङ्कुरो नित्यमुपैति वृद्धिमन्योन्यसन्दर्शनवारिसिक्तः ।
वियोगदुःखार्ककराभिघातैर्यथा न शुष्येत तथा विधेयम् ॥

अमुकं—सो कोवि न जाओ कत्थवि कच्छवकुलाण मज्झम्मि ।
जस्स समप्पिय भारं कुम्मो निवसिउं वीसमइ ॥
जह सरसे तह सुक्के वि पयो वधरइ अणुदिणं विंझो ।
उच्छङ्गवुड्डियं निग्गुणंपि गरुया निसिड्ढन्ति ॥
जह सो नीलकलावो पाउसकालम्मि पिंजरइ छूढो ।
संभरइ वणे रमिउं तह अह्म मणो तुमं सरइ ।
सो कोवि नत्थि सुयणो जस्स कहिज्जंति हिययदुक्खाइं ।
हियआओ जंति कंठे कंठाउ पुणो नियट्टंति ।
ते दीहा चउरंगुला जे पइसरिसा आसि ।
हवडां दिणयरु अत्थमइ छट्टइ छट्टइ मासि ॥
गिरौ कलापी गगने च मेघो लक्षान्तरे भानुः जले च पद्मम् ।
इन्दुर्द्विलक्षः कुमुदोत्पलानि यो यस्य हीष्टो न स तस्य दूरे ॥

सकृदपि यत्प्रतिपन्नं०

वरं प्राणपरित्यागो न वियोगो भवादृशाम् ।
प्राणा जन्मान्तरेऽपि स्युर्न पुनस्त्वादृशो जनः ॥
न तद्दिनं न सा रात्रिर्न सा वेला न सा घटी ।
म्रियमाणो यदा स्नेहं न स्मरामि सुहृत्तव ।
सन्ति जलानि बहून्यपि देशे देशे सरित्सु विमलानि ।
तानि तुलां किमु बिभ्रति गङ्गाजलचुलुकमात्रस्य ॥

पितृलेखः—

D स्वस्ति । श्रीअमुकस्थाने पूज्यपरमाराध्यतमोत्तमपरमपूजार्चनीयपितृ-अमुकपादान् अमुकस्थानात्सदाज्ञाविधायी सुतअमुकः क्षितितलनिहितोत्तमाङ्गेन साष्टाङ्गं प्रणम्य सविनयं विज्ञापयति यथा । कार्यं च । समस्तमानु-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षाणां कुशलमत्र। तत्रत्यात्मीयकुशलवती वार्त्ता प्रसादीकार्या। अन्यच्च। पूज्यपादप्रदत्तशिक्षापनया गृहारम्भं कुर्वंस्तिष्ठामि। तथा पूज्यपादानां गुरुतराज्ञाप्रभावतः कृषिकर्मकरादिजनः सर्वोऽपि कर्मण्यधिकतरसमुद्यमपरो वर्तते। कृत्यादेशोऽनवरतं प्रसादीकार्यः।

पुत्रलेखः—

D स्वस्ति। श्रीअमुकस्थानात् अमुकस्थाने विनयावनतइत्यादिवरगुणजनिताशेषजनानन्दमायुष्मन्तं पुत्रममुकं सोत्कण्ठं सस्नेहं गाढमालिङ्ग्य कुशलं वार्तयति। कार्यं च। कुशलमत्र। तत्रत्यात्मीयसमस्तमानुषाणां कुशलवार्त्ता सततं प्रहेया। अपरं च यावद्वयमागच्छामः तावत्समस्तगृहप्रयोजनविषयेऽप्रमादिना भवितव्यम्।

मातृलेखः—

D स्वस्ति। श्रीअमुकस्थाने परममातृवात्सल्योपेतान् प्रियालापयथोचितगौरवकरणावर्जिताभ्यङ्गचित्तान् पूज्यतममातृअमुकापादान् अमुकस्थानात् सदादेशकारी चरणसेवकअमुकः साष्टाङ्गं प्रणम्य सविनयं विज्ञापयति यथा। कार्यं च। पूज्याभिः प्रदत्ताशीःप्रभावतोऽहमिह कुशलेनैव वर्त्ते। प्रतिदिनं प्रसादकार्यं कुर्वंस्तिष्ठामि। तत्रत्यसमस्तमानुषाणां कुशलवार्त्ता स्वगृहस्वरूपकथितवार्ता च प्रतिदिनं प्रसादीकार्या। यावदहं समागच्छामि तावत्समस्तप्रयोजनेषु पूज्याभिरप्रमादिनीभिर्भवितव्यम्।

श्वशुरलेखः—

D स्वस्ति। अमुकस्थाने पूज्यतमश्वशुरपादान् अमुकस्थानात् सेवकअमुकाकः सविनयं विज्ञापयति यथा। कुशलमत्र। तत्रत्यकुशलवती वार्ता प्रसादीकार्या। अपरं च। युष्मदीया दुहिता अमुकाख्या अमुकपतिं मानयति तथा विधेयमिति।

श्वश्रूलेखः—

D स्वस्ति। अमुकस्थाने पूज्यश्वश्रूअमुकापादसरोजान् अमुकस्थाने सेवकअमुकाकः सादरं विज्ञापयति यथा। कार्यं च। कुशलमत्र। तत्रत्यापि कुशलवती वार्ता प्रहेया। अन्यत्। युष्मदीयदुहितुः समानयनाय आत्मीयलघुभ्राता वेलाद्वयं त्रयं प्रहितः। परं केनाऽपि कारणेन भवतीभिः स्वदुहिता न मुत्कलिता। किं श्वश्रूननान्द्रादिभ्यः सञ्जातमसुखकारणम्, आहोस्विन्मदीय-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पराभवदर्शनकारणं वा । तत्रानया कथयित्वा भवतीनां चित्तखेदः समुत्पादितः । सत्यमेवैतत् । तदपि चित्ते न धारणीयम् । मा दूहयित्वा मुत्कलनीया । अहमागच्छामि ।

जामातृलेखः—

D स्वस्ति । श्रीअमुकस्थानात् अमुकः अमुकस्थाने श्रे०अमुकं वरगुणगणालङ्कृतशरीरं प्रियं वरजामातृकं सस्नेहं साश्रुसं गाढमालिङ्ग्य कुशलवार्त्तां कथयति यथा । कार्यं च । कुशलमत्रास्माकम् । तत्रत्यात्मीयकुशलवार्त्ताऽस्मत्सन्तोषायानवरतं प्रहेया । अपरं च अस्माभिस्तावद्दुहितरं दत्वा भवता सर्वारम्भेणापि तत्कर्तव्यं यथा अस्माकं सर्वप्रयोजनेषु संपत्तिः संपद्यते । तथा अस्मदीयपुत्रिकाऽज्ञतयाऽभीक्ष्णं सन्मुखीभूत्वा दुर्वाक्यप्रत्युत्तरदानेन समादिष्टादेशाकरणेन वा श्वश्रूननान्द्रादिलोकस्य सन्तापमुपपाद्यति तत् सर्वं सहनीयम् । अपरं च ।

अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ।
उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

APPENDIX I

भूमिविक्रयपत्रम्

ॐ। स्वस्ति श्री सवंत् १५८३ वर्षे (श्री) गूर्जरधरित्र्यां सकलरा-(जावली)समलङ्कृतप्रौढप्रताप(सकल)रिपुवर्गदहनदावानलअरिकुलवरूथिनीग-(जघटाकुं)भस्थलविदारणैकपञ्चानन(महारा)जाधिराज(पातसाह)श्रीश्री-श्रीश्रीश्रीबाहदरसाहसंज्ञे श्रीअहिमदावा(दसमी)पस्थराजपुरे कदायाधिकारे कादीश्रीशेखफरीदसंज्ञे तथा पञ्चदीवानाधिका(रे मु)खते मीरकोई को(ट्टपा)-लमण्डपिकायां सर्वव्यापारे खानश्रीमुखते(सकल)तलार व्यापारे महं कान्हा नाकरसंज्ञे सा × × य मी० चिरजीसंज्ञे तथा पञ्चकुलप्रति(प)त्तौ दायकग्राह-कयोर्वचनात् विक्रीयमाणाया: भूमे: पत्रमभिलिख्यते। पूर्वं दायकग्राहकयोर्नाम लिख्यते। दायकवृद्धसज्जने सोनी लहूआ आसा, लाडण (आसा), सङ्घा आसा, काशी रणायर आसा × × × ग्राहक परी० आसा सूदा, रवा सूदा, विण्हू सूदा, जादव दमा सूदा, लाखा नगा सूदा, सारण कसा सूदा, श्रीब-हूआ। सो० लहूइ, लाडणइ, शंघइ, काशीइ, उत्पन्न(का)र्यवशातु आपणी भूमि साह सामलना पाडामध्ये हूती ते भूमि राज्यटंका ८०४ आंक आठ-सई चिरोत्तर माटइ वेचाती परी० आसा रवा जादव, लाखा, सारणनई आपी सही। ते भूमी परी. आसाइ रवाइ विण्हूइ विण्हूइ जादव (इ) लाखइ सार-णइ आपणइ कबजी करी द्राम एक मूठिं गिणी आप्या सही। ते द्राम सो० लहूइ लाडणइ शंघइ काशीइ आपणइ जमणइ हाथिं संभाली लीधा सही। पूर्व पश्चिम श्रे० कसा अबा वनाना कहरलगइ गज १६ तथा उत्तर दक्षिण दालीया लाडण जीवा (गांगा) महिराजनी एकढाली पछीतथी वाट सूधा गज ३५। एवं जमलई सर्व थै गज ५६० अंके पाञ्चसइ साठि पूरा। अथा-घाटा:। पूर्वं श्रे० कसा अबा वनानूं फलीह। दक्षण दालीया लाडण जीवा गांगा महिराज। पश्चम परी० दमा आसा सूदानूं फलीह। उत्तर हींडवानु मार्ग शेरीनु। तथा एवंविधा भूमि: परी० आसा रवा विण्हू जादव लाखा सारण आचन्द्रार्कं भोक्तव्या। लहूआलाडणशंघाकाशीदास संबन्धो नास्ति। ए भूमिनई कीघई को दावु करई तेहनई लहूआ लाडण शंघा काशी प्रीछ-वई। प्रदत्तमतानि साक्षण:

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अत्र मतं

सो० आसा सूत लहूआ मतं सोनी आसा सत लाडण मतं सो० आसा सुत शंघा मतं सोनी रणायर सूत काशी मतं चारि

श्रीदीवान अमरखान श्रीफकर नसरखान तलार राजपोर अमल अजारि मी० राहाता × जणा दास खत १ एक ८०४ आठ शि टंका चारि भूम तो × × लाखित सोनी लहूआ लडण संघा सोनी आसा सत सो० वीसा खरीद परीख आशा र (वा) विण्हू लाखा जादव संवत् १५८३ माहा श० ९ बु (ध) तेरीख १०

ग्रहणकपत्रम् (गृहाडाणकपत्रम्)

स्वस्ति श्रीनृपविक्रमार्कसमयातीत—संवत् १५ आषाढादि ९९ वर्षे शाके १४६५ प्रवर्त्तमाने ज्येष्ठवदि ११ भूमे अद्येह श्री अहिमदावादवा-स्तव्य—ग्रहणकपत्रमभिलिख्यते । श्री गुर्जरधरित्र्यां समस्तराजावलीसम-लङ्कृत—सकलअरिवरूथिनीगजघटाकुम्भस्थलविदारणैकपञ्चानन—अलक्षवर-लब्धराज्यश्री स्वयंवरमालालङ्कृतकण्ठकन्दल—यवनकुलतिलक—महाराजा—धिराज—पातसाहश्रीश्रीश्रीश्रीश्रीसुरत्राणमहिम्मुदविजयराज्ये विजारत्यां श्रीअफजलषांन । तत्समये राजा अहिमदावादमध्ये धर्माधर्मविचारणार्थे कादीश्री नसीरदीसंज्ञे न्यायवृक्षपालनैकमुषते दुर्गपाल श्रीअफतिषालमलि-कसंज्ञे मीरकोअसाध श्रीपीरोज मलिक जामति मण्डपिकायां श्रीनगदलम-लिक हवेल्यां मी० नूरदी मी० जलाल एवं पञ्चकुलप्रतिपत्तौ ढींकूए पटिल-हाजानामध्य(नामधेय)पोलि तत्र मोदी जसा सुत मोदी सारण तत्पुत्र नराइणदास परं मोदी हादासुत तापीदासकेन ग्रहं ग्रहणके दत्तानि । ग्राहक-नाम श्रीश्रीमालीज्ञातीयपरीक्ष हावडसुत प० हांसां तत्पुत्र ३ पद्मा-उदयकर-ण-रङ्गाकेन गृहीत्वा यत् राज्यनाणके टंका ८००४ अङ्के आठसहिस्र चिडोत्तर बधत्रसुपरीक्षत(ब्द्रित्रिःसुपरीक्षित) एकमुष्ट्यानि दत्तानि । डुढीऊ १ नवूं टंका ६ लेषइं अङ्के छ लेषइ । घर ग्रहणे । घर षडकीबध मध्य उपवर्ग २ गोझारि २ पटसालि प्राङ्गणसहित सन्मुख छापरूं पक्केष्ट वलीषा-प-नलीया-बारत-

कमाड सहित षडकीबध ग्रहणे मूक्यां । मोदी नाराइणदास तापीदास एणई मूंक्यां । भाइ ३ सहा पदमा उदयकरण रङ्गा कह्वई मूक्यां । पार्श्वे उत्तरइ मोदी धनासुत समधर सायरनां घर । पार्श्वपूर्वे मोदी तापीदास नाराइ-णदासना घर । दक्षणे षडकी । तत्र अग्रे पाटिकामार्ग । एवं ४ घूंट । ए घर पडई आखडई राजकि दैवकि लागई ते तथा नलियाखोटि धणी छोडवतां सर्व वरती आपई । संचरामणी वसनाहारनी । जां लगइ टंका आठसहिस्र चिडोत्तर आपइ तिह्वारइं छुटइ । तां लगइ भाइ ३ पदमा रंगा उदयकरण वसइ वासइ । बन्धी अवधि वरिष ५ नी । वरिष पाञ्च पछी छोडवइ । वलती ए मास १ प्रति टं० २५ वलइ । वरिष १ ना टंका ३०० व-लइ । घर भाडुं नहीं । द्राम व्याज नहीं । षालपरनालनीवाखादिक पूर्वारीति सम्बन्ध । मोदी नारायणदास तापीदासे घरग्रहणे प० पदमा प० उदयकरण रङ्गा कहइ मूक्यां । अस्य लषितविधे परिपालनाय ।

पछई एहिवूं परठ्युं । टंका ३०० वरस १ ना वलई । ओरडा वि मध्य भागला ते वेहू प० पदमा प० उदयकरण रङ्गाना ॥

अत्र मतं । अत्र साखि ।

१ मोदी हादासुत तापीदास मतं ऊपर लीखते (आशरे २८ साक्षी छे)

परमाण

१ मोदी शरणदास सुत नाराणदास मतं

विभङ्गपत्रम्

संवत् १६१८ वरषे जेष्ठ वदि ६ रवउ अदेह नटपद्रथानमांहा श्रीमु-दाफरविजेराजै वापारी मलिक श्रीसिरफहेदि मलिक अमीपीर पंचकुल-प्रतिपत्तौ दोसी केसव दो० सागा दो० सोमजि जोग लिखितं नरसंग वीरा हरिजि देवजी । जत घरा हाट मालकति दो० ३ बिसी वेची आपी सही । ओ विचिणा रलीआत घटी कीधी । घर जूना दो० जनाना तथा नवा खरीदा श्री जिवाना तथा फली १ पट०जिभाईना खरीद तथा हाट ३ ओ मलकीते सरवा वेची लीधी दो० जनाना जूना घरमोधे भाग त्रीजे हती आ गोपालनां छि तो वेची आपयां । तथा कोटडी काढतां षीजूं कांई खरच खराजत विसी तौ मजमू अरधे अरधी आपीई सही । तथा बीजूं सर्व हाटनूं लुगडू तथा सरवाईउ करी ऊघराणू देवू तथा हेम रूपू करडी सूखडी तथा बीजू जे

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कांई हतूं तौ सर्व प्रीछी वीची लिधूं सही । दो०३ बिसी सरव प्रीछवणी करी विची आपू । आजसुधा नरसंग वीरा हरिजि देवजि तथा केसव सागा सोमजी ओ जणा सघलो बेसी प्रीछाविशी जूजूआ थया । ओहनि माहेमहि कहिनी सरसमांध नहिं । सरव प्रीछी जूजूआ थया । दो० ३ बिसी सघला प्रीछवी विची आपू । ओहनी माहेमहि तलावे पाणी सहीआरे नही तथा नरसंग वीरा हरिजि देवजि ओ सरव विची साटी जूजूआ थया । ओहनी काही माहेमहि सरसमांध नही । तलावे पाणी सहीआरे नही । तथा केसव सागा सोमजिनि माहेमहि विची सही जूजूआ थया । ओहनि माहेमहि सरसमंध नही । तलावि पाणी सहीआरे नही । तथा ऊघराणी जूनी पूजमूनी छि तो जिम आवि तिम अरधे अरधि लि । बिजू भोम दो० जनावाली राणा वणा एमना पासे छे बीजे पासे पडोस दवे नाग जोगीदासना पासे छे । बीजू भोम नवा गाममाहेली तलीआनी छे ते काही भरमपोरे आपी । बाकी छे ते अजमाल छे । उघराणी तथा भोम मजमू छे । बाकी काई ए वरा केहीने कसू सरसमंध नही । ए वेहेचण दो० ३ बिसीने समजावा जोईने भाग जोए मलकत आवी ते मलकत तेहनी । ए लखू फेरवे ते तेहेना बापनो जणो नही । आज सूधी कोईनि केईसू कसो अलाखो नही । तलाव पाणी सहीआरो नही । ए लखू परमाण ।

विभङ्गपत्रम्

ॐ श्रीगणेशाय नमः । संवत् १७०८ वर्षे शाके १५७३ प्रवर्तमाने दक्षिणायने गते श्रीसूर्ये हेमन्तऋतौ महामांगल्यप्रदपौषमासे कृष्णपक्षे ६ षष्ठी भौमवासरे वेहेचणना नदावाषतपत्रमभिलीख्यते । अद्येह गुर्जरधरित्र्यां समस्तराजावलीसमलङ्कृतपरमप्रौढप्रतापपरिजनप्रतापसंशोषितारिगजघटाविदारणैक(पञ्चानन)अन्यायवर्षोनर्षवमूलनौक(वृक्षोन्मूलनैक)समस्तविध्वंसनदरिद्रदावानलअगञ्जनगञ्जनरिपुराजमर्दनौकसकलराज्ञां शिरोमणी अभावतमारकुड (अभिनवमार्तण्ड)अवतार वाचाअवीचलसंग्रामगुणधीरदानेकवीरयुवनतुलकपातस्याहा श्रीश्रीश्रीश्रीश्रीश्रीश्रीश्री७अवलमुजफरसाहाब्दी मेहेमद साहाबकराणसानी पातस्याहा श्रीशाहाजाहागाजीविजयराज्ये क्रियते । तत्र समये पातस्याहा श्रीलाहोरमध्ये असेषफलवृतां गुर्जरधृतां राज्यं कुर्वती नीसतं विजारितां षानश्री सादुलाषानसांज्ञे तत्र समये पातस्याहाश्रीसमीपे तेन प्रभुणा त श्रीमुषात अहमदावादनगरे हाकमहवाले पातस्याहाश्रीजीनो ज्येष्ठ पुत्र सुलतान दाराशकुर

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सांज्ञे तत्र समये पातस्याहाश्रीसमीपे तेन प्रभुणा त श्रीसुषांत अहमदाबादमध्ये हाकमहवाले षानश्रीगेरतषानसांज्ञे सर्वकार्याधीकारिरायश्रीगोपालदाससांज्ञे दिवानी मिरयां इआसांज्ञे बकसीश्री मीरयां कायमदोस्तसांज्ञे धर्माधर्मविलोकनौकर्कादि श्रीमीरयां मेहेमदमीरषसांज्ञे अदलश्रीसेदएहेमदसांज्ञे दरोगा श्रीमीरयां मुकामसांज्ञे कादिना मुफती श्रीअबदल रेहेमान तथा मीआकमालमेहेमदसांज्ञे चौरलंपटविधवंसन कोटपालक अहमदाबादमध्ये चोतरे साणे मीरया मेहेमुदजमासांज्ञे श्रीठाकुर श्रीवीहारिदाससांज्ञे मुसरफ हवेलां मीआ.... सांज्ञे काहानुगा मीआ इभरामषानुसांज्ञे एवं पंचकुलप्रतीपत्तौ श्रीअहमदाबादमध्ये हवेलीआसलोडीआनी तदुपरी छीपवाडमध्ये भावसारज्ञातीय भावसार नरायणजी बिन कसीया ए सर्वे भा० नरायणजीने पोताना कमाइना घर पोताना। ते भा०नरायणजीना पुत्र ४। ते पुत्र चारना नाम वृद्धपुत्र भा०रहीओ तथा भात्र भा० महीओ तथा लघुभात्र भा० मदन तथा लघुभात्र भा० रूपजी ए पुत्र ४ चारना। नाम ए भात्र चारे बेसीने महामाहे माफक थईने षुसी थईनें रलीआत थईने पोताना बापनु भा० नरायणजीनुं जे कांई हतुं भाइ चोहे वेहेची लिधु। घर बार माल मलकत राछपीछ रूपुं सोनुं कांसु त्रांबु पीतल लोहु लाकडु वस्तवानु लुगडा चीथरा जे कोई रोकांत होय ते सर्वे लेहेणू देवु व्यापारवणज चीठी पत्री सनमारजनी धराधरी जे कांई सर्वे भा० नरायणजीनु हतु ते भाई चोहे समजीने वेहेची लीधु। हवे भा० महीआने भाग आवु तेनी वगत। भा० मदननी पेली पास घर छे ते घर भा० महीआने भाग आवु छे। ते घरनी वगत। ओरडो १ एक पूर्वाभीमुष छे ते ओरडा उपर मेडो जडीत्र छे ते आग पटसालासहित पूर्वाभीमुष छे। ते पटसाला उपर मेडो जडीत्र छे। आगल त्रीजी षंडमी ओसरी छे। ए उपर नलीअर छापरुं छे। ए घरना उतरना पासना कहरासरासरी भा०महीआनो समंध। ए भा०महीआना घरनो चाल। भा० मदनना चोकमाहे हीडी जाए तथा भा०रूपानी षडकीमाहे हीडी जाए भा०महीओ हीडी जाए। भा०मदन रूपाने भा० महीआना घरना चोकमाहे सरसमंध नही। एक घर भा० महीआने भाग आवुं छे। ए घर भुमभीतडासहीतं पकवेश्रीतं षालपरनालमोभवलीबापनलकासहीतं द्वारसाषकपाटसहितं आगणूचालसहीतं सागीककठकाष्टादिरचीतं एवंविधं ग्रहं भा० महीआने भाग घर आवुं। ए घरना षुट ४ पूर्वे ए घरनो चाल छे। साहामो भा०रहीआनो कहरो छे। दक्षणे कहरे भा०काहानजी जस्यवंतनु घर छे। पश्चमे पछीते पोलनो चाल छे। उतरे भा० मदननु घर छे ए पास भा०मदनना चोकमाहे तथा रूपानी

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षडकीमाहे भा० महिआने हीडीगआनो समंध छे । ए चतवार मध भा० महिआने भाग घर आवु छे । महीआने भाग त्राबु आवु तेनी वगत । चरु १ एक सेर ८ आठसेरनो तथा चरु १ एक सेर १०।।। पुणा अगार सेरनो तथा चरु १ एक ७।।। पुणा आठसेरनो तथा चरु १ ८ आठसेरनो तथा चरु १ एक सेर ५। सवापाच सेरनो तथा देगडी १ एक सेर ८ आठसेरनी तथा कलसीओ १ एक सेर १।।। पुणा बे सेरनो तथा त्रभाणु १ एक सेर ३।।। पुणात्रणसेरनुं तथा कडहउ १ एक सेर ३।।। पुणात्रणनुं तथा कुंडी १ एक सेर ६।। साढा छ सेरनी कलसीओ १ एक सेर १ एक सेरनी तथा गोहीणीओ १ एक सेर ४। सवाचारसेरनो एवं जमले त्राबाकुट सेर ७३। सवात्रोहोतर सेर भा० महीआने भाग आवी । तथा भा० महीआने भाग पीतल आवु तेहनी वगत । दीवी १ एक सेर ५। सवापाचसेरनी तथा आषलीउ १ सेर ४ चारसेरनो तथा वाढी १ एक सेर २। सवा बे सेरनु तथा पोपट १ एक सेर ३। सवात्रे सेरनो तथा ढीचणीउ १ एक सेर २। सवाबे सेरनी तथा कुंज १ एक सेर ३। सवा त्रे सेरनो तथा पीगाणी १ एक सेर १।। दोढसेरनी तथा कढछी १ एक सेर ०।।। पुणासेरनी तथा लोटी १ सेर०।। अद्सेरनी एवं जमले पीतल सेर २० वीस सेर भा० महिआने भाग आवु । तथा भा० महीआने भाग गहरेणू रुपासोनानु आवु तेनी वगत । उतरी १ एक सोनानी गदीआणा ९ नवनी गदीआणा १ ए परत रुपइआ ७ सात लेवे रुपइआ ६३ त्रेहेसठनी थई । तथा वीटी १ एक सोनानी गदीआणा २ बेनी तेना रुपइआ १२ बार थआ । तथा कंदोरो १ एक रुपानो रुपइआ १३ तेरनो तथा मादलीउ १ एक रूपानु रुपइआ २ बेनुं । तथा पोचीना मादलीआ सोनानो रुपइआ ३ त्रणनो । तथा षलेल १ एक रुपानी रुपइआ २ बेनी । तथा अकोटी १ सोनानो जडावनो । रुपइआ ३३ तेत्रीसनो तथा वेला २ सोनाना गदीआणा पुणाबेना तेना रुपइआ १२ बार । एवं जमले भा० महीआने भाग गहरेणू रुपइआ १४० अंके एकसो चालीस भाग आवु । तथा महीआने भाग कांसू आवूं तेनी वगत । थाली १ सेर ४।। नी थाली १ सेर ३ त्रणनी तथा सेर १।९ एकसेर नवटांकनी तथा सेर १।९ एकसेर नवटांकनी तथा सेरदोढनी तथा सेर १।।। पुणाबेनी तथा वाटका ०।।९ अद्सेर नवटांक तथा वाटको १ एक सेर १ एकनो तथा कुट सेर १ एक तथा फरकी १ एक अमथी उपरांत । एवं जमले भा० महीआने भाग कासू सेर १६ । ९ सवासोल सेर नवटाकनु महीआने भाग आवु । अकोटो १ एक सोनानो जडावनो भाइ त्रणे मलीने भा०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

महीओ मदन रुपो ए भाइ त्रणे समजी षुसीथईनें भा० रहीआने अकोटो आपो। वडा भाई माटे आपो । भा० रहीआना कहरा बचे बारी छे ते बारीए भा० मदन महीओ रूपो एहूना हीडानो समंध नही । एहूना चोकमा भा०महीआने हीडानो समंध नही । मन माने षुसीए जावो आवो पण समंध कोहोने कोहोनो नही । भा० महीआना चाल माहे कई आवी छे । भा० रुपानी षडकीने ओटले वाडो छे। ते वाडो भा० रूपानो छे । तेमां भा० रुपानु मन माने तेने वाडे जवा दे बाकी बीजा कोहोनो समंध नही । तथा रुपइआ १०० सो ओने आसरे भाई अकेक वस्त नंग वेहेची लीधा । रुपइआ सोओने आसरे भा० महीआए वस्त लीधी तथा रुपइआ सोओने आसरे भाइ मदने वस्त भाग आवी । रुपइआ १०० सोनी वस्त भा० रुपाने भाग आवी । ए जण ४ चारीने जुजुइ वस्त आवी । ए सर्वे चारी चाहे षुसी थईने वेहेची लीधी छे । हवे कोइने कोहोनो वेहेचानो समंध नही । ए भाई चारने वडीआईए बाइ सषमाईए तथा भा० गोवंजी ए जण बेए काकेवडीआई ए भा० नरायणजीनो माल वेहेची आलो । बाई सषमाइनु षरच भा० रहीओ पुरे छे ते बाई सषमाई पासे दोरो १ एक सोनानो छे । गदीआणा १६ सोलनो छे गोमती २ सोनानी रुपाना डाडानी छे । ए ग्रेहेणनो दावो करवा आवे ते भा० रहीआने षरच बेठ्ठ होय ते पुरी आपे तथा भा० नरायणजीनी वसातमा त्राबडु १ एक त्राबानुं तथा त्राबडी १ एक आखी तथा त्राबडी एक १ भागी तथा त्राबडी १ एक नानी मीण ठेकवानी तथा कुडु १ त्राबानु ए नंग पांच भा० रहीओ मदन महीओ रुपोए ए भाई चारने नंग पांच अजमाल छे ते वेहेची लेवु छे । तथा १ वेहेल बलद २ ए जुतनो सामान अजमाल छे ते वेहेल जोडी जाए ते भाई चारमा जे जोडी जाए ते जोषम लागे तो ते समरामणि आपि । भा० मदनरुपाने कांई कोनु भा० रहीए मदने आपु सही । अतकु आपु छे । कांई वृद्ध मोटा माटे । एवा षत भाई चारने कीधा छे । अस्य लषत विध्ये ॥

अत्र मतू सामसमा कीधा छे अत्र साष

१ भा० रहीआ नराणजी
मतू लखापरमाण
१ भा० मदन नराणजी
मतू लखापरमाण
१ भा० रूपजी नराणजी
मतू लखापरमाण

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गृहाड्डाणकपत्रम् ।

स्वस्तिश्री संवत् १७१९ श्रावणवदि ३ सोमे अद्येह पादशाहाश्री ५ सूलतांनशाहाजाहापादशाहा गाजी धारमीक सत्यवादी वाचा अवीचल यवनकुलतीलक सकलरायाशीरोमणी महाराजराज्येश्वर एहेवो पादशाहा सरवमूद्रां राज्यं करोती श्रीगूजरातमधे सोबिसाहिब श्रीमहाराजाधीराज श्रीराए जसवंतसंघ दीवानी श्रीमीरजा रिहिमतषान अमदाबादमध्ये हवि श्रीबालसि षासषति षंभाएतमध्ये हाक्यमश्री मीरजा अवदूल लतीव काजी श्रीमिहिमूदजाहिद् कजायकरता वाकेनीवेस श्री मिरजा मिहिमूद् वेग पादशाही दीवानी श्रीठाकुर च्यंतामण्य कोटवाली श्रीमीरकाशमवेग बेसे छे एवमादी पंचकुलप्रतीपतौ श्रीषंभाएतवास्तव्य ओसवालज्ञातीय वृद्धशाषायां ···पारशातयोग्यलषीतं । एकज्ञातीय साहा गवा शंघजी हस्ताक्षरांण यत रुपैआ ८१ अंके रुपईआ एकाशी पूरा एन मोहोरा रोकडा श्रीश्रीकार मासा ११॥ नाज्यारि जेवा अमदावाद तथा श्रीषंभाएतनी टंकसालें पडि चालि त्यारि त्येवा थोकडि कोरा देवा । अमि अमारा घर उपेरि देवा । घर १ ग्रहिणी आप्यूं । ते घरनी हवेली दंतारवाडानीमधे तहो भत्य ऊंडी पोलमाहि लोकाना अपाश्रानी पोल्यमांहि घर छि । ते घरनू बार पूर्वदिशाए ऊगमणू छि । करो १ दक्षणगमनो छि ते साहा गबा शंघजीना घरमधे साधीलो छि । करो बीजो उतरगमानो छि ते साहामेघराज लक्ष्मीदासनामधे साधीलो छि । आगले षंडि करानी जाएगिं षपेडो वांसनो छि । पछीतपाछल छींडी छि । मांहि ओरडो १ छि । ते आगल षंड बीजो छि । आगलि षंडि पाणीहारूं गढूआली बेनूं छोहोबंध छि । बार आगल पडसाल सिहिन छि । उपेरि ओरडा सुधी पीटणी वूजट छि । आगलि षंडी मेडो छि वासनो । ते उपेरि छापरू छि । षाल छि । बार आगल छि । तथा पछीति षाल छि । ए घरनी वगत्य । ए घरमांहि वसि वसावि भाडि आपि आडग्रहिणि मूंकि । भरि भरावि । घरनूं भाडूं नही ग्रथनूं व्याज नही । पडि आषडि ते अमि समरावी आपिए । तथा अमनि पूछी षरचो ते मूजरा आपीए । अमि हाजर न होईए त्यारि माणस बे हजूर षरचो ते मूजरा आपीए । रुपैआ एकाशी कलकावलरहीत थोकडि आपीए त्यारि घर सर्वांगग्रहिणीथी छूटि । बीजूं ए घरनी हद मजूद चाल वावर आंगणू ओटली षाल प्रनाल वाडो नीछारो पूरवि होए त्याहासूधी वावरी । राजक दैवक ए ग्रथ भाए उपेरो देवो । घरना वलत भाडामधे नलिआं घरनो लेनार संचरावि षोटो

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घालि । बाकी पडा आषडानूं जे बेसे ते सरव ए घरनी माथे । बंधी वरस पांचनी । ए लषीतवीधी पूरण.

अत्र मतूं — अत्र साखी
गबा. संघजी मतू — १ सांधा हरजी सा उपरलखा परमाण

गृहाड्डाणकपत्रम् ।

स्वस्ति श्रीसंवत् १७२४ वर्षे माघ सुदि७ गुरौ अद्येह पातशाहा श्रीसुलतानशाहाआलम ग्यरी साहिबकुरानशानी धारमिक सत्यवादी वाचा अविचल ज्यवनकुलतिलक सकलरायांशरोमणि महाराजराज्येश्वर एहवो पातशाहा श्रीश्रीश्रीश्रीश्रीश्री श्री अवरंगजेब सरवमुद्राराज्यं करोति तस्यादेशात् श्रीगुजरातमध्ये सो० श्रीराजनगरे सोबेसाहिब नुवापश्रीमहबतषान दीवानी श्रीश्रीहाजीमहिमद् सफि छि । हवि षासषत षालसि श्री षंभायतहवालि मीयाँ श्रीश्री जहान अलावदीन हवडां श्रीसूरतमध्ये छे । ते षंभायतनी चोषंडीइ न्यायकर्ता हाकिम मीयाँ श्री मीरमाजूला कजाइकानी श्री महिमदसरागदीन वाकेनिकसे मीयाँ श्री एहमद् बेग दीवानी श्री किशुरदास श्रीकोटवाली चोतरि मीर काशमबेग बेसे छे । एवमादीपञ्चकुलप्रतिपत्तौ श्रीषंभायतवास्तव्यश्रीओसवालज्ञातीय वृद्धशाषायां सा षीमवतूनी धनीआणि बाई फूलां ता तथा सा मानशंगठाकरशीपारस्यात् योग्य लषित ओसवालज्ञातीय लघूशाषायां बाई माणिकदेहस्वाक्षराणि दत्ता यत रूपैआ ५१ अंके एकावन पूरा ऐहन मुहरा तोल मासा ११ ना ज्यारि जेहेवा चालि त्यारि तेहवा श्री अमदाबादनी ता श्रीषंभायतनी टंकसालना पडया रोकडा कोरा श्रीश्रीकार कलकावलरहित थोकडि देवा । गरहिणा उपरि देवा ते गरहिणानी विगत्य । हवेली चीतारी अलंगनी पासी सेरी मीठानी पोली गांधिनी छे । ते पोलिमध्ये घर छे । ते घरना षूंठनी विगत्य । घरनूं द्वार पछम साहमुं छे । दक्षणदिशे थांभल छे । पछीति थांभला छे । उत्तरगमानु करो षोतानो छे । ते उपरि गोष छे त । बारणि बि ओटला छे । त । गोषनी करि वांसवलीनो मेडो छे । चोगठा उपरि छापरुं एकढालिऊं छे । तेहनां नेव आंगणि चुई छई । एहवी रीति घर छि । हवी घरनूं भाडू नही गुरथनूं व्याज नही । ए घर पडि आषडि अम्यो समरावी आपी । जो समरावी नापीइ तु अमनि पूछि षरचि ते मुजरा आपीइ । कदाचि अम्यो गांमि न हूंइ तु माणस ५ हजूर षरचि ते मुजरा आपि । गुरथ लागता सूधी आडगरहिणी

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मूके तू अमारो दर दावो नही । हवि ए घरनी हद मजूद । चोक चाचर वाडो नीछारो जिहां सूधी पूचि हुई तिहां सूधी बाई फूलां तथा सा मानशंग ठाकरशी वावरि । वलत भाडा मध्ये वरस १ ना दोकडा १० वलि । ते माटी बाई फूलात । सा मानशंग ठाकरसी छापरुं संचरावई । नेवां षोटो घाति । राजकदैवक गुरथ भुई उपरि देवो । बंधी वरस ५ नी कीधी छे । ए लषू बापना बोल साधइ पालीइ । अस्य लिषितविधे प्रतिपालनीयं श्रीरस्तुः ॥ श्री ॥

अत्र मतूं   अत्र साष्य

वाई माणाका दो मातूं रु० ५१

आकावन ऊपारा पारमाण

APPENDIX II

EXTRACTS FORM THE PRAŚASTIRATNÂKARA OF DALAPATIRÂYA

श्रीकृष्णाय नमः ॥

अभिसर सखि! तूर्णं त्वत्प्रतीक्षाकुलोऽसौ
वनघनतिमिरेऽस्मिन् यामिनीमध्यभागे ।
तमसि हरिरदृश्यस्त्वं च विद्युत्प्रकाशे-
ष्विति मुदितमना मे राधिका मंगलाय ॥ १ ॥
गिरिलयनगतांभःसिक्तवासोविसारे
विवसनतनुयष्टिर्वीक्ष्य कान्तं प्रपन्नम् ।
कृतकभयनिवेशाद्वेपमानोपविश्य
स्तनजघनपिधानव्याकुला राधिकाऽव्यात् ॥ २ ॥

अथ प्रथमं यवनराज्याधिकारनियोगभृता यथाशक्त्युपचरितनाना-शास्त्रविशारदविबुधवृन्देन पित्रा ग्राहितगीर्वाणयावनशास्त्राभ्यासः तदनु च हिंदुम्लेछमहीपालपरिचर्यापारतंत्र्येऽपि विद्याव्यसनव्यग्रचेता बहुषु जनपदेषु विविधविद्वत्सपर्यापरिचयसंपादितसुरनागव्रजयवनभाषाकाव्यरसालंकाराद्य-भिनिवेशः कथमपि पूर्वपुण्यप्राग्भारसंदर्शितफलोदयो निखिलराजन्यराजिनी-राजितांघ्रिराजीवश्रीमन्माधवेन्द्राणां परिचारकपदमासवानस्मि दलपतिरायः ।

तथाहि—

अध्यासितगुणो येषां श्रुतिवर्त्मानुगः प्रभोः ।
लब्धलक्ष्या भवन्त्येव माधवेन्द्रचराः शराः ॥

सोऽहं श्रीमद्द्वारिकेशसेवासफलितपरमोत्तमदेहैर्भूरिभूपालभालचुम्बित-चरणांभोजैर्गरिमसौजन्यविद्याविज्ञानविवेकसत्कीर्तिसुधासिक्तवसुधामंडलैः किं बहुना मदिष्टदेवायितमूर्तिभिर्गोस्वामिश्रीव्रजभूषणशर्मभिर्यवनपरिपाट्य-नुकृत्या गीर्वाणगिरि प्रशस्तिपूर्वकपत्रलेखप्रकाराय समादिष्टो रचयामि सन्द-र्भममुं याचे विदुषः सहृदयान् यदपात्रे मयि विद्याया लेशोऽपि चमत्कारीत्य-व्यक्ते बालजल्पित इव तुष्टिमाधाय दुष्टामपि रचनां मैव दूषयंतु किन्तूपगृह्णंतु शोधनैः ।

इति ग्रन्थोत्पत्ति व्याख्या ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ राजवर्णनम् । जयति श्रीमानखिलमहीपमौलितटभास्वत्किरीटकोटिचुम्बितनखमणिः १ विरिञ्चिरिव विमानीकृतराजहंसमण्डलो २ हरिरिव रमाविलासरसिकः ३ शम्भुरिव क्ष्माक्रान्तगोपृष्ठः ४ समुद्र इव भूरिभृच्छरण्यो ५ मन्दर इव मथितजलाशयः ६ पयोद इव जनतार्पितजीवनो ७ वसन्त इव सुमनःसमाजसंश्रयः ८ शशीव मृदुकरमोदितकुवलयो ९ भानुरिवोग्रतेजाः १० सत्कविरिव प्रसादोपबृंहितरसो ११ भिषगिव सुश्रुतचरकोक्त्युपचरितविग्रहः १२ करीव दानद्रवार्द्रकरो १२ असिरिव कोशत्यागसंदर्शितविक्रमः १४ शर इव श्रुतिवर्त्मानुसारिचरितः १५ छत्रवत् सुवर्णोचितदण्डः १६ सरोवत्कमलालयः १७ कमलवच्छिलीमुखाक्षिप्तदलो १८ गांभीर्यगोष्पदीकृतजलधिः १९ सौन्दर्यजितकंदर्पः २० माधवसिंहो नाम सार्वभौमः ।

अथ राजसभावर्णनम् । स च चित्रपेशलास्तरणसमाच्छन्नायां सदसि प्रलंबमुक्ताजालजातरूपस्तम्भोच्छ्रितं हेमखचितविमलवितानस्याधस्ताद्विन्यस्ताद्भुततूलिकाप्रच्छदोपधानसमलङ्कृते रत्नजटितासिखेटकलितोपान्ते मध्यदेशे नदत्सु तूर्येषु दिव्याम्बरधरः प्रसूननिस्यन्दसौरभभृन्मेचकबिन्दुकलितवरकाश्मीरोर्ध्वपौण्ड्रभूषितभालो रविकरकलापकांतिवज्रकिरीटोडुनिकरनिभमौक्तिकगुच्छमण्डितोष्णीशो महार्घ्यारुणमणिमण्डितभास्करशुभ्रामलकप्रमाणमौक्तिकमयकुण्डलोल्लिखितकपोलः सान्द्रवर्णमरकतेन्द्रनीलपद्मरागमणिमिश्रितमौक्तिकहारार्धहारविभूषितवक्षाः सुहीरकेयूरकंकणाङ्गदकलितबाहुमणिबन्धो मुद्रामण्डिताङ्गुली रत्नमयकटिबन्धाहितचित्रासिपुत्रिकासन्नद्धमध्यः क्षीराम्बुधिडिण्डिरपाण्डुरचारुचामरद्वन्द्ववीजिताङ्गो जाम्बूनददण्डोचितहिमांशुमण्डलनिभातपत्रविलसत्साम्राज्यः श्रीमाननेकयष्टिधरप्रयुक्तजयशब्दावधानदृग्गृहीतनृपनिकरसाञ्जलिप्रणामो बन्दिविद्वज्जनस्तूयमानयशाः शतसहस्रवसुवसनवाजिकरिकुलप्रदेयोपायनविचेष्टितभ्रूलतिकाकृतनिसर्गाङ्गीकारः सप्रश्रयस्थितोपविष्टपर्षद्गतानेकनृपनिकरनिर्निमेषनिरीक्षितास्यस्तत्तदधिकृतजनसंदर्शितरत्नांचितखलीनपल्याणाद्यलंकृतवाजिवृन्दकनकाङ्कुशकच्छग्रैवेयकर्णपूरकलितकरिकुल इन्द्र इव सुधर्मायां राजते ।

इति प्रसङ्गनिरूपणो नाम प्रथमोऽधिकारः ।

तत्र तावत्पत्रं त्रिधा १ संदेशात्मकं २ व्यवहारात्मकं ३ निदेशात्मकं च । प्रथमं प्रवृत्तिविधिनिषेधहर्षशोकादिसूचनपर्य्यवसायि, प्रतिज्ञातृविप्रतिप-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्तिव्युदासहेतु द्वितीयं, तृतीयं नृपाद्याज्ञाफलम्। मङ्गलोद्देश्योद्देशकोपचार-देशकालोदन्ताः सन्देशपत्रेऽभिधेयं प्राचाम्। मङ्गलमिष्टदेवताप्रणतिराशिषो वस्तुनिर्देशश्च। उद्देश्य उत्तममध्यमावमभेदात्त्रिधा। प्रथमो नृपभर्तृमान्यगुरुप्रभृतिः, समशीलगुणो द्वितीयः, तृतीयो भृत्यछात्रपुत्रादिः। उद्देशकोऽप्येवं योगस्तयोर्वैलोम्यात्। उपचारस्तूत्तमे प्रदक्षिणाप्रणतिभक्तिसेवाविनयविज्ञप्तिप्रमुखः, मध्यमे प्रेमौत्सुक्यादिनिवेदनं, अवमे चाशिरनुवादनाश्लेषप्रसादादि। देशस्तयोर्वासः। कालः पत्रलिखनतिथिमासाब्दवेलाः। कुशलविधिनिषेधाद्य उदन्तः। इति सन्देशपत्राभिधेयम्।

प्रशस्तिर्विशेषणम्। तद्द्विधा। उद्देश्योद्देशकविषयभेदात्। यथार्होत्कर्षस्य प्रतिपादकानि विशेषणान्युद्देश्ये, इतरस्मिंस्त्वपकर्षस्य भूतार्थस्य वा, पोष्यदासभृत्यदीनकिङ्करसेवकपरिचारकाज्ञेयनिदेश्यादीन्युत्तमेषु। इतरेषु सखिमित्रवयस्यशुभचिन्तकोत्सुकवियोगार्तप्रभृतीनि। इति विशेषणानि।

मालवगौर्जराणां मङ्गलपदं निवासविशेषणविशिष्टावुद्देश्योद्देशकौ उपचारोदन्तकालाश्चेति। महाराष्ट्राणां विशिष्ट उद्देश्यो निवासो विशेषणांकित उद्देशक उपचारः कालपूर्वकः कुशलाद्युदन्तः। एवं पृथग्जनपदेषु सप्तान्यतमत्यागेन पत्रपरिपाटी। यवनेषु राजवर्गीयानां निरभिधानान्युद्देश्यविशेषणान्युपचार उदन्तश्चेति पत्रे। वेष्टने यथोचितं सर्वमपि। उद्देशकस्य नाम मुद्रा वा। उत्तमोद्देशकानामवमोद्देश्ये सा पत्रस्यान्तरूर्ध्वभागे हस्तावलम्बेषु। सर्वेषामप्यन्तः। म्लेच्छेशास्तु मिथस्तावद्भूयसीं भगवत्स्तुतिं स्ववर्त्माचार्यप्रणतिं च विलिख्योदन्तेषु प्रवर्तन्ते। केचिदनुकर्षहानिगर्भितामनभिधानामुद्देश्यप्रशस्तिं तदर्होपचारमपि लिखन्ति। तदनु वेष्टनमुद्देशकमुद्राङ्कितं विधाय विचित्रवराम्बरकोशिकायां निक्षिप्य लाक्षामुद्रांकितमुद्देश्यनाममात्राङ्कितपत्रखण्डान्वितं पत्रं प्रेषयन्ति। इति सन्देशपत्रम्।

ऋण १ प्रतिवस्तु २ विवेचन ३ प्रतिभू ४ दान ५ प्रतिज्ञा ६ साक्षिक ७ प्रवृत्ति ८ विक्रय ९ प्रत्याशा १० कृति ११ संतोष १२ सद्विद्यमान १३ आर्तविज्ञप्ति १४ सम्भावना १५ द्या व्यवहारपत्रे। इति व्यवहारपत्रम्।

वर्त्मा १ नयन २ प्रेरण ३ दान ४ दिगीश ५ धर्माध्यक्ष ६ नगर ७ सीमागौप्तिक ८ ग्रामोद्देशिक ९ स्थापनिकाद्यधिकारा १० निदेशपत्रे। इति निदेशपत्रम्।

११

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इत्यभिधेयनिरूपणं नाम द्वितीयोऽधिकारः ।

अथ भूपतिः समानं भूपतिं प्रेमदार्ढ्याय लिखति ।

प्रणतिपुष्पाञ्जलिरादिपुरुषाय तस्मै घटते यस्यामेयमहिम्नोऽतुहिनकरकिरणकलापकिर्मीरितजालरिङ्गद्रजांसीव जठरकुहरेऽनन्तब्रह्माण्डमण्डलानि विस्फुरन्ति, येन चाश्रमवर्णचतुष्टयाध्वविघ्नोपशमहेतवे निजांशमात्रया महीमण्डलेऽस्मिन् भूमिभृतो निर्मिमिरे पीयूषदीधितिकरस्पर्धियशःपुञ्जश्च । तेभ्य एव राजन्येभ्यः ये धर्मविदां वचनैः स्वसृष्टिं प्रजापालनैकफलामधिगम्य निरस्तालस्यविषयाः स्वनियोगमधिष्ठायेहामुत्र च सुखपुण्यभाजो भवन्ति । यदा निदेशानुवर्तिगणनातिशायिसुभटसेनामोघशरधारासारशमितशत्रुरजःपुञ्जेऽमुष्मिन् जनपदे निराकुलमस्मच्चेतः सौमनस्यसुधासम्प्लुतमिवासीत् तदा सौहृदसम्भारसम्भृतं भवत्पत्रं संतोषसमृद्ध्यै समजनि, परस्परपुरुषोपार्जिता प्रेमपद्धतिः सुतरां दार्ढ्यमभजत् । यच्चिरायातस्नेहस्मरणपूर्वकं परस्परजनपदसीमानुल्लङ्घने प्रतिश्रुतिप्रार्थनं व्यलेखि तत्समनंतरं सौहृदसंप्रयोगसङ्कल्पितसर्वस्वानां नः मतम् । यतः श्रेयःफला मैत्रीलतिका जनानां विशेषतश्चावनिभुजाम् । तथाहि । यस्यां स्तिमितजानपदपरिकिर्मीरितावनिसमुदितसमर्हणः सुरसंघोऽपि संतुष्यति तदत्र प्रेमप्रारम्भे प्रथमतोऽस्माभिरेव याच्ञाविधिः कर्तव्य आसीत् । स च नीतिनिपुणैर्भवद्भिः कृतश्चेद्वयमपि तमुररीकुर्मः । अहो भाविभव्यानुसारीणि कर्माणि । भगवता श्लाघ्यपदेऽर्पितानां यत्पूर्वं भवद्विषयोपप्लवार्थिनाऽमुकेनास्मत्साहाय्यं सम्भावनाप्रतिज्ञाभिरन्वैषि तदपि क्षुद्रोपकृतिरनय इति नाभिमन्यामहे प्रत्युत भवद्राष्ट्रे तत्स्थितिमुपद्रवाय विदित्वा स्वमण्डलैकप्रान्ते तस्मै वेतनमदायि । इदानीमस्मदन्वयानुचर्यातिशयलब्धप्रत्ययोऽनुग्रहपात्रममुकः प्रेषितोऽस्ति । स च सत्यैकभुवोऽस्मद्रसनाया व्याकृतानि भवत्सु सोपहारमुपनेष्यति । तान्यन्तः प्रणिधाय निरभिसंधिः प्रेमा धार्यः । किमधिकं दूरदृश्वसु ॥

भूपतिर्बलाधिकं भूपतिं लिखति ।

वियत्पुच्छोच्छालच्छलितजलगर्भे निधिरपा-
मपां नाथः पाथःपृथुललवदुःस्थो वियदभूत् ।
निधिर्भासामौर्वो दिनपतिरभूदौर्वदहन-
श्चलत्काये यस्मिन् स जयति हरिर्मीनवपुषा ॥ १ ॥

सर्वगर्वापहृत्स एव विजयतेतरां यो दीनबंधुतया त्रिलोकीतमःस्तोमति-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रस्करणपटुकिरणकलापकलितं तिग्मांशुमावृण्वतः सान्द्रप्रावृट्पयोदस्य पटलीं मारुतवेगेन क्षणादभूतपूर्वामिव कुरुते ।

न सेनाप्राचुर्यं न च तनुबलं नैव पटवः
सहाया नैपुण्यं न च रणशिरस्यूर्जिततमम् ।
ऋते दैन्यावासं किल भगवतोऽनुग्रहमिह
स्फुरत्यन्यो हेतुः समरविजये नो तनुभृताम् ॥ १ ॥

विक्रमौद्धत्यप्रपञ्चव्यञ्जकं पत्रमवापि । तदुदन्ता ज्ञेयतामायुः । भाविभव्यानां तु सर्वशक्तिसम्पन्ने भगवति दैन्यमेव समुचितं यतोऽनाकल्पितपर्यवसानाः समरव्यतिकराः । यावत् सामदानैः प्रतिकर्तुं शक्यं तावद्भिरश्विसर्गसारतरनिकरनिधनपर्यवसायिन्याहवे न प्रवर्तितव्यमित्यस्मदभिमतम् । कथमप्यचिकित्स्ये तु सङ्गरार्थमभ्यागतस्यातिथ्यसम्पादनमेव गृहमेधिनां धर्मः । सविस्तरमुदन्तो दूतनिवेद्यः । किमधिकं निपुणेषु ॥

राज्ञः प्रत्यनीकभावं प्रपन्नं कुमारं प्रति उपदेशपत्रम् ।

कुलप्रदीपवंशमणे ! श्रूयते यत्त्वमतिगर्वैकनिबन्धनतारुण्याभिनिवेशादगणितानर्थोपपातस्य कण्डूयितमौलेरमुकस्य विघ्नाविले वचसि समाहितचेता निजसमयाधीनं राजपदमविचिन्त्य दुर्धरारित्रुटत्कुम्भिकुम्भस्थलापातिशोणच्छटामेदुरेऽस्मत्कृपाणे मही शासति विपर्यस्तां धियं धत्से । तदेतद्दुस्तर्कितमेव तव । वयं तु त्वय्येव निखिलां राज्यधुरं विन्यस्य विश्रब्धास्तिष्ठामः । को नाम त्वदन्योऽस्माकं प्रियतमो यच्छंका त्वद्वैमनस्यहेतवे जागर्ति । तत्खलानां दुर्गदितेषु नास्था समुचिता । यदि परिजनाधिक्ये स्पृहा स्यात्तर्हि विज्ञापय येन विजयिवाहिनीभ्यः कतिपयं बलं त्वदनुगामि कुर्महे । किमधिकं वीतशैशवे ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

APPENDIX III

ŚÂSANAS AND LETTERS.

धर्मशासनम्

सं. ३१ भाद्रद [सु]दि ११ ऽद्येह श्रीन[डू]ले। ....[हा] राजाधिराजश्रीकटुदेवविजयोद[यो]त........[ज] यतसीहयुवराजभुज्यमानसमीपाद्या श्रीम........रपा [लः]: समस्तमुद्राव्यापारान् परिप [थयन्]। [श्री]से[आ]भटसमस्तमहाजनप्रभृती[न्]। [त]........[व]रः सिंधुराज........। तस्मिन् काले प्रव [र्त] माने लि[ष]ति च पूर्व्वधर्म्मशासन.........
यतु घाणक प्र[ति] सूण सर्व्वप्रमाण श्या....हलखेटलनिषे [धः] एत.......
प्रतिपालयंति [स] आत्मानं पुण्येन लिप्यते ज कोपि लोप [य]स्यति स ब्रह्महत्त्यापापेन गृह्यते ॥ मंगलं महाश्री ॥

अभयदानशासनम्

ओं ॥ संव [त्] १२०९ माघ वदि १४ शनौ अद्येह श्री [म]..........
..........हाराजाधिराजपरमेश्वरउमापतिवरलब्धप्रशा(सा)दप्रौढप्रताप.......
निर्जित [श]ाकंभरीभूपालश्रीमत्कुमरपालदेवकल्याणविजय....................
..........पश्री महादेवे [श्री]श्रीकरणादौ(दि)समस्तमुद्राव्यापारान् परि-
[पं]...............................[प्र]भुप्रसादावासश्रीकिराटकूपलाटहृदशिवा....
..............राजश्री आलणदेवः शिवरात्रिचतुर्दश्यां शुचिर्द्दे.....................
....[पु]ण्ययशोऽभिवृद्धये प्राणिनामभयप्रदानं म............[हा]जनतांबूलिकसमसप्रकृतीन् संबोध्य अभय....[से] मासे उभयोः पक्षयोः अष्टमीएकादशीचतुर्द[शी]..........दत्तं अतोऽनंतरं एतासु तिथिषु नगरत्रयेपि जी [व]
.........[जा ?] च व्यतिक्रम्य जीवानां वध कारयति करोति वा स व्यापा
.......आचंद्रार्कं यावत् केनापि न लोपनीयं। अपरं पुरोहिता [अमा]........
सर्व्वैरपरैश्च एषा अमारिरूढिः प्रमाणीकार्या। [यः को]....कालेन क्षीयते फलं।
एषस्याभयदानस्य क्षय....स्य प्रदत्ताऽभयदक्षिणा न तु विप्रसहस्रेभ्यो....कोपि पापिष्ठतरो जीववधं कुरुते तदा स पंचद्रम्मैर्दंड [नीयः]......[दव्यो] माहराजिकस्यैको द्रम्मोस्ति ॥ स्वहस्तोयं महारा[जश्रीआल्हणदेवस्य] ॥ श्रीमहाराजपुत्रश्रीकेल्हणदेवमतमेतत् ॥ महाराजपुत्रगजसिंहस्य [म] तं ॥ सांधिविग्रहिक ठ०खेलादित्येन लिखितमिदं ॥ श्रीनदूलपुरवासिप्राग्वाटवंशप्रभू-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तसु(शु)भंकराभिधानश्रावकः तत्पुत्रौ क्षितितलधर्म्मतया विख्यातौ पूवि-(ति)गशालिगौ [।] ताभ्यामतीवकृ[प]ापराभ्यां प्राणिनामभयप्रदानशाश(स)-नं विज्ञप्य कारापितमिति ॥ ॥ उत्कीर्ण्णं सूत्र० भाइलेन ॥

धर्माक्षराणि

ओं ॥ संवत् १३५२ वैशाख सुदि ४ श्रीवाहडमेरौ महारा[ज] कुल-श्रीसामंतसिंहदेवकल्याणविजयराज्ये तन्नियु[क्त] श्री२करणे [मं०] चीरासे-लवेलाउल भां०ि [म]ग[लप्रभृत]यो ध[र्मा]क्षराणि प्रयच्छति यथा । श्रीआदिना[थ]मध्ये संतिष्ठमानश्रीवि[घ्न]मर्द्दनक्षेत्रपालश्रीचउंडराजदेवयो[:] उभयमार्गीयसमायातसार्थउष्ट्र १० वृष २० उभयादपि ऊर्द्धं सार्थं प्रति द्वयोर्देवयोः पाइला [।] पक्षे [भीम]प्रिय दशविशोपक [१०] अर्द्धार्द्धेन ग्र-हीतव्याः । असौ लागो महाजनेन म(मा)नित ॥ यथोक्तं [।] बहुभि[र्व]-सुधा यु(भु)क्ता राजभिः सगरादिभिः । यस्य यस्य यदा भू०मी तस्य तस्य तदा फलं ॥ १ ॥ छ ॥

हस्ताक्षराणि

ओं संवत् ११९८ श्रावण वदि ८ रवावद्येह महारा[जाधि]राजश्री-रायपालदेवः कल्याणविजयराज्ये एवं काले प्रवर्त्तमाने श्रीधालोपस्थाने मेरीवाडा विप्र० विरिगु प्रभाकर । डी[पा]वाडा आसदेउ महडू । डुंडणवासु देउ घाहडि । भांगूरवाडउ सुहंकरु दिवाकरु । पीपलवाडा देवाइ[चु] धारउ । आंविलवाडा नारायण महाइच । खइखन्नलावाडा आसिगु आसपालु । भुंड-वाडा देवंगु आंविगु । एवं पाडि ८ सत्क विप्रजन १६ आदौ कृत्वा समस्त-लोको मध्यकदेवाइचसहितः स्वहस्ताक्षरपत्रं प्रयच्छति यथा ॥ मार्गे गछमा-नभाट[भट्ट]पुत्रदौवारिककार्पटिकवणिज्जारकादिसमस्तलोकस्य च सत्कं गत-मपहृतं च देशाचारेण चौकडिकाप्रवाहेणास्माभिः निर्गमनीयं । तथा स्वस्थाने गतं स्वांगेनापि निर्गमनीयम् । एतत निर्गमंतानां म[हा]राजाश्रीरायपाले-नास्माकं रक्षाकारा[स्त्र]द्यं द्र[व्य]कादिकं मुक्तं नास्माकं मध्ये रक्षाकारो मोक्तव्यः ॥ एतदस्माभिः स्वयमपि लोहमयमंगीकृतं निर्गमनीयं च ॥ अनया विधिना राणकानां निर्गमापर्यंतानां अस्माकं मध्यात् यः कोपि ब्राह्मणो [न] निर्गमते पेटं पृष्टिं वा दर्शयति गृह्यमाणस्तु कायव्रतं कृत्वा मृयते च स च सर्व्वोपि स्वानगर्द्दभचांडालो भूत्वा मृयते । राजाश्रीरायपालादीनां राणकानां

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वालेपि ग्रंथिर्नास्ति न च दू[ष]णं किमप्यस्तीति । अत्र साक्षि० श्रीजयसिंहदेवीयदेवगृहावसरीयभट्टारकईलासत्कसमायातकटुकविप्र० साजणु । तथा श्रीअणहिलेश्वरीभट्टारक वरुणसिउ । श्रीजेन्द्रराजेस्वरीय भट्टारक महेस्वरसिउ । अणुपम्वेस्वरीय भट्टारक ज्ञानसिउ । पृथ्वीपाले[स्व]रीय भट्टारक भोपाप्रतिबद्धभट्टार[क] ईशानू । जोजलेश्वरीय भट्टारक मुक्तिदेउ । त्रिपुरुषीय भट्टारक विनायकसांतिसिउ । आसलेश्वरीय भट्टारक मूलदेउ । श्रीपद्मलेश्वरीय भट्टारक तत्पुरुषु । [त्रिप]लाकेश्वरीय [भ]ट्टारक केदारु । आसपाले[श्व]रीय भट्टारक ब्र[ह्म]रासि ॥ पृथ्वीपालेश्वरीय द्वार[व]तीसत्क अवोटी सागाहारि । आसलेश्वरी द्वारवतीसत्क अवोटी जगधरु । त्रिपुरुषीय द्वारवतीसत्क अवोटी श्रीवछ । श्रीअणहिल्लपुरीय······देवधरादिसमस्तमहाजनं । तथा कटकवालश्रे० जसधवलादिसमस्तमहाजन[स्य] (श्च) श्रीधालोपीयलोकस्य संमतेन लिखितं श्रीगौडान्वकायस्थठकुरपेथडेन वा[दि]गसुतेन ऊनाधिकं प्रमाणमिति । समस्त श्रीधालोपीयलोकस्य मते ॥

स्थितकाक्षराणि

ओं संवत् १३४५ वर्षे कार्तिक शुदि १४ सोमे अद्येह श्रीसत्यपुरमहास्थ[ाने] महा[रा]जकुलश्रीसाम्वतसिंहदेवकल्याणविजयराज्ये तन्नियुक्त[म]हं० हीराप्रभृतिपंचकुलप्रतिपत्तौ [।] एवं काले प्रवर्त्तमाने ि[स्थ]तकअक्षराणि प्रयच्छति [य]था । मे० प्र[भ]ा मे० पद्म मे० [आं]सपाले[न] (॥) थांगुआरहाहुलकस्य वर्षं प्रति स्थितके कृ[त]वीस० द्र ८ अष्ट [द्रम्मा] [:] स्थितके कृता । एतत् [स्थि]तकं वर्षानुवर्षे मेहरै पालनीयं । केनापि न लोपनीयं ॥ अन्यत यः [कोपि से]ल[हाथा] अस्य था[न]के भवि[।] सांप्रतं सैल० सीधुराकेन स्थित[के] कृत वर्षं प्रति मुग क १ ॥ सेलह[स्ते]न पालनीयः । सेलहस्तेन उपविश्य देव श्रीवाएस्व(श्व)रे यात्रा का[रा]पनीया ॥ अस्य विधि मे० प्र[भ]ा[म] [तं] । मे० पदमम [तं ।] मे० आसपालमतं । सेल० पातलमतं·········जामतं । मे० आम्बडमतं ।····

(From Epigraphia Indica. Vol. XI).

पत्राणि ।

(१) स्वस्ति । श्रीपाटलिपुत्रादसमसमरसाहससमासादितसमस्तसिन्धुसीमासमुच्छलदविरलविमलयशःकलापकलितधवलदुकूलवसुधावधूदत्तभोग-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सौभाग्यगर्वखर्वीकृतविपुलरिपुप्रतापः शाप इवारातिरमणीविलासानां प्रणतिप्रतिबिम्बितानन्तसामन्तवक्त्रशतपत्रैकपात्रीकृतविमलमणिपादपीठः सुहृत्कुलकमलविकासवासरेश्वरः स्फीतशौर्यमौर्यमहावंशपञ्चाननः श्रीमदशोकदेवस्तक्षशिलाधिपं श्रीकुञ्जरकर्णं संबोधयति यथा । एष मे निरपत्रपः कुचरितमैत्रीपरिस्रस्तचारित्रः पुत्रमुखशत्रुरपवित्रः शास्त्रविद्वेषी पितृकलत्राभिलाषविषपात्रीकृतनेत्रशतपत्रः पापानुरूपरूपयौवनोत्साहसाहसः समुत्पाटितलोचनमणिर्निर्वसनो निर्वास्यतां जननीजनभुजंग इत्यस्मदभ्यर्थनाप्रणयः ॥

KSHEMENDRA'S BODHISATTVÂVADÂN-KALPALATÂ-
KUṆÂLÂVADÂNA.

(२) स्वस्ति । महेन्द्रद्वीपात् परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति । विदितमेतद्वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यस्तपोधनेभ्यः प्रतिज्ञातमभयम् । तत्र विराधदनुकबन्धप्रभृतयः केऽप्यतिचरन्तीति श्रुतम् । तत्तान्प्रतिषिध्य सद्वृत्तिमस्मद्धितां च माहेश्वरप्रीतिमनुरुध्यन्तां भवन्तः ।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥

MAHÂVÎRACHARITRA, ACT II

(३) स्वस्ति । सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोऽपक्रम्य वध्यमलयकेतुमाश्रितानां प्रमाणलेख्यपत्रमिदम् । तत्र प्रथममेव तावद्गजाध्यक्षो भद्रभटः अश्वाध्यक्षः पुरुषदत्तः महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो डिङ्गरातः देवस्य स्वजनसम्बन्धी महाराजो बलगुप्तः देवस्यैव कुमारसेवको राजसेनः सेनापतेः सिंहबलस्य कनीयान्भ्राता भागुरायणो मालवराजपुत्रो लोहिताक्षः क्षत्रगणमुख्यो विजयवर्मेति । वयं देवस्य कार्ये अवहिताः स्म इति ।

MUDRÂRÂKHSHASA, ACT III

(४) स्वस्ति । यथास्थाने कुतोऽपि कोऽपि कमपि पुरुषविशेषमवगमयति । अस्मत्प्रतिपक्षं निराकृत्य दर्शिता सत्यवता सत्यवादिता । साम्प्रतमेतेषामपि प्रथममुपन्यस्तसन्धीनामस्मत्सुहृदां पूर्वप्रतिज्ञातसन्धिपरिपणनप्रोत्साहनेन सत्यसन्धः प्रीतिमुत्पादयितुमर्हति । एते ह्येवमुपगृहीताः सन्तः स्वाश्रयविनाशेनोपकारिणमाराधयिष्यन्ति । अविस्मृतमेतत्सत्यवतः स्मारयामः । एतेषां मध्ये केचिदरेः कोषदण्डाभ्यामर्थिनः केचिद्विषयेणेति । अल-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ङ्गारत्रयं च सत्यवता यदनुप्रेषितं तदुपगतम् । मयापि लेखस्याशून्यार्थं किञ्चिदनुप्रेषितं तदुपगमनीयम् । वाचिकं चास्तमात् सिद्धार्थकाच्छ्रोतव्यमिति ॥

IBID, ACT V

(५) स्वस्ति । यज्ञशरणात्सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजसूययज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः, स सिन्धोर्दक्षिणे रोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत् सम्मर्दः ।

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥

सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ॥

MÂLAVIKÂGNIMITRA, ACT V

(६) स्वस्ति । श्रीवाराणस्यां महाराजाधिराजपरमेश्वरमहामोहपादान् श्रीपुरुषोत्तमायतनात् मदमानौ साष्टाङ्गं प्रणम्य सविनयं विज्ञापयतो यथा । भद्रमव्याहतम् । अन्यत् । देव ! पुनर्देवी शान्तिर्मात्रा श्रद्धया सह विवेकस्य दूत्यमापन्ना विवेकसङ्गमाय देवीमुपनिषदमहर्निशं प्रबोधयति । अपि च । कामसहचरोऽधर्मोऽपि वैराग्यादिभिरुपप्लुत इव लक्ष्यते । यतः कामाद्विच्छिद्य कुतश्चिन्निगूढश्चरति । तदेवं ज्ञात्वा देवः प्रमाणमिति ॥

PRABODHACHANDRODAYA, ACT II

(७) स्वस्ति । श्रीमहाराजदेवपालदेवः सङ्ग्रामसिंहमण्डलेश्वरं समादिशति । अस्माभिर्निजविजयश्रीवशीकरणकारणं त्वत्कृते प्रहितमिदमश्वरत्नम् । त्वया तु सततमत्रैव कटके स्थातव्यम् । यदा गूर्जरावनिं प्रविशतोऽस्य नृपस्य वयमाकस्मिकागमनेन समरसंरंभं सम्भावयामः तदा निजपितृवधभववैरार्णवोत्तरणाय तरीकरणीयः करवाल इति ॥

HAMMÎRAMADAMARDANA, ACT II

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(८) स्वस्ति । श्रीजनमनोवृत्तेः श्रीमोहमहाराजो गूर्जरराजराजधान्यां कल्याणमित्रं कलिकन्दलमतिनिबिडमालिङ्ग्य समादिशति यथा । क्षेमोऽस्माकम् । भवताऽपि निखिलप्रवृत्तिगर्भिणी निजकौशलकथातिलकिता निरन्तरमस्मन्मनःप्रमोदाय प्रहेया विज्ञप्तिः । तथा विपक्षपरिजनोपजापकर्मणि नित्यमवहितेन स्थातव्यम् । यश्च त्वत्पार्श्वे मिथ्यात्वराशिनामा तापसच्छद्मा रसप्रदश्चिरात्प्रहितोऽस्ति स यथाकालं प्रस्तुतप्रयोजने व्यापारयितव्यः । ये च चत्वारः कोपगर्वच्छद्मलौल्यनामानस्तीक्ष्णास्त्वन्निकटे प्रहिताः सन्ति तेऽपि नचिरादधिकृतकार्ये नियोजयितव्याः । अत्रार्थे भवन्तं त्वरयितुं संसारको नाम लेखहारकः प्रहितोऽस्तीति ॥

MOHAPARÂJAYA, Act IV.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

APPENDIX IV.

EXTRACTS FROM THE LOKAPRAKÂŚA

OF

KSHEMENDRA.

Adhyâya I.

ज्वलदनलगलत्कपालचन्द्रद्रवदमृतासवसम्भृतोत्सवाय ।
परहितविहितान्तरायरोहत्तपनजटाय नमो नमः शिवाय ॥

विश्वबोधविधातारं विश्वविज्ञानविग्रहम् ।
विश्वरूपं परं नत्वा विश्वेशं शिवमव्ययम् ॥
पराशरसुतो व्यासो वेदव्यासो महामुनिः ।
तस्य शिष्यो महाबुद्धिः क्षेमेन्द्रो नाम विश्रुतः ॥
तेन तस्य प्रसादेन नानाशास्त्रोद्धृतं परम् ।
लोकप्रकाशकमिदं कृतं लेखसमुच्चयम् ॥
येन विज्ञातमात्रेण सर्वज्ञत्वं प्रपद्यते ।
तदेव कथयिष्यामि श्रुत्वा चैवावधारयेत् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वर्णान्तराश्च ये ।
तेषां नामचतुःषष्टिं वक्ष्ये वर्णान्तराणि च ॥

इदानीं लोकलेखशिक्षाचरितं लिख्यते ।

स्वधायपत्रकम्, प्रासादपत्रकम्, दक्षिणापत्रकम्, लिखितलेखपत्रकम्, परित्यागपत्रकम्, अर्थिप्रत्यर्थिसंवादपत्रकम्, पूर्वोत्तरपक्षयोः संवादपत्रकम्, आगच्छयानमध्यस्थम्, दृढमध्यस्थम्, वास्तव्यमध्यस्थम्, दिगिज्ज्यालमध्यस्थम्, लवणमध्यस्थः, क्रियाकारमध्यस्थम्, लागनमध्यस्थः, धानुष्कमध्यस्थः, ग्राह्यमध्यस्थः, वंगलमध्यस्थः ।

एवं विभागशो वर्ण्यं प्रत्येकस्य यथाक्रमम् ।
दिविराणां हितार्थाय भूर्जसारं समुच्चयम् ॥

II Adhyâya.

दीनारहुण्डिका, धान्ययवगोधूमहुण्डिका, सेव्यहुण्डिका, क्रियाकारहुण्डिका, गोटिकानामहुण्डिका, इति हुण्डिकामतम् ।

III Adhyâya contains only glossary.

IV Adhyâya contains glossary, देशकालविभाग, and three forms.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ दीनारोद्यमचीरिका, धान्योद्यमचीरिका, देयंमयाचीरिका, प्रतिवरचीरिका, अवलागणचीरिका, राशिचीरिका, खलासपाटचीरिका, गृहधानुष्कचीरिका, स्थावरधानुष्कचीरिका, विभागचीरिका, भागीवर्तनचीरिका, वन्धोद्यमचीरिका, विक्रयक्रियाकारचीरिका, प्रष्ठचीरिका, नियमनचीरिका, गुण्डीचीरिका, अलङ्करणसङ्केवारचीरिका, रङ्गचीरिका, संरक्षणचीरिका, वाशुधेवाटचीरिका, शातनचीरिका, गुप्तिचीरिका, दिव्यशपथचीरिका, वङ्गलचीरिका, ग्राह्यचीरिका, प्रतिभुवचीरिका, वाक्यचीरिका, खसितग्रहणचीरिका, कर्मपत्रीचीरिका, विज्ञप्तलेखचीरिका।

धर्मचीरिका.

परमाधिदेवतार्चनीय० अत्र संवत्सरे अत्र दिने अमुकविषयस्थामुकग्रामीयामुकेन अमुकपुत्रेण हस्ते सति दिव्यशपथवाक्यचीरिका अमुकविषयस्थामुकप्रदेशीयामुकं प्रति कृता यथा। अनेन तात्कार्यपुरुषाग्रे प्रतिभूः लगितः। तत्तत्र प्राप्यामिन्नग्रे प्राड्विवाकपण्डितसाधिकपुरस्थे स्वेयसारप्रसारेत्युदीरितोत्पन्नवक्तव्ये सति तदनेनोक्तमित्यमुकक्षेत्रादमुकरूपात् भूस्वारिपञ्चकं बलाद्भुक्तिकत्त्वाच मत्पितृप्रत्ययादमुकसङ्गृहीत्वा मूल्येन सम्प्राप्तस्थितमित्यर्थाच तचानेन बोधितम्। तस्योपभुञ्जमानत्वात् बलाच्च तेन नीतं सममिति विचार्यैतद्वक्तव्यतया मयाऽस्य नीतम्। न किञ्चित्। अर्थवत्। न किञ्चिदपि तस्मादेतत्स्थावरं मम पित्रा तु भुक्तमिति वर्षत्रिंशत्पञ्चाशिकं तावदुपभुञ्जीतमेतदेव क्रमेण साध्येन स किलागतः। तस्मादर्थतो वा सर्वस्मान्ममोपभुञ्जमानस्याधिकवलं केन हेतुना किं प्रयोगेन कथं क्रियते इति पदानि परस्परमुदीर्यामुकविषयामुकनागराजदेवपादानामग्रे तत्र स्थित्या तत्रास्य विधानेन पश्यमानक्रमेण च पदोदीरणापूर्वं शुद्धचीरिकां प्रेक्ष्य धर्मचीरिकां ललाटं गृहीत्वा सप्तपदानि गत्वा दिव्यं कर्तव्यम्। अत्र सन्धयः। वदि पञ्चम्यां वदि द्वादश्यां शुदि प्रतिपदि इत्येकेऽनुष्ठाय मया यदि न शुद्धि न कर्षिता वा स्फोटितो वा। अहं पल्याध्यगतस्वदेवोपयुक्तं स्थावरं दत्वा सोव्यति क्रमात्। दीनारसहस्रपञ्चकं पादो यो ग्राहकाणां मार्गे धातव्यम्। तद्वदनेन कर्षापितस्तदा मम न वक्तव्यम्। दैविकराजकुलिकपरस्परं प्रेक्षणीयम्। एवमतः क्रिया न चलनीयम्। अत्र शुद्धिनिकर्षणाय दत्तप्रतिभूः अमुकग्रामादमुकोऽमुकपुत्रः। स यस्य दत्तम—क्तं महमेष यदि दग्धो वा पलाय्य गतस्तदुपयुक्तवदनुपालनीयम्। अनेन तद्वच्छु-

P. P. Ac. Gunratnasuri M.S.   Jin Gun Aaradhak Trust

द्विमध्यस्थः अमुकविषयस्थामुकदेशीयामुको (अमुक)पुत्रः अनेनामुकेन अमुकस्य तद्वहृत्तः। र्थं सति स्थितः। ऊनाधिकान्यक्षराणि प्रमाणम् । सति ।

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये देवोऽपि जानाति नरस्य वृत्तम् ॥

दक्षिणाप्रतिपादनपट्टकः

परमाधिदेवतार्चनीयभट्टारकमहाराजराजाधिराजपरमेश्वरचक्रवर्त्युत्तमलोकपालश्रीमदमुकसुरस्थानराजदेवविजयराज्ये संवत्सरे अत्र दिने अमुकविषयस्थामुकग्रामीयामुकः अमुकपुत्रोऽमुकपौत्रः तथा तदीयवैवाहितभार्या राज्ञी अमुकोद्यमानामुकाया अमुकग्रामीयामुकदुहितायाश्चेतसवियुतोक्तं वा हस्तवाग्भराभ्यामुपलक्षिते सति दक्षिणाप्रतिपादनपट्टकोऽयं ददाति यथा । अत एवामुकप्रदेशेयग्रहारीयभद्रामुकायामुकपुत्राय त्रिसन्ध्योपासकाय ऋग्यजुःसामाथर्ववेदपाठकाय नित्यस्नानदानदेवार्चनरताय मम मातापित्रोरुद्धरणाय ब्रह्मचारिणे सद्ब्राह्मणाय श्रीकाश्मीरेषु श्रीमद्विजयेश्वरदेवपादानां पूजार्थमर्घ्यपुष्पधूपदीपसमालभनाय

आपः क्षीरकुशाग्राणि तण्डुलाः सुमनास्तिलाः ।
यवाः सिद्धार्थकाश्चैतदष्टाङ्गोऽर्घ्यः प्रकीर्तितः ॥

पूजापूजकाय दत्तं नियमितम् । अमुकविषयादमुकग्रामादमुकसमीपादमुकनामक्षेत्रादमुकप्रदेशीयादमुकस्थावरनिकटादमुकसमीपादमुकनामक्षेत्रादमुकादीनां सत्कार्यान्मूल्येन दीनारशतसप्तकोपेतसहस्रपञ्चकैर्यः सम्प्राप्तः स्थितागमसश्वालकाद्भूप्रस्थद्वादशकमस्मै दक्षिणायां दत्तं प्रतिपादितं परित्यक्तं च । एतस्योपभुञ्जमानस्य सन्तानस्यास्माभिरस्मै वंशजने वान्यत्र केनचिद्रोधनपरिपन्थनादिकं न कार्यम् । केनाऽपि चित्कृतं स नरकपाती स्यात् । पुत्रवश्यो भवति । आचन्द्रसूर्यसमुद्रमेरुमलयपर्यन्तं तावदाहार्यं ससन्ततेर्जीवनाय प्रतिपादितपट्टकोऽयं दत्तः । उक्तं च भगवता ।

हलकृष्टां महीं दद्यात्सबीजां सस्यशालिनीम् ।
यावत्सूर्यकृते लोके तावत्स्वर्गे महीयते ॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
वर्षकोटिशतं पञ्च स्वर्गे वसति मानवः ॥
देवद्रव्यविनाशाय ब्रह्मस्वहरणाय च ।
अर्जितं कुलनाशाय सर्वदा स्ववधाय च ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥
सुवर्णमेकां गामेकां भूमिमप्येकमङ्गुलिम् ।
हरन्नरकमाप्नोति यावद्भूमिसम्प्लवम् ॥
तटाकानां सहस्रेण अश्वमेधशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
अक्षिपक्ष्मपरिक्षेपक्षणक्षयिनि जीविते ।
कन्याक्षाचाक्षिपेत्क्षोणी यस्या वाचा क्षये क्षयः ॥
तप्ताय:पिण्डदण्डाधृततरलदिकावज्रतुण्डाण्डजौघै-
र्व्याघातैर्भिन्नमुण्डा विकटकटुरटचण्डतुण्डधूर्ताः ।
आराम्याराचकाण्डप्रहतहुतवताखण्डखण्डाङ्गसङ्गा-
ज्जायन्ते तारकास्ते जलधवनिकटा ये धरित्रीं हरन्ति ॥
भूमिर्मीता या त्रिलोकं सुराणां हस्तैर्भुक्तैर्वह्निमारुह्य दिव्यम् ।
तस्या हृत्वा प्रज्वलत्तैलपूर्णे लोहे कुम्भे पश्यतः कालपूतैः ॥
साधारोऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामभद्रः ॥
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम् ।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥
यो वारयति वा क्रोधयति स नरकपाती रायत् ।

एवं न कश्चिदपहरेत् । अनेनैवं दक्षिणापट्टकोऽयं दत्तः । अत्र साक्षित्वे धर्मादित्यवसवः मरुद्गणरुद्राश्च । एवं अमुकदेवमहाप्रभुशाहिप्रत्यक्षे लिखितं गंपत्यमुकेन ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Appendix V.

THE WRITER, PEN, INK, ETCETERA.

लेखकः ।

सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः ।
लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै ॥
शीर्षोपेतान् सुसंपूर्णान् शुभश्रेणिगतान् समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम ॥
राजाभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्यो नृपे भक्तो लेखकः स्यान्नृपोत्तम ॥

Matsyapurâṇa, Adhyaya 189.

मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ॥

Garudapurâṇa.

मेधावी वाक्पटुर्धीरो लघुहस्तो जितेन्द्रियः ।
परशास्त्रपरिज्ञाता एष लेखकः उच्यते ॥

Śârngadharapaddhati.

समानि समशीर्षाणि वर्तुलानि घनानि च ।
मात्रासु प्रतिबद्धानि यो जानाति स लेखकः ॥

राजलेखकः ।

ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ॥
मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्ये विचक्षणः ॥
सदा राज्ञो हितान्वेषी राजसन्निधिसंस्थितः ।
कार्याकार्यविचारज्ञः सत्यवादी जितेन्द्रियः ॥
स्वरूपवादी शुद्धात्मा धर्मज्ञो राजधर्मवित् ।
एवमादिगुणैर्युक्तः स एव नृपलेखकः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नृपानुवर्ती सततं नृपविश्वासरक्षकः ।
नृपतेर्हितकान्वेषी स एव राजलेखकः ॥

Pattrakaumudī.

लेखिनी ।

आद्यग्रन्थी हरेदायुर्मध्यग्रन्थी हरेद्धनम् ।
अन्त्यग्रन्थी हरेत्सौख्यं निर्ग्रन्थी लेखनी शुभा ॥

मषी ।

सहवरभृङ्गत्रिफला कासीसं लोहमेव नीली च ।
समकज्जलबोलयुता भवति मषी ताडपत्राणाम् ॥

सहवरेति कांटासेहरिउ । भृङ्गेति भांगुरउ । त्रिफला प्रसिद्धैव । कासीसमिति कसीसं येन काष्ठादि रज्यते । लोहितं (लोहं?) लोहचूर्णम् । नीलीति गुंलीनिष्पादकवृक्षस्तद्रसः । रसं विना सर्वेषाममीषामुत्कल्य क्राथः क्रियते । स च रसोऽपि समवर्तितकज्जलबोलयोर्मध्ये निक्षिप्यते । ततस्ताडपत्रमषी भवति ॥

इति ताडपत्रमष्याम्नायः ॥

उभयोरपि मष्योर्महाराष्ट्रभाषया डेरलीति प्रसिद्धस्य रिंगणीवृक्षस्य वनस्पतिविशेषस्य सत्कत्कस्य (सत्कतकस्य?) फलरसस्य मध्ये प्रक्षेपे सतेजस्व-(स्त्व?)मक्षिकाऽभावादयो गुणा भवन्ति ॥

भल्लूवघूय(?)रसेन एकैकं क्षिप्त्वा सर्वाणि पत्राणि हाहन ॥ कोफलि (आहतकोपरि ?) मर्द्यन्ते । तदनन्तरं पिसाश्वथाभिधं तवक्षीला(रा?)परनामचूर्णं मध्ये मुक्त्वा तन्मानेनाम्बु पूर्यते । पश्चाच्चूर्णं विना द्वित्राणि धावनी(ना?)नि नीतार्य नीतार्य प्रक्षाल्यते । तदनन्तरं विमलोज्ज्वला पयसींकै(?) पीलीउ च स्यादिति ॥

खांड बोल अनइ लक्खारस कज्जल बज्जल अनइ त्रम्बारस ।
भोजराज मिसि निपाइ पानउं फाटइ मिसि नवि जाइ ॥
बोलस्य द्विगुणो गुन्दो गुन्दस्य द्विगुणा मषी ।
मर्दयेद्यामयुग्मं तु मषी वज्रसमा भवेत् ॥

टीपणानी मषी ।

मष्यर्धे क्षिपेद्गुन्दं गुन्दार्धे बोलमेव च ।
लाक्षाबीअरसेनोच्चैर्मर्दयेत्ताम्रभाजने ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

काजल टांक १० गुंद टांक ५ बोल टांक ३। पूर्वं कोरकमेव कज्जलं ताम्रभाजने क्षिप्त्वा दृढं मर्द्यते । तदनु गुन्दमिश्रितजलेन बिन्दुमात्रक्षिप्तेन घृष्यते, अलक्तकपोतिकाजलं च क्षिप्यते । निम्बगुन्द-खदिरगुन्द-बब्बूलगुन्देन वा दिनसप्तकं मर्द्यते । मषी सर्वोत्तमा भवति । न तु धवगुन्देन, मषी सर्वथा विनश्यति ॥ मष्याम्नायः ॥

कायस्थनिन्दा ।

काकाल्लौल्यं यमात्क्रौर्यं स्थपतेर्दृढघातिताम् ।
आद्याक्षराणि सङ्गृह्य कायस्थः केन निर्मितः ॥
कायस्थेनोदरस्थेन मातुरामिषशङ्कया ।
अन्त्राणि यन्न भुक्तानि तत्रहेतुरदन्तता ॥
विना मद्यं विना मांसं परस्वहरणं विना ।
विना परापवादेन दिविरो दिवि रोदिति ॥
कलमाग्रनिर्गतमषीबिन्दुव्याजेन साञ्जनाश्रुकणा ।
कायस्थलुण्ठ्यमाना रोदिति खिन्नेव राजश्रीः ॥
यमोऽपि वञ्चितो येन नकारान्तरलेखया ।
आयुधं कलमं यस्य तस्य देवोऽपि शङ्कते ॥
लेखनीकृतकर्णस्य कायस्थस्य न विश्वसेत् ।
विश्वसेत्कृष्णसर्पस्य वने व्याघ्रस्य विश्वसेत् ॥
निःस्नेहः शूकरहितः सकषायो विबन्धकृत् ।
मसूर इव कायस्थः कायस्थः कस्य शान्तये ॥
लघुपादो न मार्जारः श्वासधारी न तापसः ।
दण्डहस्तोऽपि न यमश्छिद्रान्वेषी न पन्नगः ॥
चोरतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥

कूटलेख्यम् ।

कटुज्ज्वलं बलकृतं मलिनं स्वल्पकालिनम् ।
भग्नश्लिष्टाक्षरयुतं लेख्यं कूटत्वमाप्नुयात् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

GLOSSARY.

Page

1 The लेखs in this लेखपद्धति are about forty in number, if we see the list of them given in the first five stanzas. But the number becomes about fifty if we take उत्थानपत्रिका etc. from 52nd page onwards into account. Another way of making the number fifty is to take even the sub-headings into account. The work is otherwise known as लेखपंचाशिका as there are about fifty लेखs in this.

The thirty-two करणs or departments may be as under:-

श्रीकरण (income department), व्ययकरण, धर्माधिकरण, मण्डपिकाकरण, वेलाकुल-करण, जलकरण (navy), (स्थल) पथककरण, घटिकागृहकरण, टङ्कशालाकरण, द्रव्यभाण्डारकरण, अंशुकभाण्डारकरण, वारिगृहकरण (water works) देववेश्मकरण (in palaces), गणिकाकरण, (amusement department) हस्तिशालाकरण, अश्वशालाकरण, करभशालाकरण (camel department), श्रेणिकरण, व्यापारकरण, तन्त्रकरण (political department), कोष्ठागारकरण, उपक्रमकरण, कर्मकरकरण, स्थानकरण (P. W. D.) देवकरण (देवस्थान department), सन्धि (विग्रह) करण, महाक्षपालकरण (depository of legal documents), महानसकरण, जयनशालाकरण (armour department), सत्रागारकरण अन्तःपुरकरण and कोष्ठिका.

2 निरूपित=appointed.

दण्डनायक=generally the Viceroy or the governor of a province. He represents the king, as is clear from lines 4–5 below.

घोटक=a horse.

चित्रजर्त=various kinds of armour.

निजमनोहार्या=at one's own sweet will.

दूयक=a messenger.

गर्जनिकाधिराज=the emperor of Ghazni.

षट्त्रिंशद्दण्डायुधप्रयुञ्जने महानिपुण=highly skilled in the use of thirty-six kinds of weapons.

Thirty-six kinds of weapons are:—

चक्र-पास-मोगरु-गदा-घन-तोमर-तीरह ।
सकाति-सूल-त्रिसूल-वज्र-कातर-करडंडह ॥
पट्टुकटारी-कंत-सरसी-घडु-अवाजी ।
कणीउ छुरी खड्ग नालि गोला नाराजी ॥
पांडुं षपुड मुंसल हल सींगणि फरसी गुपति गणि ।
निषंग शांगि अंकुश गुरुज कुहक बाण बत्रीस भणि ॥

(कवित्त Acc. No. 4568 of the Central Library);

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page

see also प्राचीनगुर्जरकाव्यसंग्रह, the 18th book in the Gaekwar's Oriental Series, p. p. 106–7.

वणराज=the name of a king of Gujerat. Date 720–780 (?) He is the founder of Anhilapura–pattana, the modern Pattan in Gaekwar's territory.

सिद्धराज=the name of a king of Gujerat 1094–1143 A. D.

शीळण=the name of his prime–minister.

प्रसादपत्तला=a deed of grant of rent–free land.

साङ्गण=a proper name.

3

सोमपर्वणि सूर्यपर्वणि वा=either on the occasion of a lunar or a solar eclipse.

पूर्वरीत्यापलमानदेवदायब्रह्मदायगवांगोचरवर्जं=excepting the देवदाय (gifts to temples), ब्रह्मदाय (gifts to Brahmans), and the pasture land for the cows (which must be observed as before); i. e. the whole village excluding these three items is given. पलमान is equal to पळातुं in modern Gujerati.

अधिवासस्तचातुर्वर्ण्यसमक्षं=in the presence of the people of four castes living in the vicinity.

भागलागादिकं=payments in kind or taxes etc.

4

सप्तमचक्रवर्ति=the six चक्रवर्तिs are:–

मान्धाता धुन्धुमारश्च हरिश्चंद्रः पुरूरवाः ।
भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥ अभिधानचिन्तामणि ।

5

मूलराज, चामुण्डदेव etc. are the names of kings of Gujerat.

बर्वरकजिष्णु=the conqueror of बाबरियावाड in Kathiawar or who had the devil बाबरो under his control.

गर्ज्जनकाधिराज=the emperor of Ghazni.

भाभूय=the name of the prime–minister.

शाकम्भरी & सपादलक्ष } शाकम्भरी, modern सांबर was the capital of the सपादलक्ष country in Rajputana. सपादलक्ष is the Sanskrit from Sevalik hills.

दण्ड०=दण्डनायक

पञ्चकुल=an assembly of arbitrators, usually consisting of five.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page
6

ठ०=ठकुर.

धर्मदाय=gift in charity.

7

पत्तला= पट्ट. a royal charter.

मण्डलकरण=a district, or taluka.

राज०=राजपुत्र a Rajput. It means a cavalry-soldier also.

दानदायदानीभोगादिकं=दान is local cess. दाय is the gift to Brahmins or temples. दानी is the land tax. भोग is the right of enjoyment.

उद्ग्राह्यमाण cf. Gujerati उघरावबुं.

दानी वोलापिका: तलाराभाव्य=दानी land-tax. वोलाविका cf. Gujerati वळामणुं तलार is Kotwala. भाव्य is what is called संभावना i. e. पाघडी.

वालयित्वा cf. Gujerati वाळीने.

आयपद=income.

समकरकुल=families whose rent is fixed once for all.

दावापित cf. Sanskrit दापित.

मतानि=signatures.

8

सुत=पुत्र.

चौरचरट cf. Marathi चोरचिलटांचा उपद्रव.

पाला=cf. Gujerati पाळो a foot-soldier.

वाहघोटक=a riding horse cf. Marathi वाह.

प्रवहणघोटक= a carriage horse.

बलहरणेन=mark the use of हरण. It is equal to Gujerati लईने.

अवलगा cf. Gujerati ओळग service.

नवतरभूमी=land as yet uncultivated.

मतं=signature.

ठाकुर वुलाविया तलार हिण्डीपक प्रतीसारक=ठाकुर=generally tries to detect the thief etc. They are generally of the Koli caste.

वुलाविया cf. Gujerati वळाविया the man who accompanies the camp etc.

तलार is a kotwala. हिण्डीपक is a touring revenue officer. प्रतिसारक is an officer who collects tax and allows the cart to go out of the नाळी (a strip of low ground).

क्रियाणकानि cf. Gujerati करियाणुं grocery.

साहु=Merchant.

वुलापिका=the tax for वळाविया people. cf. Gujerati वळामण.

पक्षा cf. खांच खुंच in Gujerati; tease.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page

मतं=see above.

देशोत्तार=a permission for allowing the cargo to go from one place to another.

महंतक=Accountant; a clerk. It is a term of respect also among वणिक caste people of Gujerat.

वृहद्वाजिक=पञ्चकुल नियमिकादि-प्रभृतीनां=वृहद्वाजिक seems to be the modern Police officer. पञ्चकुल already explained. नियमिक seems to be an officer who allows licenced things to go.

अमुकाकसत्क=belonging to a certain man. This सत्त is really सत्क.

उचालकभृत लाङ्गडि २=उचालक is Gujerati उचाळो i. e. household furniture that can be easily moved about. लाङ्गडि=a cart or carriage. The whole means two carts containing household furniture.

तथा ४ कण मूडा ४ the first figure of 4 seems to be a misprint for four 'in words'. the whole may mean corn weighing four मूडाs, or the first 4 may mean four लाङ्गडीs.

मूडा=a measure of capacity equal to a hundred maunds or in the Surat district of 24 maunds.

स्थानदान=allotting some piece of land (allowing them to stand somewhere) वोलापिक is explained. तलाराभाव्य is पाघडी money given to Kotwals.

व्यतिकरे=in connection with.

लश्चा=पश्चा given above.

वद्दा cf. Guzerati बाधा obstacle.

वालाधि० is really बलाधिकृत. seems to be the revenue head of a Taluka like the Mamlatdar.

देशठक्कुर देशतलार ग्रामतलार हिण्डीपक प्रतीसारक वोलापिक=देशठक्कुर=small chieftains in the country. तलार in old Gujerati means कोटवाल, hence देशतलार may mean 'Police Superintendent' and ग्रामतलार Foujdars. हिण्डीपक may be the touring officer of the revenue department.

प्रतीसारक the officer who collects tax and allows the cart etc. to go out of the strip of low ground.

क्रियमाणक is क्रियाणक for which *see* above.

पत्तन seems to be अणहिल्लपुरपत्तन the modern पाटण in the Kadi District of the Baroda State.

साधु is साहु a merchant.

दानवोलापनादिविषये=दान is road-cess. वोलापन (cf. Gujerati वळावणुं) is the tax. It is collected by a वोलापिक the officer-in-charge of collecting the

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page

tax. It seems that formerly a बोलापक or men under him accompanied merchants in their journey for the safety of their goods. A tax was collected for safeguarding their goods.

9

राजगोदाकेन is राज० गोदाकेन i. e. राजपुत्र गोदाकेन. राजपुत्र explained.

सां० is सांवत्सरिक.

द्र० is the abbreviation of द्रम्म a copper coin, which is something like a pice in value.

कर्पटभाव=as पाघडी i. e. something like an इनाम.

विकरपद under the item विकर i. e. miscellaneous expenses.

चटापक=increasing the rent already fixed. cf. Gujerati चढावो.

मलमार्गण=मळवेरो of the present time. This tax is utilised when the whole village wants to show some respect to a particular man.

माङ्गलीयक seems to be a tax collected in view of auspicious occasions of the royal family, as the birth of the prince to a king etc.

चतुरक=Sanskrit चत्वर, Gujerati चोरो i. e. a public place in a village; a police station. It seems to be a tax for the maintenance of this police station.

पतित is from पत् to fall. But here it is used in the Gujerati sense जे किंमत पडे ते आपवी. This author every now and then uses Sanskritised Gujerati.

रक्षणीय: is Gujerati राखवो, i. e. must be prepared and maintained. *see* note on पतित above.

प्रथमस्कंध=the first instalment.

श्रीकरणविदितं i. e. informing the income office.

दावापनाय=दापनाय i. e. for making him pay.

दावापित=दापित.

रा०=राजपुत्र.

भाव्ये *see* in the previous passage पञ्चकुलस्य कर्पटभावे; thus भाव, भाव्य पद and पट्ट (in the next passage) seem to be of the same meaning.

चटापकमलमाङ्गलीयकमार्गणचतुरकपतितं should be as चटापक मलमार्गण माङ्गलीयक चतुरकपतितं.

पट्टकार्थसमस्तकरणाय=for fulfilling all the conditions in the charter.

दोषविनाशावष्टम्भिरक्षणाय for keeping it safe from the three faults. दोष is doing anything wrongly, विनाश not doing it at all and अवष्टम्भ is detention.

ठ०=ठक्कुर.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page

पतिपत्तौ is प्रतिपत्तौ for convincing.

मह is the abbreviation of महंतक.

पारि. is really पारिख (*lit.* who examines) It is a surname among the वणिक्s or श्रेष्ठीs. पारीख formerly used to examine coins.

भोगे=for the right of enjoyment.

देयकवतुलकलसी seems to be a misprint. It should be देय वर्तुलक कलसी. वर्तुलक=peas. कलसी is a measure of sixteen maunds.

अवधेरनन्तरं थाकमानानां पञ्चकशतप्रत्या सव्याजकद्रम्माणां दानाय=If the money remains to be paid after the time is over, it should be paid along with its interest which should be calculated at 5%. For थाकमानानां द्रम्माणां cf. थकलेली बाकी in Marathi.

10

निस्सारेण in an excellent manner.

उद्वसकुटुम्बिक–here कुटुम्बिक is कणबी in modern Gujerati i. e. cultivators who have come from outside and settled here.

गुणाक्षर is गणवतपटो a document for a lease of land by the proprietor to cultivators.

कुलकुटुम्बिक i. e. farmers who live here for generations, or who originally settled here.

स्वसङ्केत=his own special arrangement.

पाद्रीयक=those living in the confines of a village.

नवीन पश्त्रिकानकरणाय–mark न in the compound. It may mean that the men residing in the confines of a village should not be allowed to have new fences, i. e. they should not be allowed to have additional land in their possession.

भाइआड तत्वा (?) मेहकुल=भाइआड may be भरवाड caste men. मेह may be मेघवाल i. e. the scavenger caste. 'Bharwads' because they keep a number of cows sheep and goats with them, and मेहकुल people, because they are untouchables, should not be allowed to stay in the village. तत्वा may be Tadwas.

मातङ्गानां गृहे गवां निषेधनाय as they may kill a cow for the sake of its skin.

प्रतिभूमिः पट्टकनिर्गमः करणीयः the guarantors should see that the conditions in the grant are perfectly fulfilled.

समकरउद्वग्रामपट्टकविधिः i. e. समकरग्रामपट्टकविधि+उद्वग्रामपट्टकविधिः

समकरग्राम is a village for which a permanent revenue is fixed, i. e. it will not be increased, and it is fixed at a particular rate.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Page

उद्दग्राम is the village of which the revenue is fixed as a lump sum.

दाणवुलावी माण्डवीवर्ज-here दाण is दान a road-cess. वुलावी is वोलापन already explained. माण्डवी is a tax levied on articles that are to be sold in a market place. वर्ज because it is government money, and it must go to the government.

समकरपट्ट, उद्दपट्ट is almost explained by समकरग्राम or उद्दग्राम.

वा०=वाणिज्य, a merchant.

राजहुण्डिका=a royal bill of exchange.

उद्राहित=collected. cf. Gujerati उघरावेलुं.

पोत्तक is Gujerati पोतुं, the amount of the revenue of a village sent to the government treasury.

विशुद्धिं यावत्=till the account is clear.

कणभक्तक 8=Gujerati सीधुं or सीधुं सामान i. e. undressed provisions sufficient for eight men.

दू०=दूत्क.

अधि.=अधिकारी a revenue officer like the Mamletdar of a Taluka.

11

फलितपदे cf. Gujerati हुंडी पाके त्यारे. i. e. when the bill of exchange becomes due.

ऊर्ध्वदिनपाटिकायां=for the series of days afterwards, i. e. beginning with the sixteenth day.

क० is perhaps कला. It may be the sixteenth part of a द्रम्म, i.e. a pice.

मतम्=signature.

शु० is शुदि, i. e. in the bright half of a month.

गुप्तपट्टक=a deed of permanent lease. गुप्त because perhaps it reserves the right of use to a perticular man.

श्रे०=श्रेष्ठी a merchant caste man.

गुप्ताक्षराणि is गुप्तपट्टक. A deed of permanent lease.

त्रिपुरुषदेव for त्रिपुरुषप्रासाद a temple built by king मूलराज of the Solanki family at Pattan. *See* प्रबंधचिन्तामणि.

